सृष्टिविमर्शः

CSUJPR
26924

श्रीमती सावित्री शतपथी

२६९२५
स्मृतिविमर्शः

योऽनूचानः स नो महान्।
राष्ट्रियसंस्कृतसंस्थानम्

सृष्टिविमर्शः

“ Forwarded fee of cost with the compliments of Rashtriya Sanskrit Sansthan (Deemed University), New Delhi ”

26924

डा. (श्रीमती) सावित्री शतपथी
अध्यापिका (सर्वदर्शनविभाग:)
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालय:)
श्रीसदाशिवपरिसर:, पुरी, ओडिशा

SV-2024

9.2R

सृष्टिविमर्शः

लेखिका : डा. (श्रीमती) सावित्री शतपथी

प्रकाशिका : लक्ष्मीदाशः,
C/o. डा. श्रीरामचन्द्रदाशः
सिद्धमहावीर, पुरी-७५२००२.

मुद्रक : : नीलाद्रि प्रिण्टर्स
महोदधि मार्केट, पुरी

संस्करणम् : प्रथमम् (२००८)

मूल्यम् : १५०/-

CSUJPR
26924

समर्पणम्

26924



ग्रन्थकुसुममिदं समर्पयामि दिवङ्गतश्वशुर
श्रीयुतनारायणदाशशर्ममहोदयेभ्यो
नतिततिपुरस्सरम् ...

ज्येष्ठा पुत्रवधूः
सावित्री

राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
(भारतसर्वकारस्य मानवसंसाधनविकाशमन्त्रालयाधीनः)
श्रीसदाशिवपरिसरः, पुरी - ७५२००१(ओडिशा)

आशीर्वचनम्

'सर्वं खल्विदं ब्रह्म', 'यतो वा इमानि भूतानि जायन्ते', इत्यादिभिः सर्वतन्त्रस्वतन्त्रश्रुतिप्रमाणैः 'जन्माद्यस्य यतः', 'शास्त्रयोनित्वादिति वादरायणसूत्रयोः च आधारेण जगतः उत्पत्तिकारणं, स्थितिकारणं, प्रलयकारणञ्च ब्रह्मेति निश्चितम्। तथापि भिन्नाभिप्रायवन्तो शास्त्रकाराः जगत्कारणविषये भूतानां सृष्टिविषये च मौलिकमतानि पोषयन्तीति। तत्राद्य लोकायतधूरी आचार्यबृहस्पतिः सृष्टिः सहजसिद्धस्वाभाविकीति निगदति। जगदिदं सत्यं भोग्यञ्च, न कश्चित् तस्याः सृष्टेः रचयिताऽस्ति।

जैनाः पुद्गलाः जगदुपादानमिति भणन्ति । वास्तविकमिदं जगत्, पृथिव्यप्तेजोवाय्वाकाश इति एतेषां पञ्चभूतानामुत्पत्तिरङ्गीकृताऽस्ति वैशेषिकाः परमाणवः सृष्टिकारणमिति प्रतिपादयन्ति। पर्थिव-जलीय-तैजस-वायवीयपरमाणवः स्वीयां सृष्टिं रचयन्ति। आकाशश्च परमाणूनां संयोगायावकाशं प्रकल्पयति। परमेश्वरः जडस्वभावकेषु एतेषु परमाणुषु आद्यस्पन्दनं जनयति। ततः भौतिकी सृष्टिर्भवतीति पीलुपाकवादीनामभिप्रायोऽस्ति। पिठरपाकवादिनः नैयायिकाः भूतानां सृष्टेरुपादानं परमाणवः जगद्रचनां प्रति निमित्तमीश्वरः इति वदन्ति। सांख्याः सत्त्वरजस्तमोगुणात्मिका-प्रसवधार्मिणी-सर्वस्यापि मूलरूपा प्रकृतिरेव जगदुत्पादिका भवतीति कथयन्ति। चेतनपुरुषस्य भोगायापवर्गाय च

निखिलमपि कार्यजातं प्रकृतिः विशिष्य करोतीति तात्पर्यम्। भोग्येयं प्रकृतिः, भोग्यमिदं जगत् , भोक्ता पुरुषाय इत्येतेषां मतम्।

वेदान्तिनरात्मैव भूतोत्पत्तेः हेतुरिति ब्रूवन्ति।

माया सम्वलितं ब्रह्मैव जगत्कारणम्। यथोर्णनाभरुपादानत्वं निमित्तत्वञ्चेति तन्निर्मितगृहं प्रति विद्यते। एवमेव जगत्कार्यं प्रति परमात्मनः निमित्तत्वमुपादनत्वञ्चाऽस्ति । आदावेव सूक्ष्मभूतानां सृष्टिर्जायते। ततः पञ्चीकरणप्रक्रियया स्थूलजगत्सृष्टिर्भवति। व्यवहारकालं यावत् जगदिदं सत्यम्। आत्मज्ञानोदयात्परं दृश्यं जगत् मिथ्या भवति।

भारतीयशास्त्रपरम्परायां सृष्टिरहस्यमतिविचित्रम्। यद्यपि तस्य रहस्योद्घाटनाय विमर्शाय वा एकं जन्म पर्याप्तं न भवति, तथापि सामाजिकव्यवहारनिर्वहणेन सह दुःखानां तत्कारणानाञ्चावगतिः सृष्टेः व्यावहारिकप्रयोजनं निखिलदुःखानां मूलोत्पाटनं सर्वोच्चसुखस्य प्राप्तये सृष्टेरलौकिकं प्रयोजनमिति मन्यामहे। प्राणिनः सर्वे स्व-स्व-कर्मानुसारं शरीरेन्द्रियादीनि लभन्ते, कर्मफलञ्चानुभवन्ति। अनादिरनन्तेयं सृष्टिः कदारभ्य प्रचलतीति न कोऽपि वक्तुं शक्नोति । विचित्रेयं पाञ्चभौतिकी सृष्टिः केन कथं विरचिता, सूक्ष्मशरीरनिर्माणं कथं वा भवति, कथं तत् स्थूलत्वं भजते ? किं नित्यं किमनित्यं च कर्म ? केनोपायेनभ्युदयापवर्ग-फलं लभ्यते ? तत्राधिकारिणः के ? प्रलयः कदा कथं वा भवति कति च भेदाः तस्य ? किं नाम पुनर्जन्म इत्यादिषु विषयेषु शास्त्राणि परिशील्य श्रुत्यादिप्रमाणपुरस्सरं सृष्टेरौचित्य-प्रतिपादितवत्यै श्रीमत्यै स्वनामधन्यायै अध्यापिकायै डा. सावित्री देव्यै साधुवादान् प्रदाय परमेश्वरसन्निधौ आशीषश्च संप्रार्थ्य तस्याः उत्तरोत्तराभ्युदयं कामये ।

प्राचार्यः

प्रो. जि. गङ्गान्ना

श्रीसदाशिवपरिसरः, पुरी

अग्रीय-संस्कृत गवेषणा-केन्द्रम्
CENTRE OF ADVANCED RESEARCH IN SANSKRIT
श्रीजगन्नाथ संस्कृत विश्वविद्यालय:, श्रीविहार:, पुरी
Sri Jagannatha Sanskrit Vishvavidyalaya, Shrivihar,
Puri - 752 003 (ORISSA)

OFFICE OF THE DIRECTOR

शुभासंशनम्

श्रीसदाशिवपरिसरस्य दर्शनाध्यापिका श्रीमती सावित्रीदेवी 'सृष्टिविमर्श:' इति दशाध्यायात्मकं ग्रन्थं प्रणीतवती। सम्पूर्णग्रन्थ: मया अवलोकित: । ग्रन्थस्यास्य प्रथमाध्याये प्रञ्चभूतानां वेदोक्तं प्राध्यान्यं विभिन्नश्रुतिप्रमाणप्रदर्शनपूर्वकं प्रतिपादितम्। द्वितीयाध्याये 'वेदान्त-मतानुसारेण सृष्टिकम:' इति विषयमवलम्ब्य मुख्यस्थूलप्रपञ्चयो: सृष्टि: वर्णिता। तृतीयाध्यायत: पञ्चमाध्यायान्तं क्रमश: चार्वाकबौद्धन्यायवैशेषिकायुर्वेदज्योतिषपुराणसम्मत-सृष्टिप्रक्रिया: समुपस्थापिता:। षष्ठाध्यायत: दशमाध्यायं यावत् आकाशादिभूतानां सद्भावे प्रामाण्यं, भूतानां सृष्ट्युपयोगित्वं, पञ्चीकरणप्रक्रिया, पाश्चात्त्यदर्शनानुसारेण भूतविचार: इति विषया: सम्यगालोचिता: सन्ति। सर्वेषां ग्रन्थोक्तमतवादानां संक्षेपसार: अन्येषाम् इसलामादिसम्प्रदायानां मतवादश्च उपसंहारे उट्टङ्कित: विदुष्या सावित्रीदेव्या।

सृष्टिप्रक्रियायां विशेषत: भूतानां कारणत्वेन उपयोगिता विभिन्नशास्त्राधारेण सूपपादितास्ति ग्रन्थेऽस्मिन्। छात्राणामुपकार: अवश्यमनेन ग्रन्थेन स्यादिति विश्वसिमि, साधुवादं च ज्ञापयामि ग्रन्थकर्त्र्यै।

(प्यारीमोहनपट्टनायक:)

आमुखम्

प्रणम्य परमात्मानं सच्चिदानन्दविग्रहम् ।
सतां प्रीत्यै लिखामि तत्सृष्टितत्त्वस्य आमुखम् ।।

अचिन्त्यरचनारूपं सुखदुःखमोहात्मकं चेतनाचेतनतत्त्वसम्बलितं नितरां विलक्षणं, नित्यं परिणामशीलं जगदिदं कुतः आयातम् ? को वा अस्य स्रष्टा इति यदा जिज्ञासा भवति तदा आश्चर्यमपि जायते । मनसि कीदृशः विलक्षणज्ञानसम्पन्नः यन्त्रज्ञः विश्वकर्मा स भवेत् इति । किं वा एतादृशस्य महतः जगतः सृष्टेः प्रयोजनं स्यादिति । एतासां जिज्ञासानाम् प्रथमम् उपशमनं करोति भगवती श्रुतिः - "तस्माद्वा एतस्मात् आत्मनः सकाशात् आकाश-सम्भूतः। आकाशाद्वायुवायोरग्निरग्नेरापः अद्भ्यो पृथिवी" इति । पुनश्च अन्यत्र ब्रवीति भगवती श्रुतिः "यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति यत्प्रयतन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति" अन्यत्र स्मारयति श्रुतिः - "स ईक्षाँ चक्रे बहुस्यां प्रजायेय" इति । "हन्ताऽहं तिस्रदेवताः अनेनात्मना अनुप्रविश्य नामरूपे व्याकरवाणि" इति एवं रूपेण, पञ्चभूतानामुत्पत्तिविषये उपनिषत्सु तथ्यम् उपलभ्यते। सृष्टिरियं किमर्था इति प्रश्नः तु एकः, परन्तु एतस्य उत्तराणि अनेकानि भवन्ति । परमात्मनः लीलार्थमियं सृष्टिः इति, जीवस्य भोगापवर्गार्था इयं सृष्टिरिति, कारणसत्यतानिरूपणार्था इयं सृष्टिः इत्येवं विधानि समाधानानि शास्त्रेषु उपलभ्यमानानि दृश्यन्ते । किमपि वा भवतु प्रयोजनमनुद्दिश्य यत् किञ्चित् कार्यं नास्ति । सामान्यकर्तृकं कार्यं यदा यस्मै कस्मै प्रयोजनाय भवति तदा किमु वक्तव्यम् ? सर्वज्ञस्य सर्वशक्तिमतः परमेश्वरस्य कार्यविषये तत् तु प्रयोजनवद्भवत्येव इति।

अथ सृष्टिर्नाम उत्पत्त्यनुकूलव्यापारविशेषः । संसाररचना वा, प्रक्रिया नाम प्रकृष्टा क्रिया पदस्यार्थः । सृष्टिप्रक्रिया श्रुतिस्मृतिपुराणादिषु बहुधा चर्चिता। इयं सृष्टिः कस्मात् इति निपतति प्रश्ने स्वभावादिति, शून्यादिति, परमाणुभ्य

इति, गुणेभ्यः इति, अदृष्टादिति, मायाया इति, ईश्वरादिति च समादधुः दार्शनिकाः शास्त्रज्ञाश्च।

सर्वेषां जगज्जातानां स्वभावात् सृष्टिः जायते । पुष्पफलादिवस्तूनां पृथिवीजलाग्निवायु- संयोगेन उत्पत्तिः सम्भवति। एतदर्थं न हि कश्चित् पृथिवीजलाग्निवायु- संयोगेन उत्पत्तिः सम्भवति। एतदर्थं न हि कश्चित् पृथिवीजलाग्निवाय्वादीनां संयोगं करोति कारयति वा । सर्वं वस्तु स्वभावादेव जायते इति न कारणमपेक्ष्यते । उक्तञ्च-

शिखिनं चित्रयेत् को वा कोकिलांश्च प्रकूजयेत् ।
स्वभावव्यतिरेकेण विद्यते नात्र कारणम् ।। इति ।

अर्थात् अखिलं दृश्यं जगत् स्वभावतः एव प्रवर्तते निवर्तते च। "अपरे लोकायतिकाः स्वभावं जगतः कारणमाहुः । स्वभावादेव जगद् विचित्रमुत्पद्यते, स्वभावतो विलयं याति ।।" इति ।

जैनाश्च जगदिदं वास्तविकं जीवश्च नित्यः इति वदन्ति । तेषां नये सृष्टिविषये विशिष्य न कोऽपि विचारः कृतः । एतैः सृष्टिविषये परमाणुवादः अभ्युपगतः ।

असतः सज्जायते इति वदन्तः सौगताः शून्यात् जगदिदं सदिवाभासमानम् इति अमन्यन्त शून्यस्य विवर्त एवायं जगत्समूहः इत्यवदन्। अत एव उच्यते-

मुख्यो माध्यमिको विवर्त्तमखिलं शून्यस्य मेने जगत्
योगाचारमते तु सन्ति मतयस्तासां विवर्तोऽखिलः ।
अर्थोऽस्ति क्षणिकस्त्वसावनुमितो बुद्ध्येति सौत्रान्तिकः
प्रत्यक्षं क्षणभङ्गुरञ्च सकलं वैभाषिको भाषते ।। इति ।

एतैः कार्यकारणयोः भेदः अभ्युपगतः । एतैरङ्गीकृतवादः प्रतीत्यसमुत्पादवाद इत्युच्यते । सृष्टिविषये एवं हि वदन्ति वैशेषिकाः यत् पुण्यविशेषसहकारेण परमाणुषु ईश्वरः आद्यं कर्म उत्पादयति । कर्मणि उत्पन्ने परमाणुषु संयोगः जायते । परमाणुद्वयसंयोगात् द्व्यणुकं, द्व्यणुकत्रयसंयोगात् त्र्यणुकमित्यादिक्रमेण उत्तरोत्तरसंख्याकेन पूर्वेण उत्तरोत्तरा सृष्टिः इति ।

आकाश-मनः-काल-दिशां च उत्पत्तिमत्त्वं नाभ्युपगतमेभिः परमाणुवादिभिः। इतरेषु शास्त्रेषु सृष्टेः कश्चन क्रमः यथा निर्दिष्टः अस्ति न तथा अत्र कश्चन क्रमः आश्रितः।

परिणामवादिनः सांख्याः एवं सङ्गिरन्ते यत् "सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः, सा निखिलस्य प्रपञ्चस्य कारणभूता न कस्यापि कार्यरूपा, स्वयं कर्त्री च, यदा त्रिगुणात्मिकायां प्रकृतौ गुणानां वैषम्यं जायते तदा सृष्टिः सम्भवति। सृष्ट्यनुकुलसंयोगार्थमेव प्रकृतिपुरुषयोः परस्परापेक्षा समस्ति सांख्यदर्शने। प्रकृतिपुरुषयोः संयोगः पङ्ग्वन्धवत् इति दृष्टान्तः एभिः प्रदर्शितः। प्रकृतिः इह गत्वरत्वेन अन्धतुल्या, पुरुषश्च निर्देशकत्वेन पङ्गुतुल्य इति सांख्यीयकल्पना।

सांख्यसृष्टिक्रमः एवमभिधीयते- "सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः। सा च कर्त्री, पुरुषस्तु पुष्करपलाशवत् निर्लेपः कूटस्थ असङ्गश्च। मूलप्रकृते महत्तत्त्वं ततः अहङ्कारः तस्मात् मनः, पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, पञ्च तन्मात्राणि च जायन्ते। पञ्च तन्मात्रेभ्यः आकाशादीनि पञ्च भूतानि उत्पद्यन्ते। एवञ्च प्रकृतेः महत् ततोऽहङ्कारः तस्मात् गुणश्च षोडशकः पञ्चभ्यः पञ्चभूतानि इत्यनेन क्रमेण सृष्टिरिभिहिता।

सत्त्वगुणयुक्तः अहङ्कारः वैकृत इति, रजोगुणयुक्तः अहङ्कारः तैजसः इति, तमोगुणयुक्त अहङ्कार भूतादिः इति च भवति व्यवहारः सांख्यानाम्। कार्यकारणयोर्विषये सत्कार्यवादः एभिः अभ्युपगतः। तैः स्वीकृतवादः परिणामवादः। एतेषां नये पुरुषस्य भोगापवर्गार्था सृष्टिः इति।

कर्मैकवादिभिः मीमांसकैः सृष्टिविषये एवं हि मीमांस्यते यत् जगदुत्पत्तिः तत्तत् प्राणिकृत- पुण्यविशेषात् जायते इति।"

परमात्माश्रिता प्रकृतिः ईश्वरेच्छया तेजोजलपृथिवीत्येतानि त्रीणि तत्त्वानि सृजति। एतेभ्यः त्रितत्त्वेभ्यः सत्त्वरजस्तमसामुत्पत्तिः। समष्टित्रिगुणेभ्यः निखिलमपि परिदृश्यमानं जगज्जायते। मनो बुद्धिचित्ताऽहङ्कारादीनि अन्तःकरणस्य कार्याणि। गुणत्रयस्य समष्टिः एव त्रिवृत्करणम् इति रामानुजीयाः।

अद्वैतिनस्तु "तस्माद्वा एतस्मादात्मनः आकाशस्सम्भूतः आकाशाद्वायुः

वायोरग्निरग्नेराप: अद्भ्य: पृथिवीत्यादि" "स ईक्षां चक्रे बहुस्यां प्रजायेय" "हन्ताऽहं तिस्त्र देवतानेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि तत्सृष्ट्वा तदेवानु-प्राविशत्" इत्यौपनिषत् सृष्टिप्रक्रियामामनन्ति । एतेषां नये आत्मा नित्यशुद्धबुद्ध-मुक्तस्वभाव: कूटस्थश्च। अचिन्त्यरचनारूपोऽयं प्रपञ्च: अस्यैव कार्यम्। जगदुत्पत्तिं प्रति ब्रह्म । विवर्त्तोपादानमित्युच्यते । अद्वैतिन: सृष्टिक्रम: इत्थम्- आत्मन: सकाशात् अपञ्चीकृतभूतानि आकाशादीनि जायन्ते । तत: आकाशादिगतपृथक्सत्त्वांशेभ्य: पञ्च ज्ञानेन्द्रियाणि, मिलितसत्त्वांशेभ्य: मनोबुद्धिचित्ताऽहङ्काराश्च जायन्ते । आकाशादिगतपृथक्रजोगुणेभ्य: पञ्च- ज्ञानेन्द्रियाणि, मिलितरजोगुणेभ्य: पञ्च प्राणाश्च उत्पद्यन्ते। विज्ञानमय-प्राणमयमनोमय इति एतेभ्य: सूक्ष्मशरीरस्य उत्पत्ति: । सूक्ष्मशरीरस्य स्वरूपमेवं हि उच्यते-

पञ्चप्राणा: मनो बुद्धि: दशेन्द्रियसमन्वितम् ।
अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम् ।। इति ।

पञ्चीकृतभूतेभ्यो व्युत्पन्न: स्थूलदेह: अन्नमय इत्युच्यते । मनस: ज्ञानेन्द्रियाणां च समवाय: मनोमय: इति कथ्यते । पञ्चप्राणा: पञ्चकर्मेन्द्रियाणि मिलित्वा प्राणमय इति निगद्यते । बुद्धि ज्ञानेन्द्रियाणां समवाय: विज्ञानमय इति व्युत्पाद्यते । मलिनसत्त्वप्रधानाऽविद्याकारणात् प्रियवस्तुप्राप्त्या यो सुखानुभव: स आनन्दमय इत्युपदिश्यते। तत: च जरायुजाण्डजस्वेदजोद्भिजादीनां सृष्टि: । एवं स्थूलभूतेभ्य: स्थूल:, स्थूलतर:, स्थूलतमादीनि च कार्याणि जायन्ते । चतुर्दशभुवनै: युक्त: ब्रह्माण्ड: उत्पद्यते । सूक्ष्मशरीरसमष्ट्युपहितं चैतन्यं सूत्रात्मा इति, सूक्ष्मशरीर-व्यष्ट्युपहितं चैतन्यं तैजसमिति, स्थूलशरीरसमष्ट्युपहितं चैतन्यं विराडिति, स्थूलशरीरव्यष्ट्युपहितं चैतन्यं विश्वमिति च व्यपदिश्यते।

अद्वैतिनां नये सृष्टिर्नाम न नूतनस्य तत्त्वस्योत्पत्ति: किन्तु अव्यक्तस्य व्यक्तत्वमात्रम् । कार्यकारणयो: अनन्यत्वमधिगच्छन्ति एते । एतै: अभ्युपगतवाद: विवर्तवाद: ।

पौराणिकी सृष्टिस्तु इत्थं यत् महाप्रलयानन्तरं भगवान् मर्यादापुरुष: विष्णु: अनन्तशयामध्यास्ते स्म । तन्नाभित: कमलस्योत्पत्ति:, तत: चतुर्मुखब्रह्मण: सृष्टि:, तदनु ब्रह्मणा सह मधुकैटभयोर्युद्धं समभवत्, तस्मिन् उभावपि पञ्चत्वं

गतौ। तयोः अस्थिभ्यः पाषाणादयः, मांसेभ्यः मृदादयः, शोणितेभ्यः जलादीनि च उत्पन्नानीति पौराणिकीयं प्रक्रिया ।

'विश्वव्यापनशक्तिमान् विष्णुः दृश्यादृश्यामलमि-त्यनिर्गुणनिर्विकल्पः सनातनः' इति । अयं च श्रिया सेव्यमानः । तत्र श्रीः विभूतिः नित्या आद्यन्तरहिता अव्यक्तस्वरूपिणी मूलप्रकृतिरूपा चास्ति, माया प्रकृतिः, मायी विष्णुः, अनादिलोकविकारास्सर्वे प्रकृत्युत्पन्नाः। परमात्मा विष्णुः देवीभूषणायुधैव सह शेषपर्यङ्के शयानः भवति । प्रलयकाले शेषपर्यङ्के शयितस्य नारायणस्य नाभिकमले चतुर्मुखब्रह्मा संजातः । "यदा यदा प्रजास्सृजेय यथापूर्वं ससर्ज" आत्मनः आकाशस्सम्भूतः आकाशाद्वायुः इत्यादिश्रुतिक्रमेण स्वाभिमतानुरूपं स्वशक्त्या लीलया कार्यकारणन्यायेन विष्णोराज्ञया चतुर्मुखात् जगदिदं जातम् ।

"ओषधीभ्यः अन्नम् अन्नाद्भूतानि" इत्यत्रास्ति कश्चन विशेषः। तथा हि अन्नं त्रिविधम् मूत्रं, पुरीषं, शुक्रं च । पुरुषबीजमूलं शुक्रम्। स्त्रीकुचमूलं शोणितम्। तयोः शुक्रशोणितयोरेव शक्तिः । इयमेव शक्तिः गर्भधारणे कारणं भवति । शुक्राधिक्ये पुरुषः, शोणिताधिक्ये स्त्री इति ज्ञेया, द्वयोः तुल्यत्वे नपुंसकत्वमिति विशेषः । पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, अन्तःकरणचतुष्टयं, पञ्च महाभूतानि, पञ्च तन्मात्राणि, प्रकृतिश्च, एतानि पञ्चविंशतितत्त्वानि शरीरे भवन्ति। एतेषां समूह एव क्षेत्रपदेन व्यपदिश्यत इति आगमोक्ता सृष्टिः ।

पाश्चात्त्यसरणिः

पाश्चात्त्यविपश्चिद् देकार्तमहोदयः सृष्टिविषये एवं प्रस्तौति यत् निखिलमपि जगत् स्वतन्त्रं वास्तविकं च । स वस्तुवादी दार्शनिकः। तन्मते जगदिदं जडरूपम्। अस्य दृश्यप्रपञ्चस्य सत्ता एव नास्तीति आदौ अचिन्तयत्, परम् ईश्वरस्य आत्मनश्च सत्तासिद्धये तेन बाह्यप्रपञ्चस्य सत्ताङ्गीकृता । बाह्यजगदिदम् ईश्वराश्रतिम् । ईश्वराश्रतित्वात् जगदिदं वास्तविकम् । जगदिदं द्रव्यादुत्पन्नम् इति निगदति । द्रव्यमिह ईश्वरः, तस्यैव विस्ताररूपं जगदिति तस्याशयः, ईश्वरसंसारयोः ऐक्यमभ्युपगतम् स्पिनोजामहोदयेन । लीब्नीजमहोदयः इत्थं वक्ति शक्त्यणुभ्यः जगदिदमुत्पन्नमिति । ते च अणवः अनेके, शक्त्यणुः इति पदेन ईश्वर अत्र

विवक्षित:। एते विकासवादिन: सन्ति।

लौकमहोदयस्य मते भौतिकपदार्थानामुत्पत्ति: द्रव्यगुणसंयोगात् जायते। द्रव्यपदस्य त्रिधा निर्वचनम् एभि: प्रदर्शितम्-

१. द्रव्यं नाम भौतिकपदार्था:।

२. द्रव्यं नाम भौतिकपदार्थानां प्रत्यय:।

३. द्रव्यं नाम सरलप्रत्ययानामज्ञाताधार: इति।

जगत्, आत्मा, ईश्वरश्च सत्यमिति अस्याशय:।

आस्तां तावत् पश्चिमापश्चिमविपश्चिद्भि: एतावता सृष्टिविषये या: प्रक्रिया: उक्ता:, ता: सर्वा: अपि उपनिषद्मूला इति निर्विवादम्। तासां सर्वासां प्रक्रियाणाम् अखण्डैकरसचैतन्यावबोधे एव तात्पर्यम्। सर्वेषां दार्शनिकतत्त्वानां प्रतिपादने प्रकारभेद: स्यात्कामं गम्यं त्वेकमेवेत्यलमति विस्तरेण।

दर्शनशास्त्रजिज्ञासिन्या सत्त्वगुणसम्पन्नया अध्यापिका सावित्री भगिन्या महता परिश्रमेण गवेषणात्मिकया दृष्ट्या लिखितमिदं "सृष्टे: विमर्श:" इति पुस्तकं नूनं पाठकसमाजे आदृतं भवेदिति आशासे। अन्ते भगिनीसावित्रीदेव्या: सारस्वतोपासना अनुदिनं ऋद्धिं कामयमान: विरमामि।

इत्थं

सुकान्तकुमारसेनापति:, उपाचार्य:

सर्वदर्शनविभागाध्यक्ष:

श्रीसदाशिवपरिसर:, पुरी, उत्कलम्।

कृतज्ञता

सर्वथा व्यस्ततामये जीवने महता श्रमेण काल एवायं ग्रन्थो मयोपस्थापितः पुरस्ताद् विदुषाम् । इह कर्मणि प्रकाशन-टङ्कणादिसर्वविधानि कार्याणि सम्पाद्य समुचितसमये पुस्तकस्वरूपं प्रदत्तवद्भ्यो मम पतिदेवेभ्यः आचार्यरामचन्द्रदाशमहोदयेभ्योऽहं प्रथमं कार्तज्ञ्यं समर्पयामि । कर्मण्यस्मिन् मम गुरुवर्याणाम् आचार्य जी. गङ्गाधरमहोदयानाम्, अग्रज-कल्पनामाचार्यप्यारी मोहनपट्टनायकमहोदयानाम्, आचार्यफकीरमोहनपण्डावर्याणां च भूयानाशीर्वादो लब्ध इति तानेतान् कृतज्ञताभिरशेषाभिः सभाजयामि।

किञ्च, प्रयासेऽस्मिन्मेऽकलितं साहाय्यं दत्तवद्भ्यः **डॉ. सूर्यमणिरथ -डॉ. सुकान्तकुमारसेनापति-डॉ. सुरेन्द्रकुमारषडङ्गी- डॉ. भागीरथिनन्द-डॉ. उदयनाथझा-डॉ. रमाकान्तमिश्रमहोदयेभ्यश्च** धन्यवादान् व्याहरामि ।

बुधजनविधेया
सावित्री

❖ ❖ ❖

बिषयसूची

प्रथमोऽध्याय:	वेदोक्तं पञ्चभूतानां प्राधान्यम्	२४
द्वितीयोऽध्याय:	वेदान्तमतानुसारेण सृष्टिक्रम:	३९
तृतीयोऽध्याय:	चार्वाकमते सृष्टि:	४८
चतुर्थोऽध्याय:	न्यायवैशेषिकदर्शनयो: सामान्यं स्वरूपम्	६३
पञ्चमोऽध्याय:	आयुर्वेदे भूतस्थिति:	७४
षष्ठोऽध्याय:	ज्योतिषमतानुसारं भूतविचार:	७९
सप्तमोऽध्याय:	आकाशादिसद्वस्तुविवेक:	१०६
अष्टमोऽध्याय:	भूतानां सृष्ट्युपयोगित्वम्	११४
नवमोऽध्याय:	पंचीकरणस्यारम्भवाद:	१४३
दशमोऽध्याय:	पाश्चात्यदर्शनानुसारेण भूतविचार:	१५७
उपसंहार:		१७२

माङ्गलम्

प्रणमामि सदा स्वेष्टं येन सृष्टिश्च चाल्यते ।
रहस्यं येन जानामि तं नमामि सदाशिवम् ।।१।।
आञ्जनेय नमस्तुभ्यं प्रसीद मयि सिद्धिद ।
क्लेशहरं चार्त्तत्राणं भजे मुक्तिप्रदायकम् ।।२।।
प्रणम्य तातपादाब्जं वन्दे श्रीश्रीगुरुं मुदा ।
अधुना यत्प्रसादेन कुर्वे सृष्टिविमर्शनम् ।।३।।
येषां पुण्यबलेनैव श्रीक्षेत्रेऽत्र वसाम्यहम् ।
विधित्सा तव नाकस्थाः सांप्रतमादिशन्तु माम् ।।४।।
निर्वहामि श्रमं सर्वं निधाय हृदि सर्वदा ।
निर्द्वन्द्वं कृपया यस्य भर्त्तृपादं नमामि तम् ।।५।।
आचार्याः सुहृदो यत्र सुधन्याऽहं सदाशिवे ।
स्नेहविह्वलिताः छात्राः तत्र राजन्ति मानदाः ।।६।।
यदि स्युस्त्रुटयः काश्चित् क्षतव्याहं च धीधनैः ।
कृपाशिषं च वर्षन्तु प्रोत्साहयन्तु मां सदा ।।७।।

प्रथमोऽध्यायः

वेदोक्तं पञ्चभूतानां प्राधान्यम्

आकाशवाय्वग्निजलपृथिवीभूतेभ्यः सृष्टिरेषा जातेति सर्वेषां विदितमेतत्। न किमपि वस्तु भूतपंचकं विना जायते । तस्मात् सृष्टिरियं भूतमिति , पांचभौतिकमिति चोच्यते प्राचीनैः । स्थूलसूक्ष्मकारणसृष्टिरपि भूतैरेतै र्जायत इति शास्त्राणि प्रमाणम् । पंचभूतेष्वपि वायुजलयोः प्राधान्यं दृश्यते । न कोऽपि प्राणिविशेषः वायुं विना जीवति । वायुः प्राणरूपेण प्रतिशरीरमधितिष्ठति , प्राणाधिष्ठितत्वात् प्रणिति जीवतीत्युच्यते । कंचित्-कालपर्यन्तं यदि वायुः न स्यात् सर्वे म्रियन्ते । यावत्पर्यन्तं शरीरे प्राणाः स्युः तावत् पर्य्यन्तं जीवतीति व्यवहारः । वायौ गते सति मृत इत्युच्यते । वायोरनन्तरं जलभूतस्य प्राधान्यम् । आहाराभावेऽपि जलं पीत्वा कंचनकालपर्यन्तं प्राणिनः जीवन्ति । तस्मात् आहारानन्तरस्थानं जलस्येत्यवगम्यते । जलमेव प्राणस्याधार इति केनचित् कविनोक्तम्। प्राणान् शरीरे स्थापयितुम् आहारानन्तरं जलं मुख्यं कारणं भवति। अनेन भूतानां सृष्टौ प्राधान्यं महदिति ज्ञायते ।

जलस्य प्राधान्यम् -

ऋग्वेदस्य प्रथममण्डलान्तर्गते २ ३ सूक्ते अब्देवताकाः मन्त्राः इत्थं जलमहिमानं प्रतिपादयन्ति- हितैषिबन्धुः सहस्रमुदकं , मधुररसयुक्तं पयः गोप्रभृतिषु संस्थाप्य देवं यजन् अध्वभिः अध्वरीयतां प्रापयति[१] ।

जले मरणरहितममृतमस्ति । औषधमप्यस्ति तत्रैवोदके । बुभुक्षारोग-निवारणार्थमस्माभिरन्नरूपौषधमुपयुज्यते । तच्चान्नं जलेन निर्मीयते। अनेन जले औषधमस्तीति ज्ञायते । सर्वे ओषधयः जलेन एधन्ते । अतः जले औषधमप्यस्तीति सूक्तेरभिप्रायः । यदि जलस्योपभोगं सम्यक् कुर्मः तदानीं जलरूपममृतं आयुषः अभिवृद्धये रोगोपशान्त्यर्थं च भवेदिति । केचन मन्त्राः जलमौषधमित्यमृतमिति च गदन्ति । हे देवाः जलमहिमानं ज्ञातुं वाजिनः भवत[२] इति ।

ओषधिपालः सोमः मां मन्त्रद्रष्टारमुवाच यज्जले समज्ञतौषधमस्ति । सर्वौषधीनां कारणभूताप्सु सुखदं तेजो वर्तत इति । अस्ति जलं सर्वौषधीना-मावासस्थानम् । अतः वृष्ट्यनन्तरं भूमौ ओषधिलताप्रभृतयः जायन्ते। अग्निः औषधयः सर्वे जले अजायन्त इति वेदाः[३] निगदन्ति ।

हे जलानि अहं लोके सुखरूपेण जीवितुं मम शरीरस्य कृते भेषजरूपेण[४] कवचसदृशानि भवत यूयम् ।

[५]हे उदकानि ज्ञाततया अज्ञाततया वा मयानुष्ठितानि दुरितानि मत्त दूरं प्रापय । साधुजनानां कृते विहितापराधमपि मत्तः दूरं प्रवहत। अनेन जलानि न केवलं शरीरगतानि पापानि नाशयन्ति ; अपि तु मानसिकवाचिकगतान्यपि विनाशयन्तीति । अहमद्य रसनार्थं जले प्रविष्टः । अहं सम्प्रति जलेन रसेन संप्राप्तः। हे जननिहिताऽग्ने त्वं जलरूपोऽसि जलप्रविष्टं मां वर्चसा संसृज ।

ऋग्वेदे सप्तममण्डले नवम सूक्ते अब्देवताकाः चत्वारः मन्त्रास्सन्ति। एतेषां मन्त्राणां द्रष्टा वासिष्टः[६] ।

एतानि जलान्यन्तरिक्षात् जायन्ते । समुद्रः उदकानामाश्रयः । निर्मलं कुर्वन्ति जलानि विश्वम् । मेघेषु निरुद्धानि जलानि स्ववज्रपातेन वृत्तमावरणम् अपसार्येन्द्रः प्रयच्छति । एतादृशदेवतास्वरूपाणि उदकानि अस्मान् पान्तु । उपर्युक्तविशेषण-विशिष्टानि जलानि निर्विघ्नरूपेण वयं प्राप्नुमः । ताः आपः नः श्रेयसे भवन्तु । तथा हि- समुद्रज्येष्ठात् सलिलस्य मध्यात् , पुनाना यं त्यनिविशमानाः इन्द्रो या वाजी वृषभो रराद , ता आपो देवी रिहमाववतु[७] । अत्र सलिलशब्दोऽन्तरिक्षवाचकः । अन्तरिक्षं जलमित्युक्ते मेघमण्डलात् वृष्टिरूपेण समागतं जलमित्यर्थः । जलमिन्द्रवज्राघातेन मेघमण्डलात् भूमौ पतति । इन्द्रः वर्षरूपं जलं प्रदाय भूमिस्थप्राणिनां मंगलं कुर्यादिति ।

या आपो दिव्या उत वा स्रवन्ति
स्वनित्रिमा उत वा याः स्वं जाः ,
समुद्रार्था याः सुचयः पावकाः
तां आपो देवीरिहमामवन्तु[८] ।।

यानि जलानि आकाशगतमेघमण्डलेभ्यः स्रवन्ति , यान्युदकानि कूपेभ्यः तडागेभ्यश्च निस्सरन्ति, यानि सलिलानि स्वयमुद्भूतानि एतानि सर्वाण्यपि समुद्रं प्रति गच्छन्ति। पवित्राणि दिष्टियुक्तानि च जलानि मां रक्षन्तु -

[९]यासां राजा वरुणो याति मध्ये
सत्यानृते अवपश्य ज्ञानानां
मधुश्चुतः शुचयो याः पावका-
स्ता आपो देवीरिह मामवन्तु ।।

अपां राजा वरुणः प्रजानां सत्यानृते ज्ञात्वा मध्यलोकमधिशेते । यानि जलानि सम्यक् रसं स्रवन्ति , यानि च मालिन्यं प्रक्षालयन्ति, ताः देवतास्वरूपाः आपः माम् अवन्तु ।

यासु[10] राजा वरुणो यासु सोमो
विश्वे देवा या सूपमदन्ति ।
वैश्वानरो यास्वग्निः प्रविष्टः
ता आपो देवीरिह मामवन्तु ।।

जलराजः वरुणः यत्र निवसति, सोमः यत्र प्रतिवसति, विश्वे देवताः यत्र स्थित्वा अन्नं दधुः वैश्वानराग्निर्यत्र प्रविशति, तान्येतानि जलानि मां रक्षन्तु । अत्रोदकानि देवता स्वरूपाणीत्यभिधीयन्ते । वेदमन्त्रेषु वर्तमानाः पदार्थाः प्राणिनः, अप्राणिनः सर्वेऽपि देवतात्वेन स्तूयन्ते । एताः जलस्तुतयः जलप्राधान्यं बहुधा स्तुवन्ति । ये एतादृशं जलं यदि स्नानपानाद्यर्थं व्यवहरेयुः तर्हि ते नीरोगाः, आत्मज्ञानिनः, आत्मद्रष्टारश्च भवेयुरित्यत्र नास्ति संशयः ।

अब्देवताकसम्बन्धी भवति ऋग्वेदस्य दशममण्डलान्तर्गतः नवमसूक्त-विशेषः । त्वष्टृपुत्रः विश्वरूपः तं ददर्श ।

"ईशाना[11] वार्याणां क्षयन्तीश्चर्षणीनां
आपो याचामि भेषजम् ।

जलोत्पन्नसस्योषधीनाम् अधिपतयः, मानवानां संरक्षकाः जलविशेषाः तान् याचामि भेषजम् । सुखं याचे इत्यर्थः ।

"अप्सु[12] मे सोमो अब्रवीदन्तर्विश्वानि
भेषजाऽग्निं च विश्वसंभवम् ।।

सोमः मामब्रवीत् यत् सलिले औषधयः सन्तीति । स एवोक्तवान्

जलेऽग्नि-रप्यस्तीति । "अग्नेस्त्रयो ज्यायांस" इत्यत्रानुवाके "सोऽपः
विशत्" (ऋ. २-६-६-१) इति वर्तते । अग्निः जले वर्तत इति
त्वा तमाग्निं मन्त्रोऽयं तेजसः प्रदानार्थं याचते ।

आपो[13] अद्यान्व चारिषं, रसेन समगस्महि ।

पयस्वानग्न अगहि, तं मा संसृजवचसा ।।

द्य स्नात्वा जलेन तं सारं प्राप्तवन्तः । तत्रस्थाग्ने स्नातं मां तेजस्विनं
रु। तस्मात् स्नातस्य न केवलं जलशैत्यमपि तु अग्नितेजोऽपि
प्येत । हे अग्ने मां तेजसा, आयुषा प्रजाभिश्च समन्वितं कुरु । मम
कृतानि महर्षिभिः सह देवा अपि जानन्तीत्यपरो मन्त्रः-

सं माग्ने[14] वर्चसा सृज, सम्प्रजया मायुषा ,

विधुर्मेऽस्य देवा इन्द्रो विद्यात् सह ऋषिभिः ।।

पि च दशममण्डलस्थः मन्त्र उदकं स्तौति । तथा हि-

आपो[15] अस्मन्मातरः शन्ध्यन्तु

घृतेन नो घृतत्वं पुनन्तु ।

विश्वं हि क्षिप्रं प्रवहन्ति देवी

रुदिदाभ्यः शुचिरापूतम् एभिः ।।

यं सर्वस्य जगतः मातृस्थानीयस्योदकस्य सदुपयोगं कुर्मः । तच्च
लमस्मान् शुभवाचा आवृणोतु । सर्वदोषहरमुदकं प्रत्यक्षमस्मान्
वित्रीकरोतु । मन्त्रस्य प्रथमपादेन बाह्यशुद्धिः, द्वितीयेनान्तः
शुद्धिर्विहिता । जलेन तदधिष्ठितदेवतया चाहं शुद्धो भूत्वा
वशवत्योर्ध्वस्थानं प्राप्नुयाम् ।

१३७ सूक्ते वर्तमानः षष्ठमन्त्रः उदकमित्थं प्रशंसति-

आप[16] ह द्वा उ भेषजी , रापो अमीव चातनीः ।

आपस्सर्वस्य भेषजीस्तास्ते कृण्वन्तु भेषजम् ।।

वारीण्येवास्य जगतः प्राणिनां कृते औषधं भवति । स्नानपानादिकर्मभ्य प्राणिनां संरक्षणमिदम् उदकमेव करोति । नीरोगाः भवन्ति प्राणिन अस्यैव जलस्य कारणात्। ओषधीनां कृते सारं प्रदाय तदाश्रयि मनुष्याणां रोगान् विनाशयति नीरम् ।

त्वं रोगरहितं बलसम्पन्नम् आरोग्ययुक्तं च उदकाभिन्नां भेषजानि कुर्याः। अस्य मन्त्रस्य द्रष्टा जमदग्निः । अत्र सूक्त सप्त मन्त्रास्सन्ति । एतेषां सप्तमन्त्राणां द्रष्टारः यथासंख्यम्- - - १) भरद्वाजः , २) कश्यपः , ३) गौतमः , ४) अत्रिः , ५ विश्वामित्रः , ६) जमदग्निः , ७) वसिष्ठश्चेति । उदकेभ्य एतादृ पारिशुद्ध्यं वयं प्रत्यहं प्राप्नुमः । एते मन्त्राः कृत्स्नयजुर्वेद पंचमकाण्डस्य षष्ठप्रपाटके विद्यमानप्रथमानुवाकान्तर्गताः ।

"हिरण्यवर्णाः[१७] शुचयः पावकाः
यासु जात कश्यपो यास्विन्द्रः ।
अग्निं र्या गर्भं दधिरे
विरूपा स्तान् आपस्थेना भवन्तु ।।

सुवर्णप्रभागुणाभ्यां युक्तं निर्मलं , स्वाश्रितजनदोषहरं कस्यपेन्द्रादिदिव शक्तियुजंतम् अग्निधरं जानीयात् ।

"अप्सु ज्योतिः प्रतिष्ठितं ज्योतिष्यापः प्रतिष्ठिताः इत्याद्युपनिषद् वाक्यमप्यत्र प्रमाणम् ।

"यासां[१८] राजा वरुणो याति मध्ये सत्यानृते ।
अवपश्यत् ज्ञानानाम् मधुश्चुतः शुचयो
याः पावकास्ता आपो
देवीरिह मामवन्तु" ।।

अयं मन्त्रः ऋग्वेदीयः । जलस्य कृते साररूपशक्तिं प्रयच्छता वरुणेनात्र रहस्य रूपेण तत्रैव जले स्थीयते । अयं च जलानां सदसद्कर्माणि पश्यति । अर्थात् कः जलं सद्विनियोगं करोति को वा दुर्विनियोगं करोति इति पश्यति। प्राणिनः शुभाशुभकर्मणः देवाः निरीक्षणं कुर्वन्ति । मधुररसदातृ उदकमस्मभ्यं सुखशान्ति-सौख्यान् प्रददातु ।

[११]यासां देवा दिवि कृण्वन्ति

भक्ष्यं याऽन्तरिक्षे बहुधा भवन्ति ,

याः पृथिवीं पयसोन्दन्ति

शुक्रास्तानपश्यन् स्योना भवन्तु ।।

देवाः स्वर्गलोके जलस्यैव सारभूतममृतं पिबन्ति । अन्तरिक्षाज्जलं प्रदाय पृथिवीं सार युक्तां कुर्वन्ति । ततः पृथिवीतः ओषधयः जायन्ते। एतादृशानि जलानि नः सुखं प्रयच्छन्तु । अस्मान्मन्त्रादिदमवगम्यते यत् जलसारभूतांश एव अमृतमिति। वर्षोदकं मध्यमं फलं प्रयच्छिति। ततः स्थूलरूपमन्नं प्रददाति । भूपतितमुदकं जलनाम्नाऽभिधीयते।

शिवेन मा चक्षुषा पश्यताप

शिशवाय तनवोपस्पृशत त्वं च मे

सर्वांगमग्निरप्सूपदो

हुवेवो मयि वर्चो बलमोजो निधत्त ।।

हे जलानि यूयं शान्तदृष्ट्या मां पश्यत । मंगलपूर्णशरीरात् मां स्पृष्ट्वा मदीयं शरीरं नीरोगं कुरुत ।

हे जलानि त्वद्गत- "आर्य"प्रभृतीन् अग्नीन् आह्वयामि । मयि युष्माकम् ओजः तेजः बलं च संस्थापयत । इदं तेजः

अग्निसम्बन्धीति । शरीरेण सह बलस्य सम्बन्धः । सप्तमत्वपेक्षया (शुक्रधात्वपेक्षया) रसवत्तरोऽयं धातुः ओजः अष्टमः । सप्तमधातुं संरक्ष्य शरीरं प्रकाशयति धातुरयमिति आयुर्वेदः भणति ।

आपः पुनन्तु पृथिवी पूता पुनातु मां
पुनन्तु ब्रह्मणस्स्पतिः ब्रह्मपूता पुनातु मां
यदुच्चिष्टमभोज्यं , यद्वा दुश्चरि तं मम
सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रहं स्वाह ।।

उदकानि पृथिवीं मंगलमयं कुर्वन्तु । वर्षोदकात् यावत्पर्यन्तं भूमिः सिंचिता न भवेत् तावत्पर्यन्तं भूमिः सिंचिता न भवेत् । तावत्पर्यन्तं शस्यौषधोत्पत्तये भूमिः योग्या न भवति । जलरहिता भूमिः मरुभूमिर्भवति । जलं पवित्रयतु पृथिवीमित्युक्ते- भूमिः वारिभिः शस्यादिना समृद्धा भवत्वित्यर्थः । अनेन पुनीतकर्मणा समृद्धा पृथिवी शस्यफलौषदीनां दानेन मामनुगृहणीयात् इति । मया एतावत्पर्यन्तं यदुच्चिष्टम् अभोज्यं , दुष्कर्म , दुश्चरितं च विहितं तत्सर्वं जलान्येतानि मां पुनन्तु । इत्थं भावगम्भीरमर्थगम्भीरं चार्थम् अयं मन्त्रः प्रतिपादयति।

"अद्भ्यः पृथिवी" इत्यादिना जलादेव पृथिव्याः जन्मेत्यवगम्य जलमेव द्रवस्थितिं विहाय घनत्वं भजते । ततः पृथिवीति नाम्नाऽभिधीयते । घनीभूतावस्थायां सर्वं वनस्पत्यादिकं बीजरूपेण तत्र भवति । तस्मात्सोमेनोक्तम् यत्- "अप्सु मे सोमोऽब्रवीदन्तरिक्षानि भेषजा" अर्थात् जले सर्वाण्यप्यौषधानि सन्तीति मामुक्तवान् सोमदेवता। प्रकृते उपर्युक्तमपि वचनं संगच्छते । जलमेव पृथिव्याः रूपं धत्ते इत्यत्र यजुर्वेदगत सप्तमकाण्डे इत्थं वर्णितमस्ति- "आपो वा इदमग्रे सलिलमासीत्तस्मिन् प्रजापतिः"

वायुर्भूत्वा चरत्स इमामपश्यत्तां
पराहेऽभूत्वाहर, तां विश्वकर्मा भूत्वा
व्यमार्षीत सा प्रथत, सा पृथिव्यभवत्तप्त
पृथिव्यै पृथिवीत्वं, तस्यां विश्राम्यत् प्रजापतिस्स
देवानसृजत् वसून् रुद्रानादित्यान् ,
ते देवाः प्रजापतिमब्रुवन् प्रजयामह इति ।
सोऽब्रवीद्यदाहं युष्माकं तपससृक्ष्येवम्
तपसि प्रजननमिच्छाध्वमिति" ।।

दृश्यमानोऽयं प्रपंचः सृष्ट्युत्पत्तेः पूर्वं जलरूपेणासीत् । वासयोग्यत्वाभावात् जलस्य, प्रजापतिः वायुरूपेण तदन्तः प्रविश्य सर्वत्र बभ्रम । जले भूमिं स ददर्श । स च भूमिं वराहरूपं धृत्वा जलस्योपरि आनीतवान् । ततः प्रजापतिः वराहरूपं त्यक्त्वा विश्वकर्मरूपं स्वीकृत्य सर्वं जलं परिमार्जितवान् । ततः तं भूभागं विस्तारयामास, अर्थात् सृष्टिरभूत् । पश्चात्सर्वेषां प्राणिनां सर्वौषधीनां च वासयोग्यमभूत् । प्रथनात् पृथिवीति नाम प्रथितमभूत् । ततः भूमौ विश्राम्य देवगणान् ससर्ज । ततः ते देवगणाः प्रजापतिमपृच्छन्। कथं सृष्टिः कर्तव्येति। तपसा सर्वा सृष्टिः सम्पादनीयेत्यब्रवीत् । "प्रजापति, र्विश्वकर्मा परमेष्ठीत्येते त्रयोप्येकस्यैव मूर्तिभेदाः प्रजापतिर्विश्वकर्मा" इत्यादिमन्त्रोऽपि तदभेद-मुपपादयति। पृथिवीं जलेभ्यः संरक्षितवान् विश्वकर्मेति अथर्ववेदेऽपि दृश्यते।

यामन्वैच्छद्धविषा विश्वकर्मा
अन्तरर्णवे रजसि प्रविष्टाम् ।
भुजिष्यं पात्रं निहितं गुहा
यदाविर्भोगे अभवन्मातृमद्भ्यः ।। इति ।

जलमग्नायाः पृथिव्याः उद्धारमकरोत् इत्यस्य मन्त्रस्य तात्पर्यम् । भगवान् जलादेव पृथिव्याः संरक्षणमकरोदित्यवगम्यते । घनीभूतामवस्थां प्राप्य जलान्येव भूरूपं गृह्णन्ति स्म । जलं हिमरूपं प्राप्य घनत्वं भजत इति नित्यानुभवगोचरम्। अमुमेवाभिप्रायं ऋषयः आध्यात्मिकरूपेण देवतादीनां स्वरूपं स्वीकृत्य वर्णयामासुः। विष्णुः जलमग्नायाः पृथिव्याः संरक्षणमकरोदिति पुराणकथायाः अयमेव मन्त्रभागः प्रमाणम् । पौराणिकाः तत्र मन्त्रे विष्णुशब्दाभावेऽपि विश्वकर्मेति स्थले तच्छब्दं विहाय विष्णुशब्दं व्यवहृतवन्तः । अनेन वसुप्रभृतिदेवानां सृष्टिरपि विश्वकर्मणा विहितेति ज्ञायते ।

ऋग्यजुर्वेदगतविश्वकर्मसूक्तपर्यालोचनया द्यावावृथिव्यादीनां सृष्टिकर्त्ता विश्वकर्मेति ज्ञायते ।

[२०]चक्षुषः पिता मनसा हि धीरो
घृतमेने अजनन्नम्नमाने
यदेदन्ता अदहङ्हन्तपूर्व
आदिः द्यावा पृथिवी अप्रधेताम् ।।

घृतशब्दः जलार्थे मन्त्रेऽस्मिन् दृश्यते । आदौ जलं सृष्ट्वा ततः द्यावापृथिव्यादीनां सृष्टिमकरोत् विश्वकर्मा ।

शरीरं परित्यज्य जीवाः केचन पंचाग्निविद्याक्रमे आदौ द्युलोकाग्निं प्रविशन्ति । ततः मेघजलानि प्रविश्य वृष्ट्यात्मना भूमौ पतन्ति । पश्चात् भूसा रूपेण सस्यादिषु प्रविष्टाः भवन्ति । ततः तत्सस्यादिनिर्गतधान्यफलादीनां मनुष्याः भक्षणं कुर्वन्ति । ते जीवाः पुरुषान् प्रविश्य तेषां शुक्रद्वारा ते स्त्रीगर्भान् प्रविशन्ति। इत्थं जलप्राधान्यं छान्दोग्योपनिषदि पंचमाध्याये प्रतिपादितमस्ति।

अनेन सूक्ष्मरूपेण जीवाः संचरितुं जलमेवाधारः इति ज्ञायते। अन्यभूतसम्बन्धः जलैः न संभवतीति प्रकृते न वयं वदामः । किन्तु अन्यभूतापेक्षया जलप्राधान्यमधिकमिति ब्रूमः । सृष्टिकार्येऽपि जलप्राधान्यमन्यूनमिति वेदादिग्रन्थाः प्रतिपादयन्ति । सृष्टिकर्ता विश्वकर्मैव जलाधिदैवतरूपेण कुत्रचिन्मन्त्रेषु प्रशंसितः। तथा हि-

विश्वतश्चक्षुरुतविश्वतो मुखे ।
विश्वतो बाहुरुतविश्वतरुपात्
तं बाहुभ्यां धमति संपतत्रै
द्यावा भूमी जनयन् देवएकः ।

विश्वकर्मा भगवानेक एव द्युभ्वादिनां सृष्टिकर्तेति चतुर्थपादेन ज्ञायते। तस्मात् यजुर्वेदोक्तः प्रजापतिः विश्वकर्मेव नान्य इति । त्वष्टाऽपि विश्वसृष्टौ कारणमिति वेदेषु लिखितमस्ति । तथा हि-

य इमे द्यावा-पृथिवी जनयित्री
रूपैरपिंशद्भुववानि विश्वा,
तमद्य ऋषितो जवीयान्
देवं त्वष्टारमिह यक्षि विद्वान् ।।

द्युभ्वादीनां सृष्टिकर्ता त्वष्टृविश्वकर्मणोर्मध्ये अभेद इति इतःपूर्वमस्माभिः प्रतिपादितमस्ति । "विश्वकर्मणस्समवर्तताधितस्यत्वष्टा विदधद्रूपमेति" पुरुषसूक्त-वाक्यमत्र प्रमाणम् ।

सृष्टौ जलप्राधान्यं दृष्ट्वा तज्जन्यलतावृक्षं पुष्पफलादीनां कृते अनेकेषु वैदिकमन्त्रेषु तदर्थं प्राथ्यर्मानाः श्रूयन्ते ।

आयने ते परायणे, दूर्वारोहन्तु पुष्पिणीः,
ह्रादाश्च पुण्डरीकाणि, समुद्रस्य गृहे इमे ।। इति ।

अयं मन्त्रः अग्निसूक्ते वर्तते । हे अग्ने ! अपकारः अस्मात् निर्गच्छतु। अस्मद्गृहं परितः लताः, सरांसि, हरिततृणसमूहाश्च वृक्षाश्च पुष्पफलसहिताः भवन्त्विति प्रार्थना श्रूयते । हे अग्ने त्वमागच्छ गृहमस्माकम् । परन्तु फलपुष्पतृणलतावेष्टितं भवतु अस्मद् गृहम् । सदा सरांसि जलपूर्णानि भवन्तु। तत्र पद्मपुष्पादीनामुत्पत्तिः भवतु। अस्मद् गृहं समुद्रस्य (जलस्य) वासः भवतु । इत्थमग्निदाहं निषिध्य जलसाहचर्यं वाञ्छति सर्वदा उपासकः ।

यजुर्वेदीय विश्वकर्मसूक्तेऽन्तिममन्त्रः समस्तजलाधिपतिः जलस्वरूपो विश्वकर्मेति निगदति ।

"समुद्राय वयुनाय सिन्धूनां पतये नमः
नदीनां सर्वासां पित्रे जुहुत विश्वकर्मणे
विश्वाहा मर्त्यगं हविः"

समुद्ररूपाय प्रकाशरूपाय प्रवाहाय नदीनां पतये पित्रे विश्वकर्मणे नमः । तस्मै विश्वकर्मणे सदा आज्यादिहविः समर्प्य सम्पूजन्त्विति । अनेनावगम्यते जलस्वरूपमाश्रित्यैवाधिकतया परमात्मनः स्वरूपमस्तीति । तस्माज्जलनिधिरेव विष्णोः निवास इति पुराणानि प्रकटयन्ति ।

आपो नारा प्रोक्ता, आपो वै नरसूनवः ।
ता यदस्यायनं प्राप्ता तेन नारायणः स्मृतः ।।

जलानाम् अन्यन्नाम नारा इति । एतादृशा नारा परमात्मनः आश्रयाः भवन्ति। तस्मात् नारायण इति भगवतः नाम । नारः अयनः यस्य परमात्मनः सः नारायणः। सृष्टिजलाभ्यां सह विश्वकर्मणः सम्बन्धम् ऋग्यजुर्वेदान्त-र्गतसूक्तानि सम्यक् विवृण्वन्ति ।

द्यौ र्मे पिता जनिता नाभिरत्र

बन्धु र्मे माता पृथिवी महीयम् ।

उत्तानयोश्चाम्बो र्योनिरत्र

पिता दुहितुर्गर्भ माधात्[२१] ।। इति ।

अस्याः सूक्तेः द्रष्टा दीर्घतममहर्षिः। द्युलोकः मम पिता । द्युलोकाकाशः नाभिसदृशः। नाभिशब्दस्यात्र गर्भ इत्यर्थः । भूमौ पतिष्यमाणवर्षः रससदृशः। तच्च रसः (वर्षोदकम्) आकाशात्पतति । तदेव जलं सर्वेषां कृते अन्नोत्पादकम्। तस्मान्नाभिसदृशः द्युलोक इति ।

लोकैस्सह सम्बन्धः पृथिव्याः भवति । अतः पृथिवी माता । पृथिव्याः सकाशात् ओषधयः वनस्पतयश्च जायन्ते । अतः मातृत्वं पृथिव्याः संभवति। भूम्याकाशयोरन्तराले सर्वभूतोत्पत्तौ कारणमन्तरिक्षमस्ति । तत्रान्तरिक्षे वायुः प्रकाशते ।

दिवि-सूर्ययोरत्रपार्थक्यं प्रतिपादितमस्ति । अत्र सूर्यस्थाने पर्जन्यरूपेन्द्रशब्दः प्रयुक्तः । पर्जन्यः वृष्ट्यात्मना पृथिव्याः गर्भधारणे हेतुः। वृष्ट्या पृथिव्यां सस्यादिकं जायते । एतादृशा एवान्ये मन्त्राः -

इदं[२२] द्यावापृथिवी सत्यमस्तु

पितर्मातर्यदिहोपब्रुवे वां,

भूतं देवानामवमे अवोभि

र्विधामेषंवृजनं जीरदानुम् ।।

मातापितृसदृशौ हे द्यावापृथिव्यै भवत्यौ उद्दिश्य अस्माभिर्विहितं स्तोत्रादिकं यथार्थं भवतु । तच्च स्तोत्रादिकं फलाय कल्प्यताम् । वयं भवत्यौ संपूज्य प्राप्नुयाम ईषदन्नम् । वृजनं जलम् , जीरदानुं जयशीलदानं च विद्यां प्राप्नुयाम। द्यावा पृथिव्यौ पितरौ । तयोः

साक्षित्वेन सर्वं फलति । सन्ध्यावन्दनान्ते मन्त्रोऽयं पठ्यत इति सर्वविदितमेतत् । प्रथममण्डलान्तर्गतस्य ।९। सूक्तस्य ६ मन्त्रोऽपि द्यावापृथिव्योः पितृत्वं मातृत्वं च सम्यक् प्रतिपादितयति ।

द्यौर्वा पिता पृथिवी माता

सोमो भ्राताऽदितिः स्वसा ॥

यस्माकं पिता द्युलोकः । माता च पृथिवी । सोमः सोदरः । अदितिरेव स्वसेत्यत्र वर्णितमस्ति । सर्पमुद्दिश्य कथ्यमानोऽप्यमुपदेशः । अतः सर्वेषां कृते पितरौ स्तः द्यावापृथिव्यौ । [२३]द्यावापृथिव्योः कृतेऽद्वितीयं स्थानमत्र दृश्यते। १८५ सूक्तस्य प्रथमः मन्त्रः - **कतरा पूर्वा कतरा परायो**

कथा जाते कवयः को विवेद ॥

द्यावापृथिव्योर्मध्ये कतरः प्रथम इति न कोऽपि वक्तुं शक्नुयादिति मन्त्रः भणति । तथा हि- **भूरिं द्वे अचरन्ती चरन्तं**

पद्धन्तं गर्भमपदी दधाते

नित्यं न सूनुं पित्रो स्मस्ये

द्यावा रक्षतं पृथिवी नोऽश्वात् ॥

पादविहीने द्यावापृथिव्यौ निश्चले चरन्तं चराचरं सर्वं प्राणिजातं यथा पितरौ स्वकीयसंततिं सम्यक् पालयतः तथैव संरक्षतः । हे द्यावापृथिव्यौ पापभयादस्मान् रक्षतम् । अत्राष्टभिः मन्त्रैः संरक्षणं प्रार्थ्यते ।

●●●

पादटिप्पणी

१. अम्बयो यन्त्यध्वभिर्जामयोऽध्वरीयतां- - - - मध्मा पयः ।
ऋ. १-२३-१६।

२. अप्स्वन्तरममृतमप्सुभेषजमपामुतप्रशस्तये देव भवनवाजिनः।
ऋ. १-२३-१९।

३. अप्सु मे सोमोऽब्रवीत्- - - - - -भेषजी । ऋ. २३-२० ।

४. आपः पृणीत भेषजं - - - - - - सूर्यम् । १-२३-२१ ।

५. इयमापः प्रवहत, - - - - - - उतानृतम् । १-२३-२२ ।

६. आपो- - - - - - तं मां संसृज वर्चसा । १-२३-२३ ।

७. ऋ. १, म. ७, ४९ म. ।

८. ऋ. ७-४९-२ ।

९. तत्रैव, ७-४९-३ ।

१०. तत्रैव, ७-४९-४ ।

११. तत्रैव, १०-९-५ ।

१२. तत्रैव, १०-९-६ ।

१३. तत्रैव, १-२३-२२ ।

१४. तत्रैव, १-२३-२४ ।

१५. तत्रैव, १०-१७-१० ।

१६. तत्रैव, १०-१२-३७ ।

१७. कृ. य. वे. ५-६-१ ।

१८. ऋ. ७-४९-३ ।

१९. कृ. य. वे. ५-६-१ ।

२०. ऋ. १०-८२-१ ।

२१. ऋ. वे. १-१६४-३३ ।

२२. तत्रैव, १-१८५-११ ।

२३. तत्रैव, १-१८५-२ ।

द्वितीयोऽध्याय:

वेदान्तमतानुसारेण सृष्टिक्रम:

तत्र सृष्ट्यारम्भकाले परमात्मा सृज्यमाण-प्रपंचवैचित्र्यहेतुप्राणिकर्म सहकृत: अपरिमितानिरूपित-शक्तिविशेषविशिष्टमायासहित: , आसन्ननामरूपक्रियात्मकं समस्तं प्रपंचमादौ बुद्धावाकलय्येदमेवं करिष्यामि, इदमेवं करिष्यामि, इत्यादि-संकल्पम् अकरोत् । "तदैक्षत बहुस्यां प्रजायेय[१]"। "सोऽकामयत बहुस्यां प्रजायेय"[२] । "सोऽकामयत द्वितीयो म आत्मा"[३] ।

सांख्यपरिकल्पितं प्रधानं जगत: कारणं न भवति । प्रधानस्याचेतनत्वं सांख्यैरभ्युपगम्यते । इदं च जगत् सदचेतनम् । अहं बहु भवेयम् । एतादृशाकांक्षा चेतनस्यैव भवेत् । न तु अचेतनस्य। यथा मृद् घटाद्याकारेण परिणमते यथा वा रज्वादि सर्पाद्याकारेण । सत: एव द्वैतभेदेनान्यथा गृह्यमाणत्वाद् असत्वं कस्यचित् पदार्थस्य कारणमिति न वदाम: । यथा सद्वस्तुनोऽन्यद् वस्त्वन्तरं परिकल्प्य पुन: तस्यैव प्रागुत्पत्ते: प्रध्वंसाच्चोर्ध्वं तार्किका असत्वं वदन्ति । तथास्माभि: कदाचिद् क्वचिदपि सद्वस्तुनोऽन्यद्वस्तु न परिकल्प्यते। यथा रज्जुरेव सर्पबुद्ध्या सर्प इत्यभिधीयते । लोके रज्जुविवेकदर्शिनां तु सर्पाभिधानबुद्धि: निवर्तते ।

तत: तेज असृजत् - "तस्माद्वा एतस्मादात्मन: आकाश: संभूत: , आकाशाद्वायु: वायोरग्निरग्नेराप: अद्भ्य: पृथिवी"इत्यादिश्रुत्यन्तरे आदौ आकाशस्य सृष्टि: श्रूयते । अत्र तृतीयं तेज: परमात्मना सृज्यते । कथं प्राथम्येन तेज: सृज्यते ? तत:

आकाशः इति विरुद्धमिति चेन्न । आकाशवायुसर्गानन्तरं तेजोऽसृजत इति कल्पना कर्तव्या । अथवा अविवक्षित इह सृष्टिक्रमः । इदं सर्वं सत्कार्यम् । अतः सदेकमेवाद्वितीयमिति विवक्षितमत्र। अत्र त्रिवृत्करणस्य विवक्षितत्वात् तेजोबन्नानामेव सृष्टिं ब्रूते । तस्मादाकाशादीनि भूतानि अपंचीकृतानि तन्मात्रपदप्रतिपाद्यानि जायन्ते। तत्र आकाशस्य गुणः शब्दः । शब्दस्पर्शौ वायोः। तेजसस्तु शब्दस्पर्शरूपाणि । अपां तु शब्दस्पर्शरूपरसाः । शब्दस्पर्शरूप-रसगन्धाः पृथिव्याः भवन्ति । वाक्-पाणि-पाद-पायु-उपस्थाख्यानि। एतानि कर्मेन्द्रियाणि आकाशादिभूतानां व्यस्तेभ्यः रजोऽंशेभ्यः क्रमेण पृथक् पृथक् जायन्ते । यथा रजोगुणप्रधानादाकाशाद्वाक्, रजोऽंशप्रधानात् वायोः, पाणिः, रजोऽंशप्रधानादग्नेः पादः, रजोऽंशप्रधाना-ज्जलात् वायुः, रजोऽंशप्रधानायाः पृथिव्याः उपस्था च जायन्ते। सत्त्वरजस्तमसां त्रिगुणानां सत्त्वेऽपि रजोऽंशस्याधिक्ये कर्मेन्द्रियाणि जायन्ते।

तत्र प्राणापानव्यानोदानसमानाख्याः पंचवायवः भवन्ति । तेषु ऊद्र्ध्वगमन-शीलो नासाग्रस्थायी वायुः प्राणः । अधोगमनशीलः मलापनयनव्यापारेण पायुः गुदम्, सर्वतः गमनवान् अखिलशरीरवर्तिवायुः व्यानः । ऊर्ध्वगमनवान् उत्क्रमण-शीलकण्ठस्थानवर्त्ती वायुः उदानः । शरीरमध्यगत अन्नपानादिसमीकरणकरः नाभिदेशस्थः समानः ।

"हृदिप्राणो गुदेऽपानः समानो नाभिमण्डले ।
उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः ।। इति ।

समीकरणं नाम पाककरणम् । पाकश्च रसरुधिरशुक्रपुरीषादिरूपेण परिणमते। सांख्यमते नाग-कूर्म-कुकुलदेवदत्तधनंजयाख्याः अन्येऽपि

पंचवायवः सन्तीति परिगणिताः । ते ते वायवः कथमत्र न गणिताः इति चेन्न । तेषां वायूनां प्राणादिषु पंचषु अन्तर्भावात्, न ते पृथगालोचनीयाः । तद्यथा - नागः उद्गिरणकरः। उद्गिरणस्य ऊर्ध्वमुखस्य वायोः क्रियारूपत्वात् उदाने नागस्यान्तर्भावः । उन्मीलनकरः कूर्मः। अङ्गचेष्टारूपत्वात् कूर्मस्य व्याने अन्तर्भावात्। बुभुक्षाकरः क्रुकुलः । रसादीनां पाकानन्तरमेव क्षुधा जायते। अतः समाने कृकलस्यान्तर्भावः । देवदत्तः जृम्भणकरः। जृम्भणस्य निद्रालस्याद्युत्पन्नस्य परम्परया उत्पादकत्वम् अपाने इति तस्य देवदत्तस्यापाने अन्तर्भावात् । पोषणकरः धनंजयः अन्नादीन् समीकृत्य रसादिरूपेणायं वायुः परिणमयति । अतः समाने एव धनंजयस्यान्तर्भावात् ।

एते प्राणादयः आकाशस्य रजोऽंशेभ्यः मिलितेभ्यः जायन्ते। इदं च प्राणादिपंचकं कर्मेन्द्रियैः सहितं सत् प्राणमयकोशो भवति । प्राणमयकोशे प्राणस्य प्रचुरत्वात् प्राणमयत्वम् । आत्मनः आच्छादकत्वात् चास्य कोषत्वं संगच्छते । रजोगुणः क्रियात्मको भवति । तस्मात् तज्जन्यं वायुपंचकम् अथवा प्राणादिपंचकं क्रियास्वरूपं भवति । वायुपंचकस्य वा प्राणादिपंचकस्य क्रियात्मकत्वमस्माभिः दृष्टम् । अतः प्राणादिपंचकस्य रजोऽंशकार्यत्वं निश्चीयते।

एतेषु विज्ञानमयमनोमयप्राणमयेषु कोशेषु त्रिषु ज्ञानशक्तिमान् कर्तृरूपः विज्ञानमयकोशो भवति । इच्छाशक्तिमान् करणरूपः मनोमयकोशो भवति। कार्यरूपः क्रियाशक्तिमान् प्राणमयकोशो भवति । एतेषां कर्तृकरणक्रिया-रूपत्वेन योग्यतां दृष्ट्वा विभागः

वृत्तः । अनेन ज्ञानेन्द्रियसहितः बुद्धिरूपः कर्त्ता मनोज्ञानेन्द्रियरूपकरणसाहायेन प्राणादिपंचके कर्मेन्द्रियपंचके च क्रियामुत्पादयति। एतत् कोषत्रयं मिलित्वा सूक्ष्मशरीरमुत्पादयति।

सूक्ष्मशरीरनिरूपणम्-

अत्रापि चराचरप्राणिमात्रस्य यावन्ति सन्ति सूक्ष्मशरीराणि तेषां एकबुद्धिविषयतया वनवद् जलराशिवद्वा समष्टिः । अनेकबुद्धिविषयतया जलवत् वनगतवृक्षवद्वा व्यष्टिरपि भवति । सूक्ष्मशरीरमिदं समष्ट्युपहित सर्वप्राणिलिङ्ग-शरीरेषु पुष्पेषु सूत्रमिवानुगतत्वात् ज्ञानेच्छाक्रियाशक्तिमत् कोषत्रयोपाधिसहितत्वात् च हिरण्यगर्भः सूत्रात्मा प्राणश्चेति कथ्यते । अस्य हिरण्यगर्भस्य सूत्रात्मकस्य इयं समष्टिः स्थूलप्रपंचापेक्षया सूक्ष्मत्वात् सूक्ष्मशरीरम्। विज्ञानमयमनोमयप्राणमय-कोशत्रयं विराड्रूपेणानुभूतस्थूल-प्रपंचविषयकजगद्वासनामयत्वात् स्वप्नः । अतः स्वप्नत्वात् सूक्ष्मत्वाच्चैव स्थूलशरीरलयस्थानमिति च कथ्यते ।

एतौ सूत्रात्मतैजसौ स्वप्नकाले कल्प्याभिः सूक्ष्माभिः मनोवृत्तिभिः वासना-मयान् शब्दस्पर्शरूपरसगन्धान् सूक्ष्मविषयान् अनुभवतः । यथा ईश्वरप्राज्ञौ सूक्ष्माभिः अज्ञानवृत्तिभिः आनन्दमनुभवतः, तथैव सूत्रात्मतैजसौ मनोवृत्तिभिः सूक्ष्माभिः आनन्दमनुभवतः - "प्रविविक्तभुक् तैजस" इति श्रुतेः ।

शब्दः आकाशे एव वर्तते । अर्थाच्छब्दस्याकाशमात्रगुणत्वं न संगच्छते। वाय्वादावपि शब्दस्योपलम्भो भवति । आकाशादुत्पन्नत्वात् वाय्वादावपि शब्द उपलभ्यते । अतः नोक्तदोषः। इदानीं भूतानि त्रिगुणमायाकार्याणि त्रिगुणानि भवन्ति।

एते सत्त्वरजस्तमो गुणाः भवन्ति । एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यन्ते।

सूक्ष्मशरीराणि लिङ्गशरीराणीत्यपि कथ्यन्ते । तेषु सप्तदश-अवयवाः सन्ति । लिंग्यते ज्ञाप्यते प्रत्यज्ञात्मसद्भावः एभिरिति लिङ्गानि, तानि शरीराणि लिङ्गशरीराणि । ते चावयवाः ज्ञानेन्द्रियपंचकं, बुद्धिमनसी, कर्मेन्द्रियपंचकं, वायुपंचकं चेति । तत्र पंचज्ञानेन्द्रियाणि श्रोत्र-त्वक्-चक्षु-जिह्वा-घ्राणाख्यानि। एतानि ज्ञानेन्द्रियाणि क्रमेण आकाशस्य सात्त्विकांशात् श्रोत्रं, वायोः सात्त्विकांशात् त्वक्, तेजसः सात्त्विकांशात् चक्षुः जलस्य सात्त्विकांशात् जिह्वा, पृथिव्याः सात्त्विकांशात् घ्राणं च पृथक् पृथक् व्यस्तेभ्यः एकैकस्मात् न तु मिलितेभ्यः उत्पद्यन्ते ।

"अहं ब्रह्मास्मि", "तत्त्वमसि" इत्यादिनिश्चयात्मिकान्तःकरणवृत्तिः बुद्धिरित्युच्यते । मनः संकल्पविकल्पात्मिका अन्तःकरणवृत्तिः । संकल्पश्च इदमित्थमेवेति विषयपरिच्छेदः । संकल्पात् विपर्ययः विकल्पः । अनेन संशयात्मिका अन्तःकरणवृत्तिः मनः इति सिद्धम् । अनयोः बुद्धिमनसोः चित्ताहंकारयोः अन्तर्भावः स्मरणात्मिकाऽन्तःकरणवृत्तिः चित्तम् । तस्य चित्तस्य बुद्धावन्तर्भावात् । अभिमाना-त्मिकान्तःकरणवृत्तिः अहंकारः । तस्याहंकारस्य मनसि अन्तर्भावात् । एते बुद्धि-मन-चित्ताहंकाराः मिलितेभ्यः आकाश-वायु-तेजो-जल-पृथिवीगतसात्त्विकांशेभ्यः उत्पद्यन्ते । एतेषां प्रकाशात्मकत्वात् सात्त्विकांशकार्यत्वम् । श्रोत्रादिभिः ज्ञानेन्द्रियैः सहिता बुद्धिः विज्ञानमयकोशो भवति । अयं विज्ञानमयकोशः कर्तृत्व-भोक्तृत्व-

सुखीत्व-दु:खीत्वाद्यभि-मानत्वेन इहलोकपरलोकगामी भवति । अयमेव व्यावहारिक: जीव: भवति। यत: सत्त्वगुणप्रधानम् अत: सत्त्वगुणांशेभ्य: जातम्। मन: श्रोत्रादिज्ञानेन्द्रियैरेव सहितं सत् मनोमयकोशो भवति ।

कर्मसाधनानि इन्द्रियाणि कर्मेन्द्रियाणि भवन्ति । तानि च अत्रापि समष्टिरूपस्य विज्ञानमयादिकोषत्रयस्य तदवच्छिन्नसूत्रात्मनश्च एवं व्यष्टिरूपस्य विज्ञानमयादिकोषत्रयस्य तदवच्छिन्नतैजसस्य च चेतनस्य च वनवृक्षयोश्च तदवच्छिन्नाकाशयोरिव जलाशयजलयोरिव तद्गतप्रतिबिम्बाकाशयोरिव वा भेद:। इत्थम् अपंचीकृतपंचभूतेभ्य: सूक्ष्मशरीरं जायते ।

स्थूलभूतनिरूपणम्-

अपंचीकृतपंचभूतेभ्य: सूक्ष्मप्रपंचस्योत्पत्तिरस्माभि: वर्णिता। अधुना पंचीकृतपंचमहाभूतेभ्य: स्थूलप्रपंचस्योत्पत्तिक्रम: निरूप्यते। पंचीकृतानि भूतानि स्थूलभूतानि उच्यन्ते ।

पंचीकरणप्रकार: -

आकाशादिपंचभूतेषु एकैकं भूतं द्विधा विधाय समं विभज्य, तेषु दशसु भागेषु सर्वेषां प्राथमिकान् पंचभागान् प्रत्येकं चतुर्धा समं विभज्य, तेषां चतुर्णां भागानां स्वस्य द्वितीयार्धं विहाय अन्यस्य भूतस्य द्वितीयार्धेषु एकैकं योजयेत् । एवमन्यत्रापि करणीयम् । अयमेव प्रकार: श्लोकरूपेण पंचदश्यामुक्त: -

"द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुन: ।
स्वस्वेतरद्वितीयांशेर्योजनात् पंच पंच ते ।। पंचदशी ।।

छान्दोग्योपनिषदि- "तासां त्रिवृतमेकैकं करवाणि" इति

त्रिवृत्करणश्रुत्या त्रिवृत्करणं प्रतिपादितं, न पंचीकरणमिति चेन्न । त्रिवृत्करणं च त्रयाणां तेजो वर्णानां भूतानाम् एकैकं द्विधा विभज्य अर्धत्रयमपि प्रत्येकं द्विधाविभज्य तत्तदर्धद्वयस्य स्वार्धपरित्यागेन अर्धान्तरे एकैकभागस्य संयोजनम् । अत: पंचीकरणस्य अप्रामाण्यं न भवति । "आत्मन: आकाश: संभूत:" इत्यादिश्रुत्या पंचानामपि भूतानां सृष्टिकथनात् त्रिवृत्करणं पंचीकरणस्योपलक्षणं भवति । "स्वबोधकत्वे सति स्वेतरबोधकत्वमुपलक्षणत्वम् । "वैशेष्यातद्वाद: तद्वाद:" इति न्यायेन पंचानां भूतानां पंचात्मकत्वे समानेऽपि आकाशादिभागानाम् आधिक्यादाकाशादिव्यपदेश: संभवति ।

पंचानामपि महाभूतानां पंचात्मकत्वे आकाशवाय्वोरपि रूपत्वमहत्वाभ्यां चाक्षुषत्वं स्यादिति न च वाच्यम् । रूपवत्त्वमहत्त्वयो: विद्यमानत्वेऽपि आकाशादि-भागस्य आधिक्येन तदुक्तत्वात् । अथवा-तदभिभवात् न चाक्षुषत्वापत्ति:। अत: पंचीकरणानन्तरम् आकाशे अव्यक्तरूपेण वर्तमान: अभिव्यज्यते शब्द: । वायौ शब्दस्पर्शौ, अग्नौ शब्दस्पर्शरूपाणि, अप्सु शब्दस्पर्शरूपरसा: । पृथिव्यां शब्दस्पर्शरूपरसगन्धा: उत्पद्यन्ते । पंचीकरणानङ्गीकारे आकाशवाय्वो: प्रत्यक्षं न स्यात् , प्रत्यक्षं प्रति कारणत्वात् ।

स्थूलप्रपंचस्योत्पत्ति: -

पंचीकृतेभ्य: एतेभ्य: पंचभूतेभ्य: भू-र्भुव:-स्व-र्मह-र्जन-स्तप:-सत्यमिति नामकानां क्रमश: अधोऽधो विद्यमानानां योजनया चतुर्दशलोकानां ब्रह्माण्डस्य तदनन्तरवर्तिचतुर्विधस्थूलशरीराणां, तेभ्य: उचितानामन्नानां पानीयानामन्येषां लेह्यादीनामुत्पत्तिर्भवति । चतुर्विधस्थूलशरीराणि तु जरायुजम्, अण्डजम्, उद्भिजं, स्वेदजं चेति।

तत्र जरायुभ्यो जातानि जरायुजानि, मनुष्यपशुप्रभृतीनि । जरायुर्नाम तत् चर्म यस्मिन् गर्भस्थशिशुः बद्धो भवति। अण्डेभ्यः जातानि अण्डजानि, पक्षिपन्नगादीनि । अण्डो नाम लोकप्रसिद्धः । कुकुटाण्डस्य सर्वत्र आपणे सामान्यतयोपलब्धेः। भूमिं उद्भिद्य जातानि उद्भिज्जानि, तृण-कक्ष-गुल्म-वृक्षादीनि। स्वेदेभ्यः जातानि स्वेदजानि, यूक-मशकादीनि । अत्र स्वेदशब्दः न केवलं घर्मोदकपरः, किन्तु स्विन्नतासम्पादक-जलपरः, तेन जलसंपृक्ते भूभागेऽपि मशकादीनां जन्म संभवति।

स्थूलप्रपंचनिरूपणम्-

अत्रापि चतुर्विदं स्थूलशरीरमिदं शरीरमिति एकबुद्धिविषयतया वनवत् जलाशयवद्वा समष्टिः । देवदत्तशरीरं यज्ञदत्तशरीरमिति अनेकबुद्धिविषयतया वृक्षवत् जलवद्वा व्यष्टिरपि भवति ।

स्थूलशरीरसमष्ट्युपहितं चैतन्यं वैश्वानरः विराट् इति चोच्यते। विश्वे नराः अस्य इत्यस्मिन्नर्थे विश्वशब्दः सर्वशब्दस्य पर्यायवाचको भवति । अनेन सर्वनराभिमानित्वात् वैश्वानर इति । विविधं राजमानत्वाद्विराट् इति । पूर्णत्वात् पुरुष इति चोच्यते ।

एतेषां चतुर्विधशरीराणां या व्यष्टिः तत्तद् शरीरव्यक्तिः तदुपहितं चैतन्यं विश्व इत्युच्यते । सूक्ष्मशरीराभिमानमपरित्यज्य स्थूलशरीरेषु प्रविश्य तत्तद् स्थूलशरीरेषु सर्वेषु "अहमस्मि" इत्यभिमानित्वात्, सर्वशब्दस्य पर्यायतया विश्व इति नाम लभते ।

अस्य विश्वस्यैषा व्यष्टिः स्थूलशरीरम् । अन्नविकारत्वादेव हेतोः अन्नमयकोशः । स्थूलभोगायतनत्वात् जाग्रदित्यप्युच्यते ।

जाग्रदवस्थायामेतौ विश्ववैश्वानरौ दिङ्नियन्त्रितेन श्रोत्रेण शब्दं,

वायुनियन्त्रितेन त्वचा स्पर्शं, सूर्यनियन्त्रितेन नेत्रेण रूपं, वरुणनियन्त्रितेन रसनेन्द्रिय-द्वारा रसम्, अश्विभिः नियन्त्रितेन घ्राणेन गन्धं, अग्निनियन्त्रितेन वाचा वचनम्, इन्द्रियनियन्त्रितेन पाणिना ग्रहणम्, उपेन्द्रनियन्त्रितेन पादेन गमनं, यमनियन्त्रितेन पायुना त्यागं, प्रजापतिनियन्त्रितेनोपस्थेन्द्रियेणानन्दं, चन्द्रनियन्त्रितेनान्तरिन्द्रियेन मनसः संकल्पं, चतुर्मुखेन ब्रह्मणा नियन्त्रितेना-न्तरिन्द्रियेण बुद्ध्या निश्चयं, शंकरनियन्त्रितेन अन्तरिन्द्रियेनाहंकारेण अहंकारं, विष्णुनियन्त्रितेन चित्तेन च स्थूलविषयम् अनुभवतः - "जागरितस्थानो बहिः प्रज्ञः" इति श्रुतेः ।

विश्ववैश्वानरयोरभेदप्रतिपादनम् -

इहापि स्थूलव्यष्टिसमष्ट्योः तदुपहितविश्ववैश्वानरयोश्च वनवत् वनावच्छिन्नाकाशवत् वृक्षवत् वृक्षावच्छिन्नाकाशवद्वा जलवत्तद्गतप्रतिबिम्बा-काशवद्वा अभेदः । एवं पंचीकृतेभ्यः पंचमहाभूतेभ्यः स्थूलभूतानां तत्प्रपंचस्य चोत्पत्तिः जायते ।

पादटिप्पणी

१. छा. उ. २-३ ।

२. तै. उ. १-२-६ ।

३. बृ. उ. १-२-४ ।

तृतीयोऽध्यायः

चार्वाकमते सृष्टिः

समग्रस्य प्रपंचस्य सृष्टिस्थितिलयकर्ता सर्वज्ञः सर्वशक्तिमान् सर्वव्यापकः परमात्मेति साम्प्रदायिकाः । एतादृशमलौकिकसत्पदार्थं जगत्कारणमिति चार्वाकाः नाभ्युपगच्छन्ति । पदार्थयथार्थनिर्णयः शब्दप्रमाणैः जायत इति साम्प्रदायिकानां सिद्धान्तः । तस्माद् वेदान् तद्ज्ञानं च निराकुर्वन्ति चार्वाकाः । समग्ररूपोऽयं प्रपंचः एकस्मिन्नेव समये जातः इत्यत्र नास्ति तेषां विश्वासः । पृथिव्यप्तेजोवायूनां मूलभूतानां सृष्टिः न केनापि कृता । एतानि भूतानि स्वतः सिद्धानि । पश्चात् दृश्यमाणमिदं जगत् ततः जातमिति तेषामभिप्रायः।

अग्निरुष्णो जलं शीतं समस्पर्शस्तथानिलः ।
तेनेदं चित्रितं तस्मात् स्वभावात् तद्व्यवस्थितिः[१] ।।

इति । सर्वे पदार्थाः जायन्ते स्थितिं लभन्ते नश्यन्ति च । अतः प्रपंचे वर्तमानाः सर्वेऽपि पदार्थाः नश्यन्ते । ततः परं किमपि नावशिष्यते इत्येतेषामभिप्रायः। तस्मात् भौतिकनाम्ना स्वाभाविकनाम्ना वा एते चार्वाकाः प्रसिद्धाः । मनुष्यः म्रियते भूयः प्रतिनिवर्तते । अतः सुखेन जीवनं यापनीयम् ।

यावज्जीवेत् सुखं जीवेत् ऋणं कृत्वा घृतं पिबेत् ।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः[२] ।।

इति । शरीररूपेण संघटिताः भौतिकपदार्थाः सर्वेऽपि मरणानन्तरं स्वस्वमूलभूतेषु लीयन्ते । मानवस्य स्मृतयः दुःखानि वेदनाः अनुभवाश्च

सर्वे यावज्जीवमर्थात् मनुष्यस्य जीवनकाले एव भवन्ति । मानवमरणानन्तरं एते सर्वेऽपि अनुभवाः नश्यन्ति । एतेषां सर्वेषामप्यनुभवानाम् आधारः मनः । तच्च मनः भौतिकपदार्थातीतं न भवति । तस्यापि मनसः भौतिकपदार्थजन्यत्वात् भौतिकपदार्थैः सह नाश्यत्वात् तन्मनः नित्यं नास्ति । मूलपदार्थानां सृष्ट्यर्थं न कस्यापि पदार्थस्यावश्यकत्वमस्ति। अथवा शक्तेरावश्यकत्वमेते स्वीकुर्वन्ति । पृथिवी-जल-तेज-वायु-नामकानि भूतानि स्वभावतः अनेकभूतानाम् उत्पत्तये कारणानि भवन्ति । अयं च भूतानां स्वभावः। यथा- भूतानां लक्षणानि स्वभावसिद्धानि, तथा तेषां परिणामोऽपि नैसर्गिकः। नियतरूपेण प्रकृतेः परिणामः । यथाविधिचलनं प्रकृतेः स्वभावः । मयूराणां विभिन्नवर्णानां वर्णाः प्रकृत्या जनिताः । कोकिलानां कूजनमपि प्रकृतिसिद्धम्। तथाचोक्तम्-

शिखिनश्चित्रयेत् को वा कोकिलान् कः प्रकूजयेत् ।
स्वभावव्यतिरेकेण विद्यते नात्र कारणम् ।।

विविधवर्णैः कुसुमानि अलंकृतानि भवन्ति । एतानि लक्षणानि प्राथमिकभौतिकपदार्थेषु दृश्यन्ते । तेषां भौतिकपदार्थानां सम्मिश्रणेन एतादृशं वैविध्यं वैचित्र्यं च संभवति । ताम्बूलसेवनेन मुखे रक्तत्वमवलोक्यते । तच्च रक्तत्वं ताम्बूलगतपदार्थेषु न दृश्यते । अनेन प्रकारेण चतुर्भ्यः भूतेभ्यः सर्वोऽपि प्रपंचः जायते । रूपरहितत्वादाकाश इन्द्रियगोचरो न भवति । तस्मात् आकाशनामकं भूतं मूलभूतेषु न गण्यते । प्रकृतिपदार्थानां स्वभावः संघटनञ्च ज्ञानरूपेणैतैः स्वीक्रियते।

बौद्धमतानुसारं सृष्टिः -

अद्यतनप्रमुखधर्मेषु बौद्धधर्मः अन्यतमः । अत्यन्तसनातनोऽयं धर्मः । अस्य मतस्य प्रवर्तकः गौतमबुद्धः । आत्माश्रयदृक्पथमधिगम्य चारित्रकपथि यद्यस्माकं गमनं स्यात् तदैवास्य धर्मस्य स्वरूपं सम्यक् ज्ञातुं शक्यते । अनेकदेशगत-सांस्कृतिकभौगोलिकव्यवस्थां च प्राप्य विशिष्टं स्वरूपं धारयति। सम्प्रति बौद्धधर्मः बुद्धतत्त्वं परित्यज्य ह्रासत्वमुपगतः ।

स्थूलरूपेण यदि पश्यामः तदा त्रयः बुद्धाः दृष्टिगोचराः भवन्ति। १- पौराणिकबुद्धः, २- प्रामाणिकबुद्धः, ३- चारित्रिकबुद्धः चेति। पुराणेषु उपलभ्यमानः बुद्धः पौराणिकः । निदानकथायां ललितविस्तरे बुद्धचरिते अन्यत्र संस्कृतग्रन्थेषु जातककथासु चोपलभ्यमानः बुद्धः प्रामाणिकः। त्रिपिटकग्रन्थेषु-पलभ्यमानः बुद्धः चारित्रिकः ।

जम्बुद्वीपे वज्जीवनं माल्लानां चेतिनमित्या-दिषोडशराज्यान्यासन्निति ललितविस्तरे लिखितमस्ति[३]। तत्राष्टराजवंशीयानां प्रसक्तिः वर्तते। तेषु शक्यवंशोऽन्यतमः। तत्र शक्यवंशे शुद्धोधनः प्रसिद्धः । तस्य स्त्रियः संज्ञा मायादेवी। तयोः पुत्रः गौतमः । सः लुम्बिनी उद्याने जन्मालभत्[४] । आबाल्यात् ध्याने समाधौ च सर्वदा एकाग्रमनः आसीत् गौतमः[५] । युक्तवयस्काय स्वपुत्राय कयाचित् कन्यया सह विवाहं कृतवान् । गौतमः एकोनविंशतितमे वर्षे गृहं परित्यज्य तपः कर्तुं वनं जगाम । तत्र षड्त्रिंशत्वत्सरे सिद्धिं प्राप्य बुद्धत्वं प्राप्तवान् । तस्मात् सिद्धिदिनादारभ्य चतुःचत्वारिंशत् वर्षाणि प्रव्राज्य

त्रिनवत्युत्तरचतुःशततमे वर्षे सिद्धिमगात् ।

प्राकृतप्रतीच्यसमुत्पादे द्वादशाङ्गाः भवन्ति । तत्र सृष्टिविषये एवं वर्णितमस्ति। तथा हि-

१-२- अविद्यातः संस्काराः सिध्यन्तो । "अविद्याप्रत्यये संस्काराः[६]" ।

२-३- संस्कारात् विज्ञानं जायते । "संस्कारप्रत्यये विज्ञानम्"[७] ।

३-४- विज्ञानयोः नामरूपयोः उत्पत्तिः "विज्ञानप्रत्यये नामरूपम्[८]" ।

४-५- नामरूपाभ्यां षडायतनानामुत्पत्तिः । "नामरूपे षडायतनम्"[९] ।

५-६- स्पर्शात् वेदनस्योत्पत्तिः "स्पर्शप्रत्यये वेदना"[१०] ।

७-८- वेदनायाः तृष्णा अजायत "वेदनाप्रत्यये तृष्णा[११]" ।

८-९- तृष्णायाः उपादानस्य सिद्धिः "तृष्णाप्रत्यये उपादानम्"[१२] ।

९-१०- उपादानात् भवस्योत्पत्तिः "उपादानप्रत्यये भवः"[१३] ।

१०-११- भवात् जन्मसिद्धिः "भवप्रत्यये जातिः"[१४] ।

११-१२- जन्मात् मरणस्य प्राप्तिः "जातिप्रत्यये मरणम्"[१५] ।

अमुं प्रतीच्यसमुत्पादसिद्धान्तं बुद्धः बोधिध्रुमछायायां मननमकरोत्। प्रतीच्यसमुत्पादः अनुलोमद्वारा विव्रियते चेत् प्रतिलोमेन दुःखनिरोधः स्यादिति सूचयामास ।

बुद्धस्य चत्वारः शिष्या आसन् । ते स्वस्वमतानुसारेण सृष्टिं प्रतिपादयामासुः।

वैभाषिकः -

वैभाषिकोऽयं सर्वास्तित्ववादी । अभिधर्मकोषविभाषां व्याख्यामङ्गी-कृतवन्त इति एते वैभाषिकाः । भौतिकप्रपंचः यथार्थः।

स च प्रपंचः प्रत्यक्षेण गृह्यते । विना प्रत्यक्षेण व्याप्तेरनुमानस्य वा प्रसक्तिरेव नास्ति। पदार्थानां स्थितिः चतुर्धा भवति । १- सृष्टिः, २- स्थितिः, ३- क्षीणः, ४- विनाशः चेति ।

गुणरत्नः ब्रवीति- एते चत्वारः दृग्गोचरशाश्वताशाश्वतपदार्थान् सृजन्तीति वसुबन्धः विवृणोति । पुद्गलस्यप्येते चत्वारः गुणाः भवन्ति। रूपरसगन्धस्पर्शानां मूलद्रव्यमेव पुद्गलम् । बौद्धानां पुद्गलपदार्थः पृथिव्या सह समान इति पण्डितानामभिप्रायः । अस्य पुद्गलस्य संघातांशाः परमाणवः। परमाणुः अत्यन्तसूक्ष्मपदार्थः । अविभाज्योऽयं परमाणुः । परमाणुः इन्द्रियग्राह्यो न भवति। परमाणुरनित्यः । द्विप्रकारः परमाणुः । द्रव्यपरिमाणवः संघातपरमाणवश्च । द्रव्यपरमाणवः अतिसूक्ष्माः शक्तिकेन्द्रभूताः संघटितपरमाणवः । परमाणु-षट्केरेकस्याणोः उत्पत्तिः । अणुः दृग्गोचरः । एते षड्विधाः परमाणवः गुच्छरूपेण समुत्पद्यन्ते । तेषु कश्चन परमाणुः केन्द्रभूतः। तस्य परितोऽन्ये चक्राकारेण संघटिताः भवन्ति । बाह्यपदार्थाः सर्वेऽपि स्वसामर्थ्यानुसारेण संघटिताः भवन्ति । अतः महाभूतेषु वर्तमानाः सर्वेऽपि गुणाः अत्र परमाणुषु वर्तन्ते ।

एते सर्वेऽपि पदार्थाः त्रिष्वपि कालेषु भवन्ति । मनसा एते पदार्थाः गृह्यन्ते। अतः वस्तुजन्यं ज्ञानं मनोजन्यं न भवति । किन्तु आविष्कारः । दृश्यपदार्थाः दर्शनकाले एव भवन्ति । एते क्षणिकाः। अणुसंघातोऽपि क्षणिकः। सर्वमपि वस्तु क्षणचतुष्टयमवतिष्ठते ।

एते वैभाषिकाः पृथिव्यप्तेजोवायुभूतानि चत्वारि स्वीकुर्वन्ति। आकाशं नाङ्गीकुर्वन्ति । एकस्यैव वस्तुनः कारणावस्था कार्यावस्थेति अवस्थाद्वयमङ्गी-कुर्वन्ति। एताः अवस्थाः क्षणिकाः किन्तु द्रव्यं सर्वदा

भवति। यथा हिमवाष्पा-वस्थाद्वयमेकस्यैव जलस्य भवति तद्वत् प्रकृतेऽपि ।

सौत्रान्तिकः -

एते सूत्रपिटकं प्रमाणमिति ब्रुवन्ति । तस्मादेते सौत्रान्तिकाः। संक्रान्तिवादिन इत्यपि नामान्तरमेतेषामस्ति । काश्यपैरयं वादः वर्धितः । एते बाह्यप्रपंचं यथार्थं ब्रुवन्ति । अयं च प्रपंचः सद्रूपः । किन्तु अप्रत्यक्षः। अनुमानजन्योऽयं प्रपंचः । ज्ञानेन्द्रियाणि मानसिकप्रत्ययानामाधारभूतानि । बाह्यप्रपंचस्य विषयान् संगृह्य सचेष्टानि भवन्ति । मानसिकप्रपंचभावानुगुणेन बाह्यप्रपंचोऽनुमीयते। मानसिकभावानाधारीकृत्य बाह्याः पदार्थाः एते अनुमीयन्ते। अतः भावानुमेयवादिनः इमे ।

चत्वारः उपाधयः बाह्यप्रपंचज्ञानं मनसि स्थापयितुं सहायकाः भवन्ति। एतेषाम् उपाधीनामभावे मनसः सत्त्वेऽपि नैव जायते ज्ञानम्। बाह्याकारविशिष्ट-पदार्थेन विना ज्ञानं नैव जायते । स च बाह्यपदार्थः आलम्बनम्। संकेतग्रहणार्थं चेतनमते बाह्यपदार्थस्यावश्यकत्वमस्ति। अयमेव समानान्तरः। ज्ञाननयनार्थं तत्स्वभावनिर्देशकं ज्ञानेन्द्रियमावश्यकम् । अयमेवाधिपतिः । एतेषां सर्वेषामस्तित्वे सत्वेऽपि समयप्रकाशादीनामभावे ज्ञानं नैव जायते । एते उपाधयः सहकारिप्रत्ययाः। एतेषां सर्वेषां सत्त्वे पदार्थज्ञानं भवति । एतादृशं ज्ञानमङ्गीकुर्वन्तीति कृत्वा एते औपाधिकाः द्वैतिनः इति व्यवह्रियन्ते।

आत्मनः नित्यत्वं सौत्रान्तिकाः नाङ्गीकुर्वन्ति । पंचस्कन्धस्वरूपमङ्गी-कुर्वन्तीति तत्र भवतां श्रीमतां गुणरत्नमहोदयानामाशयः। पुनर्जन्महेतवः पंचस्कन्धाः।

भूतभविष्यत्कालादिः अयथार्थ इति । संघातपदार्थाः सर्वेऽपि क्षणिकाः। सर्वेऽपि संस्काराः क्षणकालवर्तिनः । रूपरसगन्धस्पर्शाणवः प्रतिक्षणं नश्यन्ति । अन्येषां मते यदात्मस्वरूपं तदेव सौत्रान्तिकमते पुद्गलरूपम्।

वर्तमानमभ्युपगच्छन्ति सौत्रान्तिकाः । वर्तमानकालमूलपदार्थाना-मस्तित्वं भूतकाले फलदायीति मूलपदार्थास्तित्वमेव यथार्थमित्येतेषामनुभवः। भविष्यत्पदार्थान्, फलितार्थं, भूतकालपदार्थां श्चैते तिरस्कुर्वन्ति ।

योगाचारः -

योगाचारमतस्य प्रवर्तकः मैत्रेयः । असङ्गवसुबन्धुदिङ्नागप्रभृतयः अस्यां शाखायामन्तर्भवन्ति । इमां शाखामसङ्गो योगाचारनाम्नाभिहितवान् । गौतमप्राप्त-संबोधियोगद्वारेणैवैतत्साध्यमिति चिन्तितत्वादेते योगाचाराः । वा "योगाचारभूमि-शास्त्रेणासङ्गविरचितेन योगाचार इति नाम आगतं स्यात् । बौद्धेतरशाखिनः एनां योगाचारनाम्ना व्यवहरन्ति । वसुबन्धुः अमुमेव वादं विज्ञानवादनाम्नाभिहितवान्। विज्ञानमेव यथार्थमित्थं विश्वसति । विमर्शनात्मकविश्लेषणपद्धतिं योगाचाराः अनुसरन्तिस्म। अनयैव दृष्ट्या आत्मादीन् पदार्थान् विश्लिष्य भावनाप्रधानं भाववादं वर्द्धितवन्तः ।

सौत्रान्तिकानां भावानुमेयवादपरिणाम एव योगाचाराणाम् आत्माश्रय-भाववादः । अनेन वादेन पदार्थान् ज्ञातुं नैव प्रभवामः किन्तु कल्पयितुं शक्नुमः। अनेन सर्वोऽपि बाह्यप्रपंचः कल्पित इत्यवगम्यते । बाह्यप्रपंचास्तित्वस्वीकारेऽपि तत्साक्षात्प्रत्यक्षं नैव भवेत् । अतः अस्माकं भावानां मूलं किमिति कदापि ज्ञातुं नैव

शक्यते । भावानां कारणं बाह्यपदार्थ इति वक्तुं नैव शक्यते । मनः स्वयमेवानेकान् भावान् संसृजति । मनसि विद्यमानभावानुगुणपदार्थानामभावात् बाह्यप्रपंचे मनः एवं कल्पयतीति चिन्तनीयम्। इत्थं योगाचाराः बाह्यपदार्थयथार्थस्वरूपं तिरस्कृत्य भावानामेव यथार्थत्वमङ्गीचक्रुः । अनेकभावानां संघटितं रूपं मनः। अतः तत्सत्यम् । यथा मनुष्यः स्वप्नपदार्थाननुभवति तथा बाह्यपदार्थाननुभवति । वादममुं समर्थयितुं चत्वारः अंशाः तैः प्रदर्शिताः ।

१- मनुष्यः स्वप्नं पश्यति । स्वप्नगताः पदार्थाः बाह्यप्रपंचे न स्युः इत्यत्र नास्ति प्रमाणम् । मनोगतभावाः अनुभाविकप्रपंचे वर्तन्त इत्यनुचिन्तनमेव स्वप्नः । अतः यथार्थाः भावाः ।

२- वस्त्वपेक्षया ज्ञानमन्यत्, इति निरूपयितुं न शक्यते। अतः भौतिकपदार्थयाथार्थ्यं निर्धारयितुं न शक्यते । पदार्थनीलगुणयोः तादात्म्यसम्बन्धो वर्तते । द्रव्यगुणयोः सम्बन्धः समवायसम्बन्धः । तयोः पृथक्त्वं न संभवति। अनेनैव प्रकारेण भौतिकप्रपंचः ज्ञातव्यः। तस्माद्विज्ञानं सर्वमपि मनोजन्यमेव। पदार्थज्ञानयोः भेदः ज्ञातुं नैव शक्यते । यथा भेददृष्टिः चन्द्रद्वयमिति मन्यते, तद्वत् प्रकृतेऽपि । अर्थात् अनयोः भेदोऽपि भ्रान्त्या भवति ।

३- वस्तुनः ज्ञानानन्तरं तत्स्थितिरस्माभिः ज्ञायते । तच्च वस्तु निरपेक्षमिति वक्तुं नैव शक्यते । वस्तुविज्ञानयोः कश्चन सम्बन्धो वर्तते । भावपदार्थाः सर्वदा संघटिताः समुपलभ्यन्ते । अतः तयोः स्वरूपमन्यदिति निर्धारयितुं न शक्यते। एतौ द्वावपि एकस्यैव पदार्थस्यावस्थाविशेषाविति।

४- सर्वोऽपि मनुष्यः बाह्यपदार्थं पृथक् पृथक् पश्यति। अथवा एकस्य मानवस्य विभिन्नेषु समयेषु विभिन्नप्रकारेण बाह्यपदार्थाः दृश्यन्ते । पदार्थाः यथार्थाः यदि स्युः यदि वा स्पष्टं लक्षणं स्यात् सर्वदा सर्वेषामेकरूपेण दृष्टिपथमायात् । अतः बाह्यपदार्थाः यथार्थाः न भवन्ति ।

इत्थं भावानां यथार्थत्वमङ्गीकृत्यान्यत् सर्वं सापेक्षमिति योगाचारः विवदति। अयं विषयद्वयं विस्मृतवान् इति वक्तव्यम् । एकस्य पदार्थस्यानुभवः सर्वेषां एकप्रकारः स्यात् । अतः सर्वेषामनुभवाः विभिन्नाः वक्तुं नैव शक्यन्ते। अनुभवः वस्त्वाश्रयो न भवति । ते चानुभवाः व्यक्तेः मानसिकप्रभावैरत्यन्तं प्रभाविताः भवन्ति । अनेन योगाचारमते त्रुटिरस्तीति ज्ञातुं शक्यते । बाह्यपदार्थाः यदि यथार्थाः स्युः तत्र दोषाः वर्तन्त इति योगाचारमतम् । यदि बाह्यपदार्थः सत्यः तर्हि एकेनैवाणुना पदार्थः जायेत । अथवाणुसंघातैरणुः सूक्ष्मो भवति । तस्मात् ते प्रत्यक्षयोग्याः न भवन्ति। अणुसमूहस्य ज्ञानं सर्वेषु विभागेषु एकस्मादेव स्यात्तथा न भवति । पृथग्रूपेण तत्संघातो ग्रहीतुमपि न शक्यः। अणोः सूक्ष्मत्वादणुसंघातोऽपि सूक्ष्मः। एवं बाह्यपदार्थाङ्गीकारेऽपि तत्सिद्धेरनिरूप्यत्वात् तेषां भावा एव यथार्था इति स्वीकारे न कोऽपि दोषः ।

प्रतिक्षणं पदार्थः भिद्यते । अर्थात् प्रत्येकस्मिन् क्षणे पदार्थः पृथक् पृथक् भवति । अत एक एव पदार्थः क्षणद्वयं स्थातुं न प्रभवति। भावनाद्वारा पदार्थानाम् अस्तित्वं ज्ञातव्यम् ।

योगाचारभाववादः आत्माश्रयभाववाद इति कथ्यते ।

आत्माश्रये ये दोषाः ते सर्वेऽपि दोषा योगाचारमते वर्तन्ते । चराचरप्रपंचे भावः एव यथार्थः । अतः मानवः स्वाभीष्टानुसारेण पदार्थान् सृजति। आवश्यकपरिणामपुरस्सरं स्वानुकूलं सर्वं मनुष्याः किमर्थं न सृजन्ति ? नास्य प्रश्नस्योत्तरं योगाचारमते वर्तते । योगाचारवादः न ज्ञानं जनयति नवानुभवं प्रयच्छतीति योगाचाराः वदन्ति । अन्येषां मते यदात्मस्वरूपं तदेव मनः इति व्यवहरन्ति । मनः प्रतिक्षणं परिवर्तते । मनोगतकुत्सितभावानां निरोधः नियतजीवनेन संभवति। यद्येवं न स्यात् मनसि अनेके विचाराः भवन्ति । तैः प्रभावितास्सन्तः संसारे निमज्जिताः भवन्ति । सर्वेषां धर्माणां मूलमालयविज्ञानम् । तदेव अत्युत्तमं ज्ञानम् । कामादीन् विजित्य पुद्गलनैरात्म्यमधिगम्य ज्ञेयावरणनिरोधेन धर्मनैरात्म्यं सम्पादनीयम् । एतद् नैरात्म्यद्वयं निर्वाणप्राप्तये हेतुः ।

परिकल्पितं ज्ञानं, परतन्त्रं ज्ञानम्, परिनिष्पन्नं ज्ञानम् इति ज्ञाने अंशत्रयं भेदत्रयं वा योगाचारा अङ्गीकुर्वन्ति । परिमितज्ञानेन सह भौतिकज्ञानस्य सम्बन्धो नास्ति । कारणोपाधिना लब्धं ज्ञानं परतन्त्रज्ञानम् । अस्य ज्ञानस्य सोपाधिकत्वात् मनुष्यजीवने उपयुज्यते। परिकल्पितपरतन्त्रे ज्ञाने संवृतरूपे स्तः । परिनिष्पन्नस्य ज्ञानस्य पारमार्थिकं सत्यत्वमङ्गीक्रियते ।

माध्यमिकाः -

शाश्वतवाद-उच्छेदवादयोः मध्यमार्गमिति यैऽवलम्बिताः ते माध्यमिकाः। सर्वेऽपि पदार्थाः संसारान्तर्गताः नित्याः शाश्वताश्चेति पदार्थनित्यत्ववादिनां मतम्। उच्छेदवादिनः जगतोऽनित्यत्वं प्रतिपादयन्ति। एतेभ्यः वादेभ्यः सत्यस्य निष्कर्षः न भवतीति विचार्य

प्रतीत्यसमुत्पादसिद्धान्तं गौतमः प्रतिपादयामास । प्रपंचान्तर्गताः पदार्थाः न सत्याः नवासत्याः किन्तु प्रतिक्षणं परिवर्तनशीलाः । परिवर्तनशीलत्वादेते पदार्थाः नित्याः न भवन्ति। परिवर्तनमपि नित्यमिति वक्तुं न शक्यते । जगति एतादृशः परिणामः अत्यन्तसहजः। यं कमप्युपाधिमाश्रित्य सर्वा अपि घटनाः संभवन्ति। प्रतिक्षणं प्रादुर्भूतसंघटनसादृश्यं विलोक्य तत्तेषां तादात्म्यमिति भ्रमः जायते । प्रतीत्यसमुत्पातवादेनोत्पन्नसहजस्वभावं विशदीकृत्य विरोधिभावानां समन्वयं कृत्वा मध्येमार्गं गौतमः अवलंबितवान् । तमेव मार्गं माध्यमिकाः सयुक्तिकं समन्वितवन्तः ।

प्रतीत्यसमुत्पादवादः तर्केण तर्कयित्वा समर्थनीयः । सद्वादं माध्यमिक-वादमिति प्रतिपादितवन्तः । अमुमेव सद्वादं शून्यमिति शून्यवादिनः प्रकटयामासुः।

अयं च शून्यवादः माध्यमिकवादः बौद्धतात्त्विकचिन्तनधारायां चरमावस्थाविशेषो भवति ।आचार्यनागार्जुनः वादममुं सुशिक्षितरूपेण निरूपयामास। ख्रीष्टोः प्रथमद्वितीयशतके बौद्धमतमुन्नतं स्थानं प्राप्य स्वसिद्धान्तजनितालोकप्रसारेण प्रचारेण च जगतः कल्याणमकरोत्। माध्यमिकवादस्य नागार्जुनप्रणीतमाध्यमिक-कारिकाः प्रमाणभूताः भवन्ति । आर्यदेव-बुद्धपालित-भावविवेक-चन्द्रकीर्ति-शान्तिदेवप्रभृतयः माध्यमिकवादं सम्यक् वर्द्धितवन्तः । ख्रीष्टोः प्रथमशतके माध्यमिकवादः प्राङ्गिकवादः स्वतन्त्रवादश्चेति द्वेधा विभक्तः । ख्रीष्टोः अष्टमशतक-पर्यन्तं माध्यमिकवादः सम्यक् प्रसिद्धिमगात् ।

किं च युक्त्या परिशील्यमाने माध्यमिकवादः बौद्धमते तर्केण

पोषित इति ज्ञायते । वैभाषिकाः बाह्याभ्यन्तरपदार्थानङ्गीकुर्वन्तीति द्वैतिनोऽभूवन् । बाह्यपदार्थयाथार्थ्यस्वरूपं भावैः सह ज्ञातव्यमिति विशदीकृत्य भावानुमेयवादं प्रतिपाद्य कमप्यानुगुण्यं सौत्रान्तिकाः अङ्गीचक्रुः । भावाः यथार्थाः इत्यङ्गीकृत्य बाह्यप्रपंचो नित्य इति निरूप्य तं भावं मनाधीनं कृत्वा योगाचाराः आत्माश्रयवाद प्रतिष्ठापितवन्तः । भावपदार्थयोर्मध्ये अविनाभावसम्बन्धो वर्तत इति कृत्वा भावस्यैव याथार्थ्यमङ्गीचकार योगाचारः । अमुमेवार्थं तर्केण परिशीलितवन्तः माध्यमिकाः। यदि भावपदार्थयोः अविनाभावसम्बन्धः, यदि तत्र पदार्थः भ्रमः तदनुगुणेन भावोऽपि भ्रमः स्यात् । अयं च भावः न कदापि यथार्थः स्यात् । अतः पदार्थः भ्रमः तदनुगुणेन भावोऽपि भ्रमः स्यात् । अयं च भावः न कदापि यथार्थः स्यात् । अतः पदार्थः भ्रमः, भावोऽपि भ्रमः । तस्माच्छून्यमिति माध्यमिकानां मतम् ।

माध्यमिकवादे लक्ष्यद्वयं वर्तते । प्रपंचसत्यत्वमङ्गीकृत्य वादोपवादैः सद्रूपं ज्ञातमिति भ्रमेण भवचक्रे कथं पतन्तीति विशदीकरणं प्रथमं लक्ष्यं भवति, जननमरणाभ्यां ज्ञानोदयेन च्युतिरेव द्वितीयं लक्ष्यम्। निर्वाणव्यतिरिक्तं सर्वं भ्रमः। ज्ञानोदयपर्यन्तं सर्वस्य सत्यत्वं दृष्टिगोचरं भवति । संवृतसत्यं पारमार्थिकसत्यं चेति शून्यवादिनो द्विविधसत्यत्वं स्वीकुर्वन्ति ।

अनुभवजन्यः भौतिकप्रपंचः मायया प्रतीयते । अत्र न कोऽपि सत्पदार्थः वर्तते । प्रतिक्षणं पदार्थाः परिवर्तनशीलाः भवन्ति । पदार्थैः सहानुभवोऽपि वर्तते। उपाधिप्रभावैः पदार्थानां स्वभावेष्वपि परिवर्तनं दृश्यते । प्रतीत्यसमुत्पादसिद्धान्तोऽपि अमुमेव सत्यं प्रकटयति । न

कोऽपि पदार्थः नित्य इति एषः सिद्धान्तः प्रतिपादयति। प्रत्येकोऽपि पदार्थः अन्यमाश्रित्य कथं जीवतीति विशदीकरोति । तस्मात् न कोऽपि पदार्थः अपरिवर्तनशीलः। अतः न कस्यापि पदार्थस्य शाश्वतगुणो भवति । एतदेव नित्यभावत्वमुच्यते। न किमपि लक्षणं पदार्थस्य वर्तते, इत्यपि वक्तुं न शक्यते । पदार्थानां भ्रमत्वात् तल्लक्षणानुभवानां भ्रमत्वम् ।

सर्वत्र पदार्थेषु पंचस्कन्धाः भवन्ति । विध्यात्मकरूपेण निषेधात्मकरूपेण वा निर्वाणं वर्णयितुं न शक्यते । प्रापंचिकप्रवृत्तेः निर्गमनमेव निर्वाणम् । निर्वाणप्रयासोऽपि अविद्येति ब्रुवन्ति । इत्थमनुभवजन्यं सर्वं भ्रमाकलितमिति माध्यमिकाः । एतत्सर्वं संवृतमिति अर्थात् संवृतसत्यमिति उच्यते । संवृतसत्यत्वपक्षे पदार्थाः सद्रूपेण दृश्यन्ते । पारमार्थिकदृष्ट्या एते असत्याः भवन्ति । भौतिकपदार्थाः तज्जन्यानुभवाश्चायथार्था इति माध्यमिकाः नैव भाषन्ते किन्तु पारमार्थिकाः न भवन्तीति तेषामाशयः । संवृतसत्यदृष्ट्या तु पारमार्थिकसत्यमनिर्वाच्यं भवति । एतैरनुभवैः पारमार्थिकसत्यत्वं नैव ज्ञातुं शक्यते । अतः तद्दृष्ट्या शून्यमित्युच्यते । तेन प्रापंचिकयथार्थाः सापेक्षाः भवन्ति । निरपेक्षसत्यत्वमनिर्वचनीयत्वमत्यङ्गीकर्त्तव्यम्। द्वन्द्वतर्कविधानेन समन्वितोऽयं सद्वादः विध्यात्मकनिषेधात्मकवर्णनाभ्यामतीतः ।

सम्यक् सम्बोधिद्वारा प्रापंचिकसीमाधिगमनमेव निर्वाणम् । इयमपि काचिदवस्था तैरभ्युपगम्यते । इयं चावस्थानिर्वचनीया । वास्तविकदृष्ट्या परिशील्यमाने सति अयं च शून्यवादः दृग्गोचरप्रपंचातीतयथार्थत्वं बोधयति।

पारमार्थिकसत्यं वचनैः विशदीकर्तुं नैव शक्यते । एकत्र वर्तमानाः पदार्थाः अन्यत्र विलोक्यन्ते चेत्तद्वस्तुनः चलनमभूदित्युच्यते। प्रतिक्षणं ते च पदार्थाः कुत्रचित् स्थलविशेषे दृश्यन्ते । अर्थात् तत्र चलनराहित्यमवगम्यते। प्रपंचगतसर्वेऽपि पदार्थाः सापेक्षाः न तु सद्रूपाः। परिमितपरिधौ पारमार्थिकं सत्यं न तिष्ठति । अमुमभिप्रायं ज्ञातुं संवृतसत्याधिगमः कर्तव्यः । इत्थं बुद्धान्तर्गततार्किकदृष्टिं माध्यमिकाः वर्द्धयन्ति स्म । इयं च तार्किकदृष्टिः भारतीयदर्शनेषु स्वप्रभावं प्रदर्शयति।

पादटिप्पणी

१. सर्वदर्शनसंग्रहः ।

२. सर्वदर्शनसंग्रहः ।

३. आद्यब्रह्मणद्वितीयप्रहरार्धे श्वेतवराहकल्पे, वैवश्वतमन्वन्तरे, कलियुगे प्रथमपादे, जम्बुद्वीपे भारतवर्षे मेरोः दक्षिणभागे........ ।
संकल्पनामकपौराणिकग्रन्थाः ।

४. गौतम एव सिद्धार्थ इति त्रिपिटकवाङ्मये लिखितमस्ति ।

५. एकस्मिन् दिने बीणावादनोत्सवे- गौतमं परित्यज्यान्ये सदस्याः उत्सवं द्रष्टुमागच्छन् । तत्र गौतमः समाधिस्थो बभूव । ततः समागत्य बालकं दृष्ट्वा सर्वे आश्चर्यचकिताः अभवन् । एवमनेकाः कथाः दृश्यन्ते ।

६. अविज्ज पच्चया सखारा ।

७. सखार पच्चया विज्ञानम् ।

८. विज्ञान पच्चया नामरूपम् ।

९. षडायत पच्चया फस्से ।

१०. फस्स पच्चया वेदना ।

११. वेदना पच्चया तणहा ।

१२. तणहा पच्चया उपादानम् ।

१३. उपादानपच्चया वभव ।

१४. भव पच्चया जातिः ।

१५. जाति पच्चया मरणं शोकम् । परिदेवणं दोर्मनस्य संभवन्ति ।।

●●●

चतुर्थोऽध्यायः

न्यायवैशेषिकदर्शनयोः सामान्यं स्वरूपम्

प्रमाणैरर्थपरीक्षणं न्यायः । पदार्थयथार्थज्ञानमनेन जायते । प्रमाणैः पदार्थाः निरूप्यन्ते । अत एवोक्तं वार्तिककारैः -

"नीयते प्राप्यते यथार्थज्ञानं येन स न्यायः" इति । "समस्तप्रमाण-व्यापाराद् अर्थावगतिः" न्यायः । परिशीलनदृष्ट्या विषयाः तर्क्यन्ते इति तर्कः । बुद्ध्या यज्जातं तत्सर्वं न्यायमतमिति सूत्रकाराणामभिप्रायः । तथा च न्यायसूत्रम्- "बुद्ध्योत्पन्नं तत् सर्वं न्यायमतम्" ।

न्यायदृक्पथं तार्किकयथार्थस्वरूपम् । अत्र सहेतुकविमर्शैः यथार्थ-स्वरूपविशेषैः निरूप्यते । वैशेषिकदर्शनं समस्तदर्शनानाम् उपकारकमिति स्मर्यते। तथा च सूक्तिः - "कणादं पाणिनीयं च सर्वशास्त्रोपकारकम्" ।

न्यायवैशेषिकाणां सिद्धान्तानां समन्वयः प्राचीनकालाद् आरब्धः । उद्योतकरस्य न्यायवार्तिकटीकासमये अयं च समन्वयः परिसमाप्तः । वात्स्यायनस्य न्यायभाष्येऽपि अनयोः सिद्धान्तयोरैक्यं दृश्यते । न्यायवैशेषिकसिद्धान्ताः परस्परं पूरकाः भवन्ति । न्यायदर्शनस्थितिप्रामाणानि वैशेषिकदर्शनेनाङ्गीकृतानि । वैशेषिकाणां सप्तपदार्थाः नैयायिकैः अभ्युपगताः। आत्मनः विषये ईश्वरविषये अणुजगद्विषये चानयोः दर्शनयोः सिद्धान्ताः अभिन्नाः वर्तन्ते । भावसमैक्यदृष्ट्या समन्वयदृष्ट्या वानयोः दर्शनयोरेकत्वं दृश्यते । अतः न्यायवैशेषिकदर्शनि समन्वयदर्शनि युगलदर्शनि वेति प्रसिद्धिः।

सृष्टिः -

परमाणवः प्रपंचोत्पत्तेः कारणमिति मतमणुवादिनाम् । न्यायवैशेषिक-दर्शनानुसारं परमाणवः जडपदार्थाः । ईश्वरः जडेषु अणुषु संचलनं कारयतीति न्यायवैशेषिकसिद्धान्तः । बहुसंख्याकानां जीवात्मनां पूर्वजन्मकृतानि पुण्यपापफलानि निमित्तीकृत्येश्वरः परमाणुषु परिस्पन्दनं कारयति । अनेन परिस्पन्दनेन परमाणवः प्रपंचस्योत्पत्तेः हेतवः भवन्ति । परमाणवः नित्याः । अतः ईश्वरः तान् न सृजति। किन्तु पदार्थसृष्ट्यनुकूलसंचलनमीश्वरः करोति। अनेन प्रकारेण जीवात्मनो जन्म लब्ध्वा कर्मानुसारेण सुखदुःखान्यनुभूय कर्माण्यनुष्ठाय कर्त्तुरुपाः एते भोक्तृत्वं भजन्ते । जाते हि स्थूलकार्ये तेन परमाण्वाद्यनुमानं, तस्मिन् सति द्व्यणुकादिक्रमेण स्थूलोत्पत्तिः इति क्रमः ।

ईश्वरस्वरूपम् -

अनेकेषु जीवेषु परमात्मा ईश्वर एक एव। अयं चेश्वरः नित्यः सर्वगतश्च। ज्ञानादिगुणाः सर्वदा जीवात्मनि न भवन्ति । एते गुणाः परमात्मनि ईश्वरे सदा भवन्ति । अयं चेश्वरः सर्वज्ञः दोषरहितः पूर्णश्च । ईश्वरं गौतमः सूत्रयामास। यथा प्रशस्तपादवात्स्यायनाद्याचार्याः ईश्वरास्तित्वं स्वीकृतवन्तः । ईश्वरविषये केचन हेतवः उदयनाचार्यैः सूचिताः । एते वादाः सहेतुकाः । तथा हि-

१- अयं च प्रपंचः परमाणुभ्यः उत्पन्नः कार्यरूपेण वर्तते । प्रत्येकस्य कार्यस्य कारणं किमपि स्यात् । यथा घटादीनां कारणं कुलालः, तद्वत् नामरूपाभ्यां व्याकृतस्यानेकस्थानोपबृंहितस्य प्रतिनियतदेशकालव्यवस्थितस्य जगतः कारणम् ईश्वरं विनान्यः न

कोऽपि भवितुमर्हति । ईश्वरः जगतः निमित्तकारणम् । परमाणवः जगतः उपादानकारणम् समवायिकारणं वा । अयम् एव कार्यकारणवादः ।

२- विशाले प्रपंचे कश्चन क्रमः परिलक्ष्यते । अयं च परस्पर निरपेक्ष्यवस्तुसमुदायानां समूहः । अत्र कश्चन विशिष्टः सम्बन्धविशेषः वर्तते। सूर्यचन्द्रादयः परिनिष्ठितकक्षायां भ्रमन्ते । एतादृशस्य प्रपंचस्य निर्माता कश्चित् प्रज्ञासम्पन्नः आलोचनाशक्तिविशिष्ठश्च भवेत् । अयमेवेश्वरः सर्वनियन्ता सर्वकर्ता च स्यात् ।

३- भौतिकप्रपंचे यादृशः क्रमः दृश्यते नैमिकप्रपंचे तादृश एव क्रमोऽवलोक्यते । जीवानां पुण्यपापानुसारेण धर्माधर्मेभ्यः अनेकानि शरीराणि प्राणिनः प्राप्नुवन्ति । ईश्वरः प्राणिनां कर्मानुसारं फलं प्रददाति । तत्रेश्वरस्य स्वातन्त्र्यं नास्ति । अस्माकं प्रयासेन यद् प्राप्तं तदेवादृष्टमित्युच्यते । दृष्टातिरिक्तादृष्टशक्ति-रेवादृष्टमिति निगद्यते। तच्चादृष्टं जडम् । तं जडं शक्तिप्रदानेन फलप्रदं करोति ईश्वरः । तस्मादीश्वरः कर्माध्यक्षः कर्मफलदाता च ।

४- उदयनाचार्यः एतावत्पर्यन्तं समन्वयरूपहेतून् प्रदर्श्य सम्प्रति व्यतिरेकहेतूनीश्वरास्तित्वे दर्शयामास । तद्यथा- न किमपि प्रमाणं ईश्वरेऽभावं निरूपयितुं शक्नुयात् । एतावत्पर्यन्तं प्रमाणानि ईश्वरास्तित्वमयथार्थमिति नैव प्रतिपादयामासुः । अत्र मते ईश्वरास्तित्वं युक्त्या प्रतिपादितम् । सृष्टिस्थितिलय-कारणमीश्वरः । श्रुत्या ईश्वरास्तित्वं नैव प्रतिपादितम् । तर्केणेवेश्वरास्तित्वमुपपादितम्।

सांख्यमते सृष्टिः -

प्रकृतिः - प्रकरोतीति प्रकृतिः । अर्थात् कार्यसाधनं प्रकर्षेण करोतीति प्रकृतिः, अथवा सर्वेभ्यः पदार्थेभ्यः व्यापारेभ्यो वा प्राक् आसीदिति प्रकृतिः । प्रपंचे वर्तमानानां सर्वेषामपि पदार्थानामाधारः प्रकृतिः । अतः प्रधानमित्यपि नाम संगच्छते । यद्यपि सर्वोऽपि प्रपंचः प्रकृतितः जायते । परन्तु प्रकृतिः अव्यक्तरूपेण अथवा सूक्ष्मरूपेण वर्तते । अनेन प्रकृतिप्रपंचयोः समानत्वमिति न चिन्तनीयम् । विश्वासातीतः पदार्थः प्रकृतिः । कार्यरूपेण दृश्यमाणेषु सर्वेषु पदार्थेषु प्रकृतिः वर्तते । प्रकृतेः कारणान्तरं नास्ति । सृष्ट्यादयः प्रकृतेः अंशाः भवन्ति । उत्पन्नस्य पदार्थस्य विनाशः निश्चितः । किन्तु प्रकृतेः उत्पत्तिः विनाशो वा नास्ति । परिणामरहितदशायां प्रकृतिः स्वतन्त्रा भवति । प्रकृतेः स्वरूपं सहेतुकं सांख्याः प्रतिपादितवन्तः । तथा हि- प्रपंचे वर्तमानं सर्वमपि वस्तु परिच्छिन्नमस्वतन्त्रं च भवति । एतेषां परिमितानां पदार्थानां स्वतन्त्रेणापरिमितेन कारणेन भवितव्यम् । सैव प्रकृतिः ।

सर्वत्र पदार्थेषु केचन सर्वसामान्यगुणाः दृश्यन्ते । एतेषां सर्व सामान्यगुणानां किमपि कारणं स्यात्, तदेव प्रकृतिः ।

सृष्टिस्थितिलयाः उत्पन्नेषु सर्वेषु पदार्थेषु दरीदृश्यन्ते । एतेषां सृष्ट्यादीनां कारणं किमपि वर्तत इत्यवगम्यते। परिणामरूपेण वर्तमानं सूक्ष्मकारणमेव प्रकृतिः।

जगत्येकत्वं स्पष्टं प्रतिभाति । अत्यल्परूपादारभ्यात्यन्ताधिकतम-रूपपर्यन्तं जगति विनाशः दृश्यते । उत्पन्नेषु पदार्थेषु वृद्ध्यादिकमवलोक्यते। अनेन कारणेन सर्वोऽपि प्रपंचः प्रकृतेः परिणामविशेषः इति वक्तुं शक्यते । शून्यात् न किमपि पदार्थः

जायते। अतः प्रत्येकस्य वस्तुनः किमपि कारणं स्यात् । सर्वेऽपि पदार्थः उत्पद्यत इति कृत्वाऽन्यस्मात् कार्यम् उत्पद्यत इति । तस्मात् वस्तुनः पदार्थान्तरं जायत इति । स च पदार्थः कारणम् । कारणे यादृशं सामर्थ्यं दृश्यते तादृशमेव सामर्थ्यं कार्येऽपि भवेत् । कार्यं कारणसमसत्ताकम् । कदाचित् कार्याद् अधिक-सत्ताकत्वं स्यात्कारणे। अतः जगतः कारणभूतस्य प्रधानस्य सत्त्वं प्रपंचसत्तया समानं स्यात् अथवाधिकं वा भवेत् । जगतः कारणं प्रधानं भवति। अतः प्रकृतेः सामर्थ्याधिक्य-मङ्गीकर्त्तव्यम् । चार्वाकाभ्युपगतपदार्थस्य सांख्यप्रतिपादितप्रधानस्य चैक्यमिति न कदापि चिन्तनीयम् । प्रधानं पुरुषो वा नैव जायते । सर्वशक्तिसमन्वितं वस्तु भौतिकवादिनां कारणम् । सांख्यप्रतिपादितायाः प्रकृतेः परिणामाङ्गी-कारेणान्तर्गतं किमपि प्रयोजनमस्ति । भौतिकवादान् शास्त्रीयदृष्ट्या समर्थितवन्तः। किन्तु सांख्या तात्त्विकदृष्ट्या प्रधानमवर्णयन् ।

सरूपपरिणामः -

सरूपपरिणामदशायां सत्त्वरजस्तमोगुणाः मिश्रिताः परस्परं न भवन्ति। किन्तु सर्वेऽपि गुणाः सर्वस्मिन् परिणाममाना अर्थात् सत्त्वगुणाः सत्त्वे, रजोगुणाः रजसि, तमोगुणाः तमसि च परिणममानाश्च भवन्ति । शुद्धाः एते गुणाः परस्पर-विरोधरूपं प्राप्य साम्यावस्थायां भवन्ति । अस्यां दशायां सर्वेऽपि गुणा अव्यक्ताः भवन्ति ।

विरूपपरिणामः –

अत्रैते त्रयो गुणाः विषमक्रमेण परस्परं मिश्रिताः पदार्थान् उत्पादयन्ति। एते सूक्ष्मपदार्थाः विभिन्नांशैः तत्र तत्र सम्मिश्रितत्वात् तत्तद्वस्तु जायते । यत्र वस्तुनि यो गुणः आधिक्येन भवति तत्र तस्य

प्राधान्यम् । अन्यद्गुणद्वयं निक्षिप्तरूपेण स्वास्तित्वं प्रकटयति । रजस्तमोभ्यां सत्त्वगुणस्य यद्याधिक्यं तदानीं बुद्धिः जायते। सा च बुद्धिः सत्त्वगुणप्रधाना । गुणादेकस्मात् न कोऽपि वस्तु जायते। वस्तुनः उत्पत्तौ गुणाः परस्परं सहाय्यामाचरन्ति । अर्थात् सर्वेऽपि गुणाः मिलित्वा पदार्थमुत्पादयन्ति । यद्यप्येते गुणाः परस्परं मिलित्वा पदार्थं जनयन्ति तथापि एते निजां स्थितिं लभन्ते । दृग्विषयेषु या शक्तिः वर्तते सा रजोगुणजन्या । निरोधजडतादयः तमसा जायन्ते। कदाचित् कस्यचिद्गुणस्य यद्यप्याधिक्यं दृश्यते तथापि स गुणः स्वभावं नैव जहाति । अतः पदार्थपरिणामात् गुणेषु विकारः नैव जायते ।

प्रकृतेः परिणामक्रमः -

सरूपपरिणामः प्रलय इति, विरूपपरिणामः सृष्टिरिति पूर्वमस्माभिः प्रतिपादितम् । निष्क्रियवत्वात्पुरुषस्य विश्वक्रियाकर्तृत्वं नैव संभवति । प्रकृतेः जायमानस्य प्रपंचस्य केवलं प्रकृतिरेव कारणमित्यपि वक्तुं नैव शक्यते। प्रकृतिः पुरुषो वा स्वतन्त्ररूपेण जगतः कारणं न भवति । विरुद्धस्वभावप्रकृतिपुरुषाभ्यामयं प्रपंचः जातः । अनयोः सम्पर्केण प्रकृतौ कश्चन परिणामः संभवति । प्रकृतिपुरुषयोः संयोगवियोगाभ्यां सृष्ट्यादिकं जायत इति सांख्यानां मतम् । किन्तु ईश्वरसंकल्पात् सृष्टिप्रलयौ संभवतः इति योगमतावलम्बिनः आमनन्ति । अर्थात् प्रकृतिपुरुषयोः संयोगात् ईश्वरप्रभावाद्वा संसारः जायते । प्रकृतेः सर्वाः क्रियाः ईश्वरप्रभाविताः अथवा पुरुषप्रभाविताः । प्रकृतिपुरुषयोः सम्बन्धः अयस्कान्तायसोरिव, अथवा पङ्ग्वन्धयोरिव सम्बन्ध इति सदृष्टान्तं सांख्याः प्रतिपादयन्ति । तथाप्यं सम्बन्धः संतृप्तिजनको न भवति ।

सर्वत्र द्वैतसिद्धान्तेषु समस्येयं दरीदृश्यते । पुरुषेच्छानुसारेण प्रकृतिः परिणमते इत्युक्त्वा ततः उपर्युक्तां समस्यां समाधातुं प्रयत्नमकुर्वन्। तथापि ते नाशक्नन् । अनेन पुरुषस्य प्राधान्यं जातम् । किन्तु प्रकृतिपरिणामान् दृष्ट्वा संतोषमनुभवितुं पुरुषः आवश्यकः । विवेकं प्राप्य पुरुषः कैवल्यप्राप्त्यर्थं प्रकृतिं नानुसरति । प्रकृतिपुरुषयोः सम्बन्धाः सहेतुकाः न भवन्तीति अनेकैः शास्त्रकारैः सांख्यमताभिप्रायः दूषितः । प्रकृतिपरिणामः सांख्यैरित्थं वर्णितः ।

सरूपपरिणामावस्थायां गुणत्रयेषु वैरुध्यमुपलक्ष्यते । तथापि तन्मध्ये साम्यावस्था संभवति । पुरुषसम्बन्धात् साम्यावस्थायाः भङ्गः। ततः गतिशीलस्य रजोगुणस्य प्रभावः दृश्यते । अनेन गुणेषु साम्यसम्पादनार्थं तत्र भीषणसंघर्षो जायते। अतः त्रिगुणेषु वैशम्यं समैक्यं च क्रमेण जायते । त्रिगुणानां भिन्ननिष्पत्तिसमाहारेभ्यः परिणामः संजायते । प्रकृतिपरिणामः क्रमेण संभवति । वैशाम्याद् यद्येकस्य गुणस्याधिक्यं स्यात्तदा तद्गुणस्य प्राधान्यसमुच्चयौ जायेते । गुणगतभेदात् नवीनपरिणामः भवति । एकस्यां दशायां वर्तमानाः समुच्चयाः द्वितीयदशायां न परिणमन्ते । द्वितीयदशाया-मावश्यकसमुच्चयानामाविर्भावः प्रकृतेः प्रथमदशातः जायते। द्वितीयदशायां वर्तमानाः केचन समुच्चयाः तृतीयां दशां प्राप्नुवन्ति। अनेन प्रकारेण प्रकृतिः सर्वासु दशासु अनुवर्तते । यद्यपि सर्वस्यापि जगतः मूलकारणँ प्रकृतिः तथापि क्रमेण तत् प्रभावः सर्वत्रानुवर्तते। अयमेव क्रमपरिणाम इत्युच्यते। अयं क्रमपरिणामः प्रकृतिपरिणामो वा पदार्थानाम् अभिवृद्धये भवति । भौतिकरसायनिकजैविकमानसिकपरिणामाः क्रमपरिणामे अन्तर्भवन्ति।

सत्त्वगुणप्रकृतेः महद् अर्थात् बुद्धिर्जायते । व्यष्टिबुद्धयः स्वस्वाविद्या-प्रभावैः सह महत्तत्त्वतः पुरुषान् प्राप्नुवन्ति । अतः बुद्धितत्त्वमेतदित्युच्यते । सर्वस्यापि जगतः कारणमिति कृत्वा महदिति व्यवह्रियते । स्थूलरूपस्य परिणामस्य कारणमिति कृत्वा महदिति सार्थकं नाम । बुद्धिपुरुषयोर्भेदो वर्तते । योग्यबुद्धिः पुरुषसन्निधिमनुभूय प्रभाविताः भूत्वा चेतनरूपेण प्रज्ञारूपेण च विलोक्यते । ततः पुरुषाधीने च कार्यं करोति । शुद्धसात्त्विकदशायां बुद्धेः अशक्ति-अधर्म-अज्ञानलक्षणानि संभवन्ति । सर्वभौतिकप्रक्रियाणां बुद्धेः आधारत्वम् । शोधननिर्णयादिकं बुद्धेः वैशिष्ट्यं कर्म । मन इन्द्रियाणि च बुद्ध्यधीनं कर्म कुर्वन्ति ।

अहंकारः प्रकृतेः द्वितीयः परिणामः । अयं चाहंकारः महत्तत्त्वतः जायते । अहं ममेत्यनुभवः अहंकारात् जायते । अस्मादेव कारणाज्जीवस्य कर्त्तुत्व- भोक्तृत्वादयः गुणाः संभवन्ति । अहंकारदृष्ट्या यदि प्रापंचिकवस्तूनि यदि पश्यति तदा सर्वेऽपि पुरुषनिमित्ताः परिणामाः इति ज्ञायन्ते ।

अहंकारः त्रिविधः । रजोप्रधानोऽहंकारः प्रथमः । द्वितीयः तमोगुणप्रधानो-ऽहंकारः । सत्त्वगुणप्रदानस्याहंकारस्य वैकारिकमित्युच्यते । रजोगुणप्रधानमहंकारं तैजसमिति, तमोप्रधानमिति तमोऽहंकारमिति वा भूतादिरिति च व्यवह्रियते । वैकारिकांकारात् एकादशेन्द्रियाणि जायन्ते । भूतादितः पंचतन्मात्राणि

उत्पद्यन्ते। तैजसाहंकारः अवशिष्टाणां शक्तिप्रदायकः। वैकारिकात् पंचज्ञानेन्द्रियाणि (त्वक्-चक्षु-श्रोत्र-घ्राणरसनेन्द्रियाणि) पंचकर्मेन्द्रियाणि (वाक्-पाद-पायु-पाणि-उपस्थाख्यानि) जायन्ते । एतैः सहान्तरिन्द्रियं मनः समुत्पद्यते । मनः अवयवी भवति । अतः सर्वैः सहेन्द्रियैः सम्पर्कमेकस्मिन् काले स्थापयति । ज्ञानकर्मेन्द्रिय-लक्षणानि मनसो भवन्ति। बुद्धिमन अहंकाराः आन्तारिककारणानि । त्वक्चक्षुरादीन्द्रियाणि बाह्यकरणानि। प्राणप्रक्रियाः उच्छ्वासनिश्वासः अन्तःकरणाधीनाः भवन्ति ।

रूपरसगन्धशब्दस्पर्शाः तन्मात्रशब्देनोच्यन्ते । एतान्यत्यन्तसूक्ष्माणि। अतः इन्द्रियगोचराणि न भवन्ति । अनुमानप्रमाणेन केवलं तेषां स्वरूपज्ञानं भवति । शब्दतन्मात्रादाकाशः जायते । स्पर्शतन्मात्रं शब्देन सह वायुं, शब्दस्पर्शाभ्यां रूपतन्मात्रं तेजः, शब्दस्पर्शरूपैः रसतन्मात्रं जलम्, शब्दस्पर्शरूपरसैः गन्धतन्मात्रं पृथिवीं चोत्पाद्यन्ते । पञ्चभूतानां पृथिव्यादीनां गन्धरसरूपस्पर्शशब्दरूपेण प्रत्येकं लक्षणानि भवन्ति । चतुर्विंशति तत्त्वानां मेलनेन सृष्टिर्भवति । चतुर्विंशति तत्त्वेषु आदितत्त्वं भवति प्रकृतिः । अन्यतत्त्वानि पंचमहाभूतानि । प्रकृतिपरिणामः यान्त्रिकसदृशो न भवति । इयं च प्रकृतिः पुरुषप्रयोजनानुसारेण परिणमते । चतुर्विंशति तत्त्वानां स्थितिः पट्टिकाद्वारा विशदीक्रियते।

तथा हि-

- प्रकृतिः
  - महतत्त्वम्
    - अहंकारः
      - वैकारिकोऽहंकारः
        - मनः
        - ज्ञानेन्द्रियाणि
        - कर्मेन्द्रियाणि
      - भूताद्यहंकारः
        - तन्मात्राणि
          - पंचभूतानि

योगदर्शनम्-

"सांख्ययोगौ पृथग्बाला प्रवदन्ति न पण्डिताः" अनेन सांख्ययोगा-वभिन्नाविति ज्ञायते । सांख्यदर्शनं सेश्वरनिरीश्वरभेदेन द्विविधम् । योगदर्शनं पातंजलिकालादारभ्य ईश्वरतत्त्वमङ्गीकरोति। आचरणात्मकप्रयोजनानि मनसि निधाय ईश्वरमङ्गीकुर्वन्ति । न तु तात्त्विकसमस्यानां परिष्कार ईश्वर इति । योगाङ्गेषु नियमोऽन्यतमः। नियमेषु ईश्वरप्रणिधानम् अन्यतमम् । ध्यानादीनां भक्तिः उत्तमं साधनम्। योगभाष्यकारादयः ईश्वरस्वभावस्वरूपविषयेषु मीमांसाम् अकुर्वन्। अतो योगदर्शनम् ईश्वरे सैद्धान्तिकाचरणात्मिकां श्रद्धां प्रदर्शयति । पुरुषस्थित-गुणादोषातीतः ईश्वरः । ईश्वरः परमपुरुषः, नित्यः, सर्वव्यापकः, सर्वशक्तिसमन्वितः, सर्वज्ञः, सर्वगतश्चेति । क्लेशादिकर्मफलानि पुरुषस्यैव भवन्ति । ईश्वरस्तु कर्मफलातीतः।

क्लेशकर्मरहितोऽपि मुक्तपुरुषः दोषरहितो न कदापि भवेत् । क्लेशकर्मफलातीतः सम्पूर्ण ईश्वर एकैव भवति । स्वसंकल्पबलात् भगवान् सर्वेश्वरः अनन्तशक्तिसमन्वितः विश्वव्यापारं निर्वहति। सर्वशक्तिमान् ईश्वरः पुरुषेभ्यः भिन्नः।

परमात्माऽस्तित्वं वेदा उररीकुर्वन्ति । सत्स्वरूपः परमात्मैव विश्वस्य गम्यस्थानमिति प्रतिपादयन्ति । अतः ईश्वरः जगत्सृष्टिस्थितिलयकर्त्ता वर्तत इति निश्चीयते । प्रकृतिपुरुषयोः संयोगवियोगाभ्यां सृष्टिप्रलयाः जायन्ते । प्राणिनां पुण्यपापानुसारेण प्रकृतिपुरुषयोः संयोगादिकम् उत्पद्यते । प्राणिनामदृष्टं प्रकृतिं नियन्तुं न समर्थम् । तस्मादीश्वरास्थित्वमनिवार्यम् आवश्यको भवति। स एवेश्वरः प्रकृतिपुरुषयोः संयोगादिकं विभजति । ईश्वरसंकल्पाज्जायमान-परिणामे प्रलये वा जीवप्रयोजनानि प्रस्फुटितानि भवन्ति । जीवानां कर्मफलं तत्तत्प्राणिनः यथा प्राप्नुयुः तथा प्रकृतिः परिणमते । ईश्वरनियन्त्रितेन प्रधानेनेयं सृष्टिः पुरुषभोगाय प्रवर्तते । योगदर्शने न प्रकृतिं न वा पुरुषं स्त्रष्टुं समर्थोऽयमीश्वरः ईश्वरः । प्रकृतिपुरुषयोः विनाशः न कदापि भवति । ईश्वरः अनयोः सहकारिकारणं निमित्तकारणं च भवति इति ।

पञ्चमोऽध्यायः

आयुर्वेदे भूतस्थितिः

सर्वं द्रव्यं पांचभौतिकम् । पृथिव्यादिभिः पंचभिः भूतैः मिलितैः आरब्धं द्रव्यम् । यद्यपि भूतात्ममनःकालदिशां कारणानां द्रव्यशब्देन ग्रहणं भवति तथाप्यस्मिन् द्रव्यगुणाधिकारे द्रव्यशब्देन औषधाहारोपयोगीनि पांचभौतिकानि "गुडुची" गोधुमादीनि कार्यद्रव्याण्येवाभिप्रेतानि ।

पृथिव्याः लिङ्गं कठिनत्वमथवा खरत्वम् । द्रवत्वं जलस्य लिङ्गम् । चलत्वं वायोर्लिङ्गम् । तेजसोर्लिङ्गमुष्णत्वम् । अप्रतिघातत्वमथवास्पर्शवत्व-माकाशस्य लिङ्गम् ।

।। भूतानामसाधारणगुणाः ।।

आकाशस्य गुणः	वायुगुणः	अग्निगुणः	जलगुणः	पृथिवीगुणः
शब्दः	स्पर्शः	रूपम्	रसः	गन्धः

<u>भूतानामसाधारणभूतान्तरानुप्रवेशकृताश्च गुणाः -</u>

आकाशस्य गुणः	वायुगुणौ	अग्निगुणाः	जलगुणाः	पृथिव्याः गुणाः
शब्दः	शब्दस्पर्शौ	शब्दस्पर्शरूपाणि	शब्दस्पर्श-रुपरसाः	शब्दस्पर्शरूप-रसगन्धाः

भावमिश्रमतेन भूतानां गुणाः -

आकाशस्य गुणः	वायुगुणः	अग्निगुणः	जलगुणः	पृथिव्याः गुणः
लघुः	गुरुः	स्निग्धः	रुक्षः	तीक्ष्णः

पार्थिवादिपांचभौतिकद्रव्यगुणाः (कार्यद्रव्यगुणाः) -

पार्थिवद्रव्यं गुरुः । अपद्रव्यं द्रवम् । आग्नेयद्रव्यमुष्णम् । वायव्यद्रव्यं लघु भवति । मृदु भवति नभसद्रव्यम् । पृथिवीद्रव्यं पुनः कठिनं, मन्दं, स्थिरं, सान्द्रं, कठिनं, स्थूलं, अधोगतिस्वभावं गन्धबहुलं च भवति ।

अपद्रव्यं भूयः स्निग्धं, शीतं, मन्दं, मृदु, स्तिमितं, सरं, रसबहुलं च विलोक्यते ।

तैजसः स्वरूपं पुनः तीक्ष्णं, सूक्ष्मं, लघु, रुक्षं, खरं, ऊर्ध्वगतिस्वभावं रसबाहुल्यं च दृश्यते ।

वायव्यद्रव्यं पुनः शीतं, खरं, विशदं, विकाशि, व्यवायि, स्पर्शबहुलं च ज्ञायते ।

नभसद्रव्यं भूयः लघु, सूक्ष्मं, श्लक्ष्णं, व्यवायि, अव्यक्तरसं, शब्दबहुलं, च विज्ञायते ।

पार्थिवादिद्रव्यरसाः

पार्थिवद्रव्यम्	अपद्रव्यम्	आग्नेयद्रव्यम्	वायव्यद्रव्यम्	आकाशद्रव्यम्
ईषत्कषायम्	ईषत्कषायाम्ल-लवणम्	ईषदम्ललवणम्	ईषत्तिक्तम्	अव्यक्तरसम्
प्रायशो मधुरम्	प्रायशो मधुरम्		प्रायशः कटुकम्	विशेषतः कषायम्

।। पार्थिवादिपांचभौतिकद्रव्यविपाकाः ।।

पार्थिवद्रव्यविपाकः	अपद्रव्यविपाकः	आग्नेयद्रव्यविपाकः	वायव्यविपाकः
गुरुः	गुरुः	लघुः	लघुः

नभसद्रव्यविपाकः

लघुः

पार्थिवादिपांचभौतिकद्रव्यकर्माणि

पार्थिवद्रव्यकर्म	अपद्रव्यकर्म	आग्नेयद्रव्यकर्म	वायव्यद्रव्यकर्म	आकाशद्रव्यकर्म
अपचय:	क्लेदनं	दहनं	विसक्षणं	मार्दवं
संघात:	स्नहनं	पचनं	ग्लपनं	सैपिर्यं
गौरवं	बन्धनं	प्रभा	विचारणं	लाघवं
स्थैर्यं	निष्यन्दनं	प्रकाशनं	वैशघं	विवरणं
बलं	मार्दवं	दर्शनं	लाघवं	-
अधोगमनं	प्रह्लादनं	तापनं	शैत्यम्	-

।। गुणाः ।।

वैशेषिकगुणा:	शारीरगुणा:	अध्यात्मगुणा:	सामान्यगुणा:	महागुणा:
शब्द:	गुरु:	बुद्धि:	परत्वं	सत्त्वं
स्पर्श:	लघु:	इच्छा	अपरत्वं	रज:
रूपं	शीत:	द्वेष:	चुक्ति:	तम:
रस:	उष्ण:	सुखं	संख्या	-
गन्ध:	स्निग्ध:	दु:खं	संयोग:	-
-	रुक्ष:	प्रयत्न:	विभाग:	-
-	मन्द:	मनोरथ:	पृथक्त्वं	-
-	तीक्ष्ण:		परिमाणं	
-	स्थिर:		संस्कार:	
-	सर:		अभ्यास:	
-	मृदु:		-	-

रसानां गुणतारतम्यम्

शीता: (सौम्या: रसा:)	उष्णा: (आग्नेयरसा:)	गुरवो रसा:
मधुर: (उत्तम:)	आम्ल: (मध्यम:)	मधुर: (उत्तम:)
तिक्त: (अवर:)	कटु: (अवर:)	लवण: (अवर:)
कषाय: (मध्यम:)	लवण: (उत्तम:)	कषाय: (मध्यम:)
लघवो रसा: आम्ला:		आम्ल (सु)
रसा: (अवर:)		स्निग्धा: (मधुरा:)
कटु: (मध्यम:)		रसा: (उत्तमा:)
तिक्त: (उत्तम: च)		आम्ल: (मध्यम:)
कषाय: (सु)		लवण: (अवर:)

रससहचरा: वीर्यसंज्ञका: गुणा:

मधुर:	आम्ल:	लवण:	कटु:	तिक्त:	कषाय:
स्निग्ध:	लघु:	किंचिद्गुरु	लघु:	रुक्ष:	रुक्ष:
शीत:	उष्ण:	स्निग्ध:	उष्ण:	शीत:	शीत:
गुरु:	स्निग्ध:	उष्ण:	रुक्ष:	लघु:	गुरु:
मृदु:	तीक्ष्ण:	तीक्ष्ण:			

दोषहरा: रसा:

वातहरा: रसा:	पित्तहरा: रसा:	कफहरा: रसा:
मधुर:	कषाय:	कषाय:
आम्ल:	मधुर:	कटु:
लवण:	तिक्त:	तिक्त:

दोषजनकाः रसाः

वातजनकाः रसाः	पित्तजनकाः रसाः	कफजनकाः रसाः
कटुः	कटुः	मधुरः
तिक्तः	आम्लः	आम्लः
कषायः	लवणः	लवणः

रसानां विपाकाः

मधुररसः	आम्लरसः	लवणरसः	कटुरसः	तिक्तरसः	कषायरसः
विपाकः	विपाकः	विपाकः	विपाकः	विपाकः	विपाकः
मधुरः	आम्लः	मधुरः	कटुः	कटुः	कटुः
गुरुः	लघुः	गुरुः	लघुः	लघुः	लघुः

चरकमतेन विपाककर्माणि

कटुविपाकः	आम्लविपाकः	मधुरविपाकः
शुक्रनाशनः	शुक्रनाशनः	सृष्टविण्मूत्रः
बद्धविण्मूत्रः	सृष्टनाशनः	कष्पकरः
वातलः	सृष्टविण्मूत्रः	शुक्रकरः
लघुः	पित्तकरः	गुरुः
	लघुः	

सुश्रुतमतेन विपाककर्माणि

गुरुविपाकः	लघुविपाकः
वातपित्तघ्नः	बद्धविन्मूत्र
कफहरः	वातहरः
सृप्तविण्मूत्रः	श्लेष्मघ्नः

षष्ठोऽध्यायः

ज्योतिषमतानुसारं भूतविचारः

कालः कालस्वरूपं च -

को नाम कालः । कालशब्देन किमवगम्यते अत्र बहुविधमालोचनं शास्त्रेषु दृश्यते । ज्योतिषशास्त्रं कालविधायकमतः कान्तमधिकृत्य किंचित्प्रति-पाद्यते।

सृष्ट्यादिप्रलयान्तकालकलनामानप्रभेदः क्रमादिति व्यक्तः कालः[१] । वेदास्तावद्यज्ञकर्मप्रवृत्ताः यज्ञाः प्रोक्तास्तेतु कालाश्रयेण। शास्त्रादस्मात्कालबोधो यतः स्यादित्यनेन कालस्याधिकरणहेतुत्त्वम्[२] । कालाश्रयेण प्राकृतिकाः सामान्ययज्ञाः प्रोक्ताः ।

लङ्कानगर्यामुदयाच्च भानोस्तस्यैववारे प्रथमं बभूव ।
मधोः सितादेर्दिनमासवर्षयुगादिकानां युगपत्प्रवृत्तिः[३] ।।

अत्र कालस्य प्रवृत्तिः प्रारम्भश्च मन्यते । प्रवृत्तिः नाम आदिः। प्रलये तदन्तः ।

अथ च सृष्ट्यादौ तस्य प्रवृत्तिः अन्यथा अनादिरनन्तश्च कालोऽभिहितः। कथमिति- कालः पचति भूतानि सर्वाण्येव सहात्मना। कान्ते सपक्वस्तेनैव सहाव्यक्ते लयं व्रजेत् । अनादिरनन्तः कालः समस्तभूतानां पाचकः - कालः भूतानि पचति। भूतानि नाम पंच महाभूतानि । अनेन कालोऽनन्तः इत्युच्यते। सत्यं योऽयं भगवान् मूर्तो व्यापकश्च कालस्तस्य प्राक्तनप्राकृतिकलयादनन्तरं व्यक्तिजनकानां सूर्यादीनामभावात् व्यक्तस्याव्यक्ते यदवस्थानं स तस्य लय उच्यते[४] ।

आत्यन्तिकप्रलयः न तु कालस्यास्ति । तदुक्तम्- कान्ते वा ब्रह्मादिनान्ते ब्रह्मणान्ते च । सपक्वस्तेनैव सहाव्यक्ते लयं ब्रजेदिति तत् तेनैवाव्यक्तावस्थानाभि-प्रायेण । तस्माद्युक्तमनाद्यनन्तत्वं तस्य।

तस्याव्यक्तस्य कालस्य सृष्ट्यादौ व्यक्तिजनकानां नक्षत्राणां प्रादुर्भावे सति कालस्य व्यक्तीनामपि दिनमासवर्षयुगादीनां युगपदेकहेलया प्रवृत्तिः न बभूव। तत्र चन्द्रार्कयोर्मेषादिस्थयोश्चैत्रस्य शुक्लपक्षादिः प्रतिपद् । अतो मधोः सितादेर्दिनानां सौरादिमासानां वर्षाणां युगानां मन्वन्तराणां कल्पस्य च तदैव प्रवृत्तिः । अथोदयाच्च भानोः । स चोदयः कस्मिन् देशे-लङ्कानगर्याम् । तथैव वारे । आदित्यवारे चेत्यर्थः।

एतादृशं विवरणं विष्णुधर्मोत्तरपुराणान्तर्गतब्रह्मसिद्धान्ते श्रीमद्भागवद्भृगु-संवादे भगवद्वाक्यम् । लङ्कायामर्कोदये चैत्रशुक्लप्रतिपदारम्भेऽर्कदिनादा-वयिवन्यादौ किंस्तुघ्नादौ रौद्रादौ कालप्रवृत्तिः तथा च ब्रह्मगुप्तोऽपि-

चैत्रसितादेरुदयाद्भानोर्दिनमासवर्षयुगकल्पाः सृष्ट्यादौ लङ्कायां समं प्रवृत्ता दिनेऽर्कस्य[5] ।

ततः प्रवृत्तव्यक्तकालस्य सृष्ट्यादिप्रलयान्तं यावन्तः प्रभेदाः भवन्ति। नवविधकालमतानि प्रत्यक्षाण्येव ।

ब्रह्मदिनं कल्पः । द्युरात्रम् । कल्पद्वयम् ।

ब्रह्मणः परमायुः महाकल्पः । यतोऽनादिमानेषकालस्तत्र ब्रह्मदिनादितः व्यक्त प्रवृत्तिः । सृष्ट्यादिप्रलयान्तं कल्पान्तं च मानप्रभेदः वर्णितोऽस्ति सिद्धान्तग्रन्थेषु।

सृष्ट्यादितः पूर्वं प्रलयान्तात् पश्चात्

यतोऽनादिमानेषकालस्तस्योप-योगाभावत्वं प्रयोजनाभाव एव । एवं कालस्याव्यक्तत्वं समस्तविश्वस्या-धिकरणहेतुत्वं च यथा भगवदुक्तिः-

अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे ।
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके[६] ।।

अत्राहरागमे नाम ब्रह्मदिवसागमे तथा अव्यक्तस्तु विभुः काल एव । सर्वा व्यक्तयः विश्वस्य दृश्यादृश्यप्रपंचः तस्मात्प्रवृत्ताः । तत्र व्यक्तकालस्य भेदाः । एवं पृथक्मानवदैवजैवपैत्रार्क्षसौरोन्द्रवसावनानि । ब्राह्मं च काले नवमं प्रमाणं ग्रहास्तु साध्याः मनुजैः स्वमानात् । एवं व्यक्तकालभेदः तथैषां मानानि स्वरूपं लक्षणं प्रभावश्च सर्वं विचार्यते।

त्रिप्रश्नाधिकारे दिग्देशकालावगमनं क्रियते । तत्र भास्करः वक्ष्यति जगुर्विदोऽदः किलकालतन्त्रः । दिग्देशकालावगमोऽत्र यस्मिन् ब्रुवेऽधिकारं तमशेषसारम्[७] । अत्र दिग्ज्ञानं देशज्ञानं कालज्ञानं क्रियते। अव्यक्तकालस्य स्वसौरमण्डले सूर्यादेव व्यक्तप्रवृत्तिः ।

आश्विन्यादिरेवत्यन्तं नक्षत्राणि तथा मेषादयो मीनान्तं द्वादशराशयः, व्यक्तकालनरस्य स्वरूपनिर्माणं कुर्वन्ति । यथा वराहः शीर्ष-मुख-बाहु-हृदयोदराणिकटिवात्तिगुह्यसंज्ञानि ऊरुजानुं जंघेचरणाविति राशयोऽजाद्याः । कालनरस्यावयवान् पुरुषाणां चिन्तयेत्प्रसवकाले । सदसद्ग्रहसंयोगात् पुष्टाः सोपद्रवास्ते च । अनेन कालपुरुषस्य प्रत्यक्षस्वरूपं प्राप्यते । कालज्ञानं तु विभिन्नमाध्यमेन क्रियते । यथा-

१- लग्नात् कालज्ञानं भवति । नक्षत्रमण्डलस्य स्वक्षितिजेना-भाषिकसंयोगेन याम्योत्तरलंघनेन च ।

२- दिग्देशसापेक्षिकत्वादपि कालज्ञानं क्रियते ।

३- सूर्यादिभिः कालज्ञानं क्रियते ।

४- मध्याह्नछायया कालज्ञानं क्रियते ।

५- हंसस्वरसंचारेण कालज्ञानं क्रियते ।

६- ध्रुवनक्षत्रेण कालज्ञानं भवति ।

७- छायातः कालज्ञानं भवति । इत्थं साध्यकालः ज्ञायते। अतः कालः समस्ताधिकाराणां चाधिहेतुः । यन्त्रप्रमाणेन कालस्य व्यक्तमानं ज्ञायते। क्षेत्रांशकालांशयोः परस्परं सापेक्षिकत्वं तु प्राकृतिकदृष्टान्तेन सिद्धमेव ।

प्राकृतिकपूर्वे प्रलये लीनः तत्राव्यक्तो व्यापकः कालोऽपि मन्यते । पश्चात्तस्मादेव परमाव्यक्तात् पिण्डाण्डानां प्रवृत्तिवशात् कालोऽपि व्यक्तीभूतः विभिन्नमानैः ज्ञायते। अयं निष्कर्षः सांख्ययोगप्रमाणेन भास्करीयगोलाध्यायेऽपि वर्णितोऽस्ति । स्वकेन्द्रिकगुरुत्वेन परस्परं सापेक्षिकत्वेन पिण्डाण्डानां संस्थानं च मन्यते । अन्ते परंब्रह्मणः मूलरूपेण स्वीकारं विना न निदानमत्र । यथा भास्करः[८]- मूर्तोधर्त्तीचेद्धरित्र्यास्ततोऽन्यस्तस्याप्यन्ये । अस्येवमत्रानवस्था ।

अन्त्ये कल्प्या चेत् स्वशक्तिः किमाद्ये, किं नो भूमेः साष्टमूर्त्तेश्च मूर्त्तिः[९]। अत्र लयो नाम भूतविनाशः[१०] ।

१-स तु साम्प्रतं प्रत्यहमुत्पद्यते स दैनंदिनमुच्यते ।

२-यो ब्रह्मदिनान्ते स ब्रह्मो लय उच्यते ।

३-ब्रह्मणः यदा आयुषोऽन्तस्तदा यः लयः स महाप्रलय उच्यते।

४-ज्ञानाग्निदग्धाखिलापुण्यपापा योगिनो विषयेभ्यो मनः समाधाय तदक्षरौ समाहितं कृत्वा यान्ति स आत्यन्तिको लय इति । अतः

लय: चतुर्धा।

एवं ब्रह्मण: क्षिते: सुदूरगतत्वात् शततमप्रलयं रविदर्शनमपि गणितीय-सिद्धान्तेन सिद्धमेव[११]। दिनगतकालावयवा: ज्ञातुमशक्या: यतो विना यन्त्रै:[१२]। अत: यन्त्रमाध्यमेन कालज्ञानं सापेक्षिकव्यक्तस्य कालस्य क्रियते। अत: सर्वत्राव्यक्त: किमु न केनापि प्रकारेण गम्य:। व्यक्तस्तु कालनरमूर्त्तिवशात् सूर्यादिभि: गम्य: व्यक्त: प्रत्यक्षश्च। व्यक्तस्तु काल: परमाव्यक्तस्य कालावयवमात्रं मूर्त्तिमान्। अत: कथितं च सूर्यसिद्धान्ते लोकानामन्तकृत्काल:। कलनात्मक: कालोऽन्य:। स द्विधा स्थूलसूक्ष्मत्वात् मूर्त्तश्चामूर्त्त उच्यते। अत्र द्विविध: काल: गम्यते। एकस्तु लोकानामन्त-कृत्कालोऽनन्तोऽखण्डश्च व्यापको विभुश्च सर्वव्यापक:। अयं निखिलदृश्य-स्याधिकरणहेतु:। सृष्टिस्थितिसंहाराणां मूलम्। यथा- काल: पचति भूतानि तथा च "व्यक्ताव्यक्तय: सर्वा:" प्रभृतयश्च प्राप्यन्ते। अन्य: काल: कलनात्मक:। गणनात्मको लोकैर्ज्ञातुं योग्य: खण्डकाल:। कलनात्मको खण्डकालोऽपि द्विविध:। कलनात्मकस्थूलकाल: मूर्त्त: व्यवहारे ग्रहणार्ह:। महत्तत्वात् स्थूल: मूर्तश्च। कलनात्मकस्य खण्डकालस्य द्वितीयभेदस्तु सूक्ष्मत्वादमूर्त्त: व्यवहारे ग्रहणानर्ह:। तथा चात्र कालस्य त्रैविध्यं सिद्धम्[१३]।

१- भूतानामन्तकृत् अनन्तोऽखण्डश्च।

२- व्यवहारयोग्य: कलनात्मकखण्डकाल: मूर्त्तश्च।

३- व्यवहारे ग्रहणानर्ह: कलनात्मक: खण्डकाल: सूक्ष्मोऽमूर्त्तश्च। व्यवहारे ग्रहणार्ह: प्राणादि: कल्पकालान्तं खण्डकाल: कलनात्मकस्तथे-न्द्रियैर्गम्य: मूर्त्तश्च। त्रुट्यादि कालोऽमूर्त्तसंज्ञक:

कलनात्मकोऽपि नेन्द्रियैर्गम्यः। त्रुटिर्हि नेत्रपक्ष्मद्वयसंयोगकालस्य सहस्त्रत्रयतमभागतुल्यः ।

"सूक्ष्मकालपरिभाषा सूच्यभिन्ने पद्मपत्रे त्रुटिरित्यभिधीयते" इति नारदोक्तिः। दीर्घाक्षरोच्चारणकालः १० विपलानि वा ४ सेकण्ड परिमितः कालः प्राणकालः प्राणो हि मुखासीनः स्वस्य पुरुषस्य । एकश्वासोच्छ्वासान्त-वर्त्तिकालः (असु) अव्याहतदशगुर्वक्षरोच्चारणकालसमः गुर्वक्षरैः रवेन्द्रमितैरसुरिति भास्करोक्तिः (स आदिर्यस्यासौ प्राणादिः) असुपलदण्डादिको वक्ष्यमाणः । प्राणान्तरायमाणः कालः मूर्त्तः व्यवहारार्हश्च कथितः । पृथिव्यां नाडीवृत्तात् कालज्ञानं तथा क्रान्तिवृत्तात् क्षेत्रांशज्ञानं च क्रियते।

३६० X ६० = २१६००

नाडीवृत्तेऽसवः तथा क्रान्तिवृत्ते कलाश्च मन्यन्ते । अहोरात्र्यन्तर्गतप्राणसंचारोऽपि २१६०० । इदं च ऋषिभिः निर्दिष्टम्। एवं व्यक्तखण्डकालस्य भेदास्तु प्रत्यक्षत्वेन गम्या एव भवन्तीति मूर्त्तत्वम् अमूर्त्तोऽखण्डश्चागम्य एव । एवं मूर्त्तकाले यथा-

६ प्राणाः - १ विनाडी

६० विनाड्यः १ नाडिकः

६० नाड्यः - १ अहोरात्रम् (नक्षत्रम्)

३० अहोरात्राणि - १ नक्षत्रमासः

१२ मासाः - १ वर्षम् ।

अत्रैव सौरचन्द्रनक्षत्रसावनादिभेदैः नवविधकालभेदाः व्यवहारे सिद्ध्यन्ति कलनात्मकखण्डकालस्य ।

"सूक्ष्मकालस्तु सूच्या भिन्ने पद्मपत्रे त्रुटिरित्यभिधीयते । तत्

षठ्या लीक्षकं प्रोक्तं तत् षठ्या प्राण उच्यते" ।

नाडी-घटी-दण्डश्च तुल्यार्थबोधका एव पर्यायशब्दाः । तत्र केवलं यत्र भेदेनैव नामभेदः । घटीयन्त्रेण घट्यात्मकः कालः ; दण्डाख्यशंकुयन्त्रेण दण्डात्मकः कालः ; अङ्गुष्ठमूलगतकफादिप्रदर्शिनः नाड्यावगतकालस्य नाम नाडीकालः ; एवं यन्त्रभेदेन भणितकाले नामभेदः । अतः यन्त्रमाध्यमेन वेधोपलब्धप्रमाणेन द्विविधगणिताश्रयेण गाणितीयदिग्देशकालाश्रिततर्काश्रयेण च व्यवहारशतमूर्त्तकालस्य प्रत्यक्षविधानं ज्योतिषशास्त्रे तथा दर्शनेषु च प्राप्यते। युगमनुकल्पादिभेदोऽपि खण्डकालस्य कलनात्मकस्यैव तथा प्राणादिदिनपक्ष-मासऋतुत्वेन वर्षाणामपि व्यवहारार्हत्वेन ज्ञायते ।

सूर्यसिद्धान्ते विध्यादिसृष्ट्यादिकालयोर्मध्येऽन्तरमागमप्रमाणेन स्वीक्रियते। कथमिति न किमपि प्रत्यक्षं प्रमाणम् । व्यक्तकालस्य चक्रात्मकं स्वरूपं द्युरात्रपक्षमासायनवर्षादिभेदैः प्रत्यक्षमेवास्ति । कालांशविधायकं नाडीमण्डलं नक्षत्रमण्डलस्य तुल्यदक्षिणोत्तरमानं करोति । तदनुरोधेन भूपृष्ठेऽपि विषुववृत्तं प्राकृतिकसंस्थानानुरोधेन स्वीकृतम् ।

क्रान्तिवृत्तं क्षीणांशरूपं भूमध्यदृश्यनक्षत्रमण्डलमेव । सूर्यक्रान्तिक्षेत्रेण सम्बन्धमिति यद्यपि ग्रहर्क्षपूर्त्तिकालः ग्रहस्य स्वकक्षा वृत्तीयगगनसम्बन्धेन ज्ञायते, तथापि व्यवहारे तु तादृशस्यैव कालस्योपयोगः । अव्यक्तस्य तथा सूक्ष्मातिसूक्ष्ममूर्त्तस्य

सामान्यव्यवहारे नोपयोगः । अव्यक्तकालान्तर्गत-खण्डाभिप्रायेण पिण्डसापेक्षकालस्य प्रवृत्तिः । प्रत्यक्षकालस्यावगमनं दिनादिप्रत्यक्षकालखण्डैश्च क्रियते ।

अदृश्यरूपाः कालस्य मूर्त्तयो गणनाश्रिताः ।

शीघ्रमन्दोच्चपाताख्याः ग्रहाणां गति हेतवः ।। इति ।

अत्र विभोः कालस्यादृश्यं रूपं स्वीकृतम् । अयं दृश्यः तत्र गणनाश्रिताः। कालस्य मूर्त्तयः शीघ्रमन्दादयो ग्रहाणां गतिहेतवः निरूपिताः।

अदृश्यरूपाः - न दृश्यानि रूपाणि येषां ते अदृश्यरूपाः । सीमाहीनत्वा-दनन्तत्वाच्च तथा सूक्ष्मतमत्वाच्च तथारूपरहितत्वादपि चक्षुरिन्द्रियग्राह्या इत्यर्थेऽपि दृश्यते । गणनाश्रिताः भगोलीयक्रान्तिवृत्तानुरूपं ग्रहगोलीयक्रान्तिवृत्तीय प्रदेशाः राशयात्मकाश्च । आश्रिताः संलग्नास्तन्मया-धिकरणरूपाश्च । तत्र कालोऽधिकरण-हेतुश्चाव्यक्तरूपेण । भगणाश्रयेण मूर्त्तिरूपं च । अस्मिंश्चलोकेऽतोग्रे गुरुत्वाकर्षण-सिद्धान्तः निरूपितोऽस्ति । तस्य प्रयोजनाभाव एव वर्तते ।

केवलवर्तमानकल्पस्यैव प्रयोजनं ग्रहगणिते व्यवहारे च दृश्यतेऽतः भास्कराचार्याः - "यतोऽनादिमानेषः कालस्ततोऽहं न वदाम्यत्र पद्मे भवा ये गतास्तानिति कथयन्ति"[१४] । कमलाकरेणापि सूर्यसिद्धान्तः स्वीकृतः[१५] । तत्र कमलाकरेण निरूप्यते यत्[१६]-नादिर्यस्यानादिः नान्तो यस्यासावनन्तः । अनादिश्चासावनन्तश्चानाद्यन्तः

स एव सर्वेशः सर्वव्यापकः इति । तस्मिन् महाकाले गगनस्थितं सग्रहभूमण्डलं सततं भ्रमति । कस्मिन् अपि काले चेदं भण्डलं स्थिरमिति वक्तुं न शक्यते ।

भास्करेणापि नक्षत्रकक्ष-ख-चरैः समेते यस्मादतस्तेन समाहतोऽयम् । भपंजरःखेचरचक्रयुक्तो भ्रमत्यजस्रं परिवर्तमानः[१७] । अत्र भपंजरः खेचर-चक्रयुक्तो भ्रमत्यजस्रं परिवर्तमानश्चेति वाक्यं दृश्यते । अजस्रं निरन्तरमिति परिवर्तमानश्चेति भपंजरः खेचर-चक्रयुक्तोऽत्र सृष्टिस्थितिसंहारकचक्राणि महाकलान्तर्गत निरन्तरं प्रचलतीति भावं प्रदर्शयति। अर्थादनाद्यनन्तमहाकाले महाकाशे च कुत्रचित् ब्रह्माण्डानां सृष्टिः, कस्यचित् स्थितिः विकासस्तथा कुत्रचित् संहारोऽपि क्रमशः निरन्तरक्रमेण प्रचलतीति वक्तुं शक्यते । कमला-करीयसृष्टिलक्षणं[१८] च - भूमध्ययस्योत्तरसंस्थाने ग्रहपातादयः सर्वे युगपच्चलिताः नाड्याह्वयेऽजादियुतारुदैव सृष्ट्याह्वयं कालमुदाहरन्ति।

कल्पलक्षणं च - काले न ये नैति पुनः स योस्तं सृष्टिकल्पं प्रवदन्ति सन्तः ... इत्यादि ...। एवं कमलाकरेणापि विश्वस्य निरन्तरत्वं वर्णितमागमप्रमाणेन । अत्रापि कमलोद्भव-कालात् सृष्ट्यादिकालान्तरम् उक्तः सूर्यसिद्धान्तः ।

सृष्टिलक्षणं कल्पलक्षणं च खगोलीयप्रमाणेन सिद्धमेव प्रतिभाति । परं विद्यादेः सृष्ट्यादेश्चान्तरं भ्रमोत्पादकमेव लक्ष्यते । तत्र कमलाकरीयखण्डनं परमाणोः निरवयत्वविषये सतर्काश्रितमेव।

सांख्यशास्त्रान्तर्गतकल्पितसृष्टिक्रमः भास्करेण सिद्धान्तशिरोमणौ स्वीकृतः[१९] । तद्यथा-

प्रकृतिः पुरुषः

महान्

सत्वः रजः तमः - त्रिविधांकाराः

वैकारिकः तैजसः पंचमहाभूतानि

पंचमहाभूतानि

आकाशः वायुः तेजः आपः पृथ्वी

शब्दः शब्दस्पर्शौ शब्दस्पर्शरूपाणि शब्दस्पर्शरूपरसाः शब्दस्पर्शरूपरसगन्धः

सर्वे पदार्थाः पंचभूतात्मनः । सर्वेषां संहतेश्च ब्रह्माण्डम् । विश्वं पांचभौतिकमेव ।

पुराणमते सृष्टिः

भूतावस्थितिः - पुराणं पंचलक्षणमिति[20] नियमानुसारं पुराणं नाम सर्गादिपंचतत्त्व-प्रतिपादकं शास्त्रं भवति । अतः स्वपुराणत्वप्रतिपादनार्थं प्रत्येकं पुराणं प्रायः पंचलक्षणप्रतिपादकमस्ति । एतद्दृष्ट्या प्रस्तुतं बृहद्धर्मपुराणमपि पंचलक्षणसमन्वितं विद्यते । तत्र तत्र पुराणेऽस्मिन् संक्षेपेण विस्तरेण वा भवतु सर्गादयः प्रतिपादिता-स्सन्ति । अपि चात्र पुराणशास्त्रस्य प्रादुर्भावः, पुराणनामानि च कीर्तितानि

सन्ति । अत आदौ पुराणप्रादुर्भावादिप्रतिपादनानन्तरं सर्गादयोऽत्र समीक्ष्यन्ते ।

पुराणोत्पत्तिस्तत्परिचयश्च -

पुरा सिसृक्षुर्ब्रह्मा नवप्रजापतिसृष्ट्यनन्तरं सर्वमन्धकारमयं ज्ञात्वा चिन्तापन्नोऽभूत् । तदा "तपे"ति वर्णयुगलाद् भूत्वा रवेः किरणवत् सर्वतो व्याप्य सर्वं ज्योतिर्मयं चक्रे । ब्रह्मा हवद्दिदृक्षया चत्वारि मुखानि लब्ध्वा प्रथमतो ब्रह्मरूपा वाचः ससर्ज । अकारादिस्वरान् ककारादिहलांश्च सृष्ट्वा ततः षट्पंचाशत् भाषाः सृष्टवान् । चतुरो वेदान् विविधाः संहिताश्च सृष्ट्वा पदज्ञानाय व्याकरणं, तदर्थज्ञानाय दर्शनं, धर्मज्ञानाय पुराणादीनि च सृष्टवान्। सर्वाणि पुराणानि सत्यवाक्यानीति पुराणेऽत्र कथ्यते । तानि पुराणानि महापुराणोपपुराणभेदेन द्विविधानि निगद्यन्ते । द्विविधानि तानि पृथक्तयाऽष्टादशसंख्यकानि सन्ति । पुराणस्यास्य मते महापुराणानां नामानि यथा- ब्राह्मं, पाद्मं, ब्रह्माण्डं, वैष्णवं, ब्रह्मवैवर्त्तं, महाभागवतं, भविष्यं, गारुडं, लैङ्गं, शैवं, वराहं, मार्कण्डेयं, स्कान्दं, कौर्मं, मात्स्यम् , आग्नेसं, वायव्यं चेति[२१]।

महापुराणानां संख्याऽष्टादशेति कथयित्वा गणना काले सप्तदशपुराणानां नामान्यत्र कथितानि । उपपुराणानां नामान्यप्यत्र कीर्तितानि । यथा- आदिपुराणम्, आदित्यपुराणं, बृहन्नारदीयपुराणं, नारदीयपुराणं, नन्दिकेशपुराणं, बृहन्नन्दीश्वरं, शाम्बं पुराणं, क्रियायोगसारं पुराणं, धर्मपुराणं, विष्णुधर्मोत्तरपुराणं, शिवधर्मपुराणं, वामनपुराणं, वारुणपुराणं, नारसिंहपुराणं, भार्गवपुराणं, बृहद्धर्म-पुराणं चेति । सर्वाणि पुराणानि वेदव्यासेन प्रकाशितानि ।

महाभारतरचनानन्तरं विष्णोः कला वेदव्यासः पुराणानि रचयति । व्यासकल्पितपुराणेष्वपि केषांचित्पुराणानां लेखकाः वक्तारोऽर्थनिरूपकाश्च पराशरादिमुनयो भवन्ति। तथाप्यन्ते संकलनात्पुराणानां कर्तृत्वं व्यासस्यैव सुप्रसिद्धम् ।

बृहद्धर्मपुराणे कथितानां महापुराणानाम् उपपुराणानां च नामविषये महान् मतभेदो दृश्यते । अत्र यानि सर्वाणि पुराणत्वेनोपपुराणत्वेन वा गण्यन्ते, तानि सर्वाणि पुराणान्तरैस्तत्तद्कोटौ नैव गण्यन्ते ।

पुराणलक्षणसमन्वयः -

बृहद्धर्ममतानुसारं स्वयमिदं पुराणम् उपपुराणेष्वन्तिमं सर्वश्रेष्ठं च भवति। अत्र प्रायः पुराणलक्षणानि समन्वितानि भवन्ति । पुराणलक्षणानि सर्ग-प्रतिसर्ग-वंश-मन्वन्तर-वंशानुचरितानि पंचेति सर्वसम्मतानि सन्ति । एतानि सर्गादीनि पंचलक्षणानि सर्वेषु महापुराणेषूपपुराणेषु च प्रायः संगतानि भवन्ति । अत्राप्युपपुराणे बृहद्धर्माख्ये धर्मादितत्त्वैः साकं सर्गादीनि तत्र तत्र समासतो व्यासतो वा वर्णितानि। अधुना क्रमशः तानि सर्गादीनि सम्यगालोच्यन्ते।

सर्गः - सर्गस्य जगत्सृष्टेः वर्णनं पुराणेऽस्मिन्नतिविस्तरेण कृतमस्ति। पुरा जगदिदं नष्टस्थावरजङ्गमं, चन्द्रसूर्यादिरहितं, शून्यरूपं, तमोमयं चासीत् । तदा उभौ स्थितवन्तौ । तदतिरिक्तं तृतीयं किमपि नासीत्। कैवल्ये स्थितः पुरुषो यदा सिसृक्षां प्राप्तवांस्तदैकोऽपि स पुरुषः प्रकृतेर्योगात् प्राकृतैर्गुणैस्त्रिधाऽभूत् । सात्विकराजसतामसभेदेन त्रिधा प्रकाशितं पुरुषं वीक्ष्य सा प्रकृतिः को मामेषु ग्रहीष्यतीति विचिन्त्य प्रथमतोऽप एव सृष्ट्वा तासु रसं नियोजितवती । स्वयं नारायणख्यातिं

प्राप्य सा प्रकृतिस्तान् सात्त्विकादिपुरुषान् शरीरं ग्राह्यामास[२२] ।

तेषु प्रकृतेः परीक्षया सात्त्विको राजसाभिभूतो जगत्स्रष्टा ब्रह्मा, रजसः सत्त्वाभिभूतो जगत्पालको विष्णुश्च बभूवतुः । तामसश्च संहारकृच्छिवोऽभूत्। प्रकृतिरुपिण्या देव्याऽदिष्टास्ते त्रयः स्वस्वकर्मसु दत्तावधानाभवन् । जले शयानस्य विष्णोनभिः पद्मेकमजायत । स्रष्टुं समुद्यतो ब्रह्मा सलिले बहुधा भ्रमस्तत्पद्ममेव स्थूलं प्राप्य तत्र स्रष्टुं समुपचक्रमे । आदौ स दण्ड-क्षण-लवादिसूचितं कालं सृष्टवान् । ततो महत्तत्त्वं जातम् । ततश्चाहं समजायत । अहंकारात्पंचतन्मात्राणि, तन्मात्रेभ्यश्च पंचभूतानि जातानि । पृथिवीजलतेजो-वाय्वाकाशेषु पंचभूतेषु क्रमशो गन्धरसरूपस्पर्शशब्दाख्यानि तन्मात्राणि तिष्ठन्ति। पंचभूतैस्तन्मात्रैरिन्द्रियैश्च देहः सृष्टः । तस्मिन् देहे अधिष्ठाता विष्णुर्जीवसंज्ञां प्राप्य स्थितवान्[२३] । ततो ब्रह्मा दशमानसपुत्रान् ससर्ज। ते च पुत्रा यथा- वशिष्ठोऽत्रिरङ्गिराः, पुलस्त्याः, पुलहः, क्रतुर्भृगुर्दक्षे नारदः[२४] कर्दमश्चेति । सृष्ट्यर्थं ब्रह्मणादिष्टास्ते सृष्टिकुशलाः सन्तः तपसि स्थिता अभवन्। प्रजा वृद्ध्ये ब्रह्मा स्ववपुर्द्विधा चक्रे । वामार्द्धं शतरूपाख्या स्त्री जाता । दक्षिणार्द्धं स्वयंभूवमनुर्नाम पुरुषो जातः । स्वहृदयात् कन्दर्पं च जनयित्वा सृष्टिकृद्ब्रह्मा मैथुनधर्मेण सृष्टिं वर्धयमास । स्वयम्भुवो मनुः शतरूपाख्यायां भार्यायां पंचापत्यान्यजनयत् । तेषु प्रियवतोत्तानपादौ पुत्रौ, आकूतिर्देवहूतिः प्रसूतिश्चेति तिस्रः कन्यकाश्चासन् । एतैरेव प्रजाः बहुधा वर्धिताः । मनुराकूतिं रुचसे, देवहूतिं कर्दमाय, प्रसूतिं दक्षाय च दत्तवान् । रुचिराकूत्यां यज्ञं जनयामास । कर्दमो देवहूत्यां बहून् सुतान्

कन्याश्चोत्पादयामास। दक्षश्च प्रसूत्यां नानाकन्याः संजनयामास। तासु त्रयोदशकन्याः कश्यपाय दत्तवान्। तासां नामानि यथा- अदिति, दिति, दनुः, काष्ठाऽविष्टा, सुरसा, तिमि, मुनिः, क्रोधवशा, ताम्रा, विनता, कद्रुः, भानुमती[२५] चेति । अदित्यां सूर्योऽभूत् । सूर्याच्च वैवश्वतमनुर्जातः। तेन च सूर्यवंशः प्रवर्तितः। दितेश्च दैत्याः, दनोर्दानवाः, काष्ठाया अश्वादिपशवः, तिमेः कुम्भीरमत्स्याद्याः, मुनेर्गोमहिषादयश्च जाताः । अत्रिः कर्दमकन्यायाम् अनसूयायां ब्रह्मा-विष्णुः शिवात्मकान् दत्तदुर्वासचन्द्रान् जनयामास । चन्द्रपुत्रो बुधोऽभूत्। तस्माच्च पुरुरवा भूत्वा क्रमशो वंशं वर्धयामास । वंशोऽयं वन्द्रवंश इति ख्यातिमलभत् । ततः सन्ध्या नाम्नी कन्या ब्रह्मणोऽभूत् । तस्यां चासक्तो ब्रह्मा स्वशरीरं तत्याज । त्यक्तं तच्छरीरं नीहारः समभूत्। सा च सन्ध्या प्रातः सायं मध्यमेति च त्रिधा कृता। ततो ब्रह्मा पुनर्देहं प्राप्य महत्क्रोधं प्रकाशयामास । तस्मात् क्रोधान्महारुद्रः कामनाशाय जातः । स च त्रिनेत्रः पंचवदनः कोटिसूर्यसमप्रभो जटिलो, नाभिलोहितो मारय भ्रामयेति मुहुर्वदंश्चासीत् । भीषणाकारं सृष्ट्वा ब्रह्मा तमेकादशविधं चकार । एकादशरुद्राश्च तथैवोग्ररूपाः सृष्टिलोपकारकाश्चाभवन्। भयविह्वलो तान् वशीकर्त्तुं दक्षं समादिष्टवान्। स च दक्षः योगबलेन तान् सर्वान् स्ववशेऽथापयत्[२६]। ब्रह्मा च रुद्रसृष्ट्यनन्तरं क्रोधमात्मनः तत्याज । रुद्रभयाद्-ब्रह्मशरीरे ये विकाराः जाताः तेभ्यो यक्षरक्षो गणाश्चैव सहस्रसो जाताः । एवं चानन्तरं गन्धर्वादयोऽपि जाता आसन् । अनेन विधिना ब्रह्मा सर्वं जगत् सृजतीति पुराणमिदं कथयति।

जगत्सर्गप्रसंगोऽयं प्रायो बहुषु शास्त्रेषु प्रतिपादितोऽस्ति ।

किन्तु पुराणेषु यथा विस्तरेण वर्णितमस्ति नतथाऽन्यत्र कुत्रापि शास्त्रान्तरेषु प्रतिपादितः । श्रीमद्भागवतं सृष्टिं वर्णयत्कथयति यद् भगवान् सृष्टेरादौ एक एवासीत् । द्रष्टा स किमपि न दृष्ट्वाऽत्मानमसंतोषं मेने । तदा स यदृच्छयैवोपगतां गुणमयीं सूक्ष्मादेवीं प्रकृतिमभ्यपद्यत । तस्यां मायायां स स्वात्मभूतेन पुरुषेण वीर्यमाधत्त[२७] । अव्यक्तात्तस्मात् महत्तत्त्वमजायत । तस्मादहंकारः त्रिविधोऽभूत्। वैकारादहंकारात् मनो जातम् । तैजसात् ज्ञानकर्मेन्द्रियाणि जातानि । तामसादाकाशोत्पत्तिरभूत् । आकाशात्स्पर्शस्तस्मात्स्पर्शश्चाभूत् । वायोः रूपं, तस्माच्च ज्योतिरभूत्, ततो रसमयं जलं जातम् । तस्मात् गन्धगुणा पृथिवी जाता । तानि च पृथिव्यन्तरनि भूतानीश्वरप्रेरणया मिलित्वा ब्रह्माण्डं जनयामासुः। तद् ब्रह्माण्डं यदा प्रलय जले निमग्नासीत्तदा भगवान् शेषशय्यायां शयानः सन् सर्वविश्वबीजानि स्वस्मिन् धृत्वा पुनः सृष्ट्यर्थं कालशाक्तिं विनियुज्य सर्वं विश्वं दृष्टवान्। कालप्रेरितेन रजोगुणेन विक्षुब्धो जगद्बीजसमूहः पद्मरूपेण तन्नाभिद्वारेण प्रादुर्भूतः । तद् पद्मे विष्णुप्रविश्य स्वयम्भूर्ब्रह्माऽभूत् । तथा हि कथितम्-

तल्लोकपद्मं स उ एव विष्णुः प्राविविशत् सर्वगुणावभासम् ।
तस्मिन् स्वयं वेदमसो विधाता स्वयं भुवं यं स्म वदन्ति सोऽभूत्[२८] ।।

स च ब्रह्मा तत्र पद्मेऽवस्थितस्सन् न कमपि लोकं दृष्ट्वा चतुर्दिक्षु दृष्टिं भ्रामयन् चत्वारि मुखानि लब्धवान् । तत्पद्मे स्थितोऽपि ब्रह्मा पद्मं, लोकतत्त्वमात्मानं च न ज्ञातवान् । ततः पद्मस्य नालछिद्रेण जलमध्ये प्रविश्यापि पद्मस्य मूलं न ज्ञातवान् । ततोऽन्वेषणान्निवृत्य ब्रह्मा पद्मोपरि समाधिनोपविष्टवान् । अन्ते स्वहृदये प्रकाशितं

भगवत्तत्त्वमपश्यत् । शेषशय्यायां शयानं भगवन्तं दृष्ट्वा स्तुतवान्। तस्मात्सृष्टिसामर्थ्यं प्राप्य ब्रह्माग्रेऽन्धतामिस्रं, तामिस्रं महामोहं मोहं, तमश्चासृजत्[२९]। किन्तु सृष्टिमेतां पापीयसीं दृष्ट्वा स सृष्टिमन्यां चिन्तयामास। ततः सनकादीन् मुनीन् सृष्ट्वा प्रजासृष्ट्यर्थमादिष्टवान्। सृष्ट्यर्थमादिष्टास्ते मोक्षसाधनरताः सृष्टिं कर्तुं नैच्छनत् । सुतैरेवं प्रत्याख्यातस्य तस्य महान् क्रोधो जातः । धिया निगृहीतोऽपि क्रोधो ब्रह्मणो भ्रुवोर्मध्यान्न-लिलोहितरुद्ररूपेणाजायत। तस्य रुद्रस्य कृते ब्रह्मा हृदयाद्येकादशस्थानानि कल्पयित्वैकादशनामानि भार्याश्च दत्तवान्। प्रजासृष्ट्यर्थ-मादिष्टो रुद्रः स्वसदृशान् रुद्रगणान् सृष्टवान्। तान् जगत्ग्रसतां रुद्रगणानां यूथान् दृष्ट्वा प्रजापतिरशङ्कत[३०]। तादृशी नैव स्रष्टुं समुपदिश्य तपस्तप्तुमादिष्टवान् । रुद्रे वनं गते सति ब्रह्मा सृष्टिं ध्यात्वा दशपुत्रान् जनयामास । ते च पुत्राः यथा-

मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः ।
भुगर्वशिष्टो दक्षश्च दशमस्तत्र नारदः[३१] ।।

ब्रह्मणा दक्षिणस्थानाद्धर्मः, पृष्ठतोऽधर्मः, हृदयात्कामः, भ्रुवोः क्रोधः, निम्नोष्ठा-ल्लोभः, मुखाद्वाक्, मेदात् सिन्धवः, वायोः निसृतिः, छायायाः कर्दमश्च[३२] जातः। स्वकन्यां वाचं दृष्ट्वा ब्रह्मा ताम् उपभोक्तुम् चक्रमे । तथाभूतमधर्मे लिप्तं पितरं मरीचिप्रभृतयः प्रत्यबोधयन् । व्रीडितो ब्रह्मा तं तनुं तत्याज । तां तनुं दिशो गृहीतवन्तः। दिक्षु सा तनुः नीहारः समभूत् । पूर्ववल्लोकसृष्ट्यर्थं चिन्तयतो ब्रह्मणश्चतुर्मुखेभ्यो वेदाः प्रकाशिताः । चतुर्होत्रं कर्म, धनुर्वेदं, गान्धर्वम्, आयुर्वेदं स्थापत्यं चासृजत् । सर्वेभ्यो वक्त्रेभ्यो इतिहासपुराणश्च

पंचमवेदमसृजत्[३३] । मरीच्यादिपुत्राणां सर्गमविस्तृतं दृष्ट्वा बहुचिन्तनानन्तरं स स्वदेहं द्विधा विभक्तवान्। ताभ्यां विभागाभ्यां मिथुनं सम्पद्यत । तत्र यः पुरुषः स स्वयंभुवः मनुः स्त्री च शतरूपाभवत्। तयोः पंचापत्यान्यभवन् । द्वौ पुत्रौ तिस्रः कन्यकाश्च । प्रियव्रतोत्तापादौ पुत्रौ आकूति-देवहूति-प्रसूतयः कन्याश्चासन्[३४] । आकूतिं रुचये, देवहूतिं, कर्दमाय, प्रसूतिं दक्षाय च दत्तवान् । तेषामपत्यैः सर्वं जगदापूरितमिति श्रीमद्भागवतीयजगत्सृष्टिः।

मार्कण्डेयपुराणानुसारं जगत्सृष्टिः -

सृष्टेरादौ केवलं परंब्रह्मैवासीदिति जगत्सृष्टिवर्णनावसरे पुराणमिदं प्रतिपादयति । तद्यता- "ध्रुवमक्षय्यमजरममेयं नान्यसंश्रयम्। गन्धरूपरसैर्हीनं शब्दस्पर्शविवर्जितम् । अनाद्यनं जगद्योनिं त्रिगुणप्रभवाप्ययम् । असाम्प्रतमविज्ञेयं ब्रह्माग्रे समवर्तत[३५] । प्रलयानन्तरं सर्वं जगद्व्याप्य तद् ब्रह्म स्थितमासीत् । तदा त्रयो गुणाः साम्यावस्थायाम् आसन् । सृष्टिकाले गुणानां वैशम्यात् प्रथमतः प्रधानं जातम् । महान्तं च तत् समावृणोत् । त्वाचा बीजं यथावृतं तथा सात्विकादिभेदेन त्रिविधं महत्तत्त्वं प्रधानेन आवृत्तमासीत्। ततोऽहंकारः त्रिविधो जातः । ततस्तामसादहंकाराद्भूततन्मात्राणां, तैजसात् दशेन्द्रियाणां, वैकारिकादहंकारा-दिन्द्रियाधिष्ठातृदेवानां मनसश्च सर्गोऽभूत् । ततः पृथिवीपर्यन्तैः तत्वैः कल्पिते ब्रह्माण्डे विवृद्धस्सन् क्षेत्रज्ञो ब्रह्माभूत् । तथा हि–

स वै शरीरी प्रथमः सवै पुरुष उच्यते ।
आदिकर्त्ता च भूतानां ब्रह्माग्रे समवर्तता[३६] ।।

अयमेव ब्रह्मा पद्मकल्पावसाने निद्रोत्थितस्सन् शून्यं लोकमपश्यत् । स च प्रलयार्णवे निमग्नां दृष्ट्वा तां समुद्धर्तुं वराहरूपं धृतवान् । पृथिवीं समुद्धृत्य जलं नावमिव तां स्थापयामास । पृथिवी विभागं च कृत्वा सप्तद्वीपयुतां चकार । भूरादीन् चतुरो लोकान् कल्पयामास । ततः सर्गं चिन्तयतस्तस्मा-द्बुद्धिपूर्वं पंचाविद्यासर्गो जातः । तथा वृक्षाणां मुख्यनामसर्गो जातः । ततः तिर्यग्स्रोतसां पश्वादीनाम्, ऊर्ध्वस्रोतसां देवानाम्, अर्वाक् स्रोतसां मनुष्याणां च सर्गोऽभूत् । ततोऽनुग्रहसर्ग-भूतसर्गौ जातौ । देवादिसृष्ट्यर्थमात्मानं नियोजयतो ब्रह्मणो जघनस्थानात्तमो जाता असुरा अभवन् । तां तमो मात्रात्मिकां तनुं यदा स त्यक्तवांस्तदा सा रात्रिरभूत्[३७] । ततोऽन्यां तनुं गृहीत्वा सिसृक्षो ब्रह्मणो मुखात् सत्त्वयुक्ताः देवाः जाताः । तेन परित्यक्ता सा तनुर्दिवसोऽभूत्। ततोऽन्यां सत्त्वमयीं तनुं गृहीत्वा सिसृक्षो ब्रह्मणो मुखात् सत्त्वोद्रिक्ताः देवाः जाताः । तेन परित्यक्ता सा तनुर्दिवसोऽभूत् । ततोऽन्यां सत्त्वमयीं तनुं जगृहे। ततश्च पितरो जाताः। तस्यां तनौ त्यक्तायां सन्ध्याऽजायत । ततो गृहीतायाः तनोः मनुष्याः जाताः । त्यक्ता सा तनुः नक्तान्तेऽहर्मुखे च स्थिता ज्योत्स्नाऽभूत्। ततो ब्रह्मा रात्रौ क्षुदन्वितः सन् रजस्तमोमयीं तनुं गृहीत्वा तदन्धकारे राक्षसान् यक्षां च जनयामास । तान् दृष्ट्वा संतुष्टस्य ब्रह्मणो मस्तकात् केशाः पतित्वा भूमौ चलिताः । अतः सर्पणात् सर्पाः जाताः । सर्वान् दृष्ट्वा क्रुद्धात् तस्माद्वर्णेन कपिला भूतगणा जाता अभवन् । गां नाम पृथिवीं ध्यायते । ब्रह्मणः सकाशात् गन्धर्वाः जाताः । ततः स स्वदेहात् पशून् पक्षिणश्च जनयामास । मुखादजाः वक्षसो मेषाः उदरात् गावः, पादयोर्गजाश्व-गर्दभोष्ट्राश्वतराश्चाजायन्त । तस्य रोम

ओषधयो जाताः । चतुर्भ्यो मुखेभ्यः चत्वारो वेदाः प्रकाशिता इति।

भविष्यद्पुराणम् -

[38]पुराणमेतदपि सृष्टिप्रसंगं वर्णयति । पुरा जगदिदं तमोभूतम्, अविज्ञेयम्, अतर्क्यम् , प्रसुप्तश्चासीत् । ततोव्यक्तः सूक्ष्मः, सनातनोऽतीन्द्रियो भगवान् जगदिदं प्रकाशयत् स्वयमुत्थितः । स एव स्वशरीरात् विविधाः प्रजाः स्रष्टुमिच्छुस्सन् प्रथमतोऽप एव ससर्ज। तासु च यदा स वीर्यं योजयामास तदैकमण्डं सुवर्णमयमभवत् । तदण्डे स्वयं भगवान् ब्रह्मेति नाम्ना प्रकाशितोऽभूत्। ततो ब्रह्मा तदण्डं द्विधा चक्रे । ताभ्यां सकलाभ्यां दिवं भुवं च निर्ममे । ततो महान् भूत्वा सर्वतो व्याप्तोऽभूत् । महतोऽहंकारः तस्मात्त्रिगुणा च जाताः। एते त्रिगुणाः अतिसूक्ष्माः बुद्धिगम्याः, भूतानां हेतुभूताश्च भवन्ति । एतेभ्यः पंचेन्द्रियाणि सृष्टाणि। स भगवान्निन्द्रियैस्साकं विषयान् संयोज्य भूतानि ससर्जेति । ब्रह्मपुराणं प्रायो भविष्यपुराणवत् सृष्टिं वर्णयति । विष्णुपुराणं किन्तु भिन्नतया वर्णयति । प्रलयान्ते प्रधाने गुणसाम्ये स्थिते पुंसि च पृथक् स्थिते तयोः धारणार्थं विष्णोः कालस्वरूपमतिष्ठत् । सर्गकाले संप्राप्ते सति हरिः प्रधानपुरुषौ संप्रविश्य क्षोभयामास । तदा क्षेत्रज्ञाधिष्ठिताद् गुणसाम्यात् प्रधानान्महत्तत्वमजायत । महत्तत्वमिदं सात्विकं राजसं तामसं चेति त्रिविधम्। त्रिविधान्महत्तत्वात् त्रिविधाः अहंकाराः जाताः । वैकारिकतैजसस्तामसश्चेति त्रिविधोऽहंकारः । भूतादेस्तासाहंकारात् शब्दतन्मात्रं जातम् । तत आकाश संजातः । आकाशात् स्पर्शतन्मात्रमभूत् । ततो वायुभूत् । विकुर्वाणाद्वायोः रूपमजायत । ततस्तेज उत्पन्नम् । ज्योतिश्च विकुर्वाणं सद्रसं जनयामास । ततो जलं, तस्माच्च गन्धोऽभूत्।

गन्धात् पृथिवी समुत्पन्ना । किन्तु पृथक् भूतास्ते संहतिं विना प्रजाः स्रष्टुमसमर्थाः अभूवन् । ततस्ते पुरुषाधिष्ठिताः सन्तोऽण्डमुत्पादयामासुः । तस्मिन्नण्डे विष्णुः ब्रह्मरूपेण स्वयमेव व्यवस्थितोऽभवत्। स च सृष्टिं कुर्वन् प्रथमतस्तमोमयम् अबुद्धिपूर्वम् अविद्यासर्गं कृतवान् । ततो ध्यायतस्तस्मात् पंचविधानां नागानामर्थात् वृक्षाणां सृष्टिः बभूव । नागानामयं सर्गः मुख्य सर्ग इति कथ्यते । तं सर्गमसाधकं दृष्ट्वा स सर्गान्तरं चिन्तयित्वा तिर्यक्स्रोतसां सृष्टिं चकार। अयमेव सर्गः पशुपक्षिणामासीत् । तमपि सर्गमसाधकमिति मत्वा ब्रह्मा सात्त्विकानां देवानां सृष्टिं कृतवान् । सर्गोऽयं ऊर्द्ध्वस्रोता देवसर्ग इति कथ्यते। तत्र ब्रह्मणः प्रीतिर्जाता । तथापि सर्गान्तरं चिन्तयन् सोऽर्वाक् चेतसां मानवानां सृष्टिमकरोत्। ततश्चासुरादीनां सृष्टिं प्रजापतिः चकार । अयं सृष्टिक्रमः प्रायो मार्कण्डेय-पुराणवर्णितसृष्टिक्रमेण सह साम्यं प्रमाणयति । ब्रह्मपुराणमपि[३९] ब्रह्मकृतं सर्गं पुराणान्तरप्रतिपादितवत् वर्णयति । ब्रह्मवैवर्तपुराणं च[४०] प्रायः तथैव सृष्टिं वर्णयति ।

बृहद्धर्मे कथितं यत् सृष्टेरादौ प्रकृतिः पुरुषश्चोभावास्ताम् । तदा तृतीयं किमपि नासीदिति । किन्तु श्रीमद्भागवतमार्कण्डेयभविष्यादीनि प्रतिपादयन्ति। यदादौ केवलं भगवान् एवासीत्। अनन्तरं प्रकृतिं प्रधानं वा स स्वीकरोतीति। मार्कण्डेयपुराणमते गुणानां वैषम्यात् प्रथमतः प्रधानं जातमिति । बृहद्धर्मं ब्रह्मणः उत्पत्तिविषये कथयति यत् पुरुषः प्रकृत्यास्त्रिभिर्गुणैः सात्त्विको राजसः तामसश्चेति त्रिधाभूत् । तेषु च यः सात्त्विकः स

एव प्रकृतेः परीक्षया राजसो ब्रह्मा भूत्वा सृष्टिं कृतवान् इति । किन्तु श्रीमद्भागवतं प्रतिपादयति यत् स्वयमेव भगवान् स्वनाभिकमलोद्भूते पद्मे ब्रह्मारूपेण प्रकाशितस्सन् सृष्टिं चकारेति । भविष्यद्पुराणं विष्णुपुराणं च तथैव प्रतिपादयतः । प्रकृतिः स्वतन्त्रतयाऽदौ अप एव सृष्ट्वा स्वयं नारायण इति ख्यातिं प्राप्तवतीति । पुराणस्यास्य विश्वासः। किन्तु भविष्यपुराणमते स्वयं भगवानेव प्रथमतोऽपः सृष्टवान्। स च भगवान् पृथिवीं प्रलयार्णवे निमग्नां दृष्ट्वा शेषशय्यायां शयान एव नारायणख्यातिं प्राप्तवान् इति भागवतं कथयति । प्रकृतेः यद् महत्तत्वं जातं तदेवैकविधं, तस्माच्च योऽहंकारो जातः स एव सात्त्विकादिभेदेन त्रिविध इति बृहद्धर्मं भागवतं च वर्णयतः । किन्तु मार्कण्डेयपुराणं विष्णुपुराणं च प्रतिपादयतः यत् सात्त्विकादिभेदेन महत्तत्वं त्रिविधमासीत् तस्माच्च जातोऽहंकारस्त्रिविधो जात इति । बृहद्धर्मे प्रतिपादितं ब्रह्मणो देहविभाजनं प्रायः सर्वेषु पुराणेषु समानरूपेण वर्तते । मनुशतरूपयोः पंचापत्यवत्वमपि सर्वाणि पुराणानि स्वीकुर्वन्ति। देवमानवसृष्टिरपि बृहद्धर्मपुराणमपि यथा वर्णयति तथान्यानि पुराणानि प्रतिपादयन्ति । तत्र न कोऽपि महान् विशेषो दृश्यते ।

पूर्वप्रतिपादनानुसारं बृहद्धर्मपुराणं जगत्सर्गं वर्णयित्वाऽऽत्मानं पुराणान्तर्भूतं कारयति । इतराणि प्रतिसर्गादीनि तत्त्वानि पुराणेऽत्र कथं प्रतिपादितानि तदेवाग्रे समीक्ष्यते ।

प्रतिसर्गः -

प्रतिसर्गो नाम जगत्प्रलयः पुराणेऽस्मिन् नैव वर्णितः । प्रतिसर्गस्य नियमः क्रमो वा तदभेदश्च यथान्यत्र वर्णितः तथाऽत्र नास्ति। केवलं जगत्सृष्टिप्रसंगे त्रिषु गुणेषु तमो गुण एव संहारहेतुरिति कथितम्।

त्रिषु देवेषु रुद्र एव संहारकृद् इत्यपि कथितम् । किन्तु स्पष्टरूपेण प्रलयवर्णनं नास्ति । किन्तु वयमत्र प्रासंगिकतया प्रतिसर्गं सूचयामः। प्रतिसर्गस्यास्य भेदप्रदर्शन-माध्यमेन कर्मात्र सूच्यते । पुराणानां मते प्रतिसर्गोऽयं चतुर्विधोऽस्ति । तथा हि भागवते-

[४१]नित्यो नैमित्तिकश्चैव तथा प्राकृतिको लयः।
आत्यन्तिकश्च कथितः कालस्य गतिरीदृशी ।।

किन्तु ब्रह्मपुराणं विष्णुपुराणं च प्रतिसर्गं त्रिविधं स्वीकुरुतः[४२] । ते च भेदा यथा- नैमित्तिकः प्राकृतिकः आत्यन्तिकश्चेति । तथापि ब्रह्मपुराणैः स्वीकृतत्वाच्चतुर्विधानां प्रलयानां परिचयोऽत्र दीयते ।

(क) नैमित्तिकः -

प्रलयोऽयं ब्रह्मणः दिवसावसानं रात्र्यागमे संभवति । सत्यं त्रेता द्वापरः कलिश्चेति चतुर्युगानां सहस्रेण ब्रह्मदिनं कल्प्यते । दिनमिदं "कल्प" इति कथ्यते। अत्र चतुर्दशमनूनां परिवर्त्तितो भवति । दिवसान्ते तावत् परिमिता रात्रिः भवति । सा रात्रिरेव प्रलयकाल इति कथ्यते । तदा त्रयो लोकाः प्रलयाय कल्पन्ते । स्वयं सृष्टिकृच्च विश्वमात्मसात् कृत्यानन्तशय्यायां शेते। अतो ब्रह्मरात्रिं निमित्तीकृत्य प्रलयोऽयं जायत इति हेतोः नैमित्तिकप्रलयनाम्ना निगद्यते[४३] ।

प्राकृतिकः -

परमेष्ठिनो ब्रह्मणो द्विपरार्द्धावसाने सप्त प्रकृतयः प्रलयाय कल्पन्ते। प्रलयेऽस्मिन् सम्पूर्णं ब्रह्माण्डं लीयते । प्राकृतिकप्रलयात्पूर्वं सांवर्तको मेघः शतवर्षाणि भूमौ नैव वर्षति । अतो निरन्नाः प्राणिनः क्षुधार्तिनस्सन्तः परस्परं भक्षयित्वा क्षयं गच्छन्ति । अनन्तश्च सांवर्तको

रविः सामुद्रं दैहिकं भौमं च रसं स्वरश्मिभिः पीत्वा सर्वं शुष्केन्धनप्रायं कारयति । तदा संवर्तकोऽग्निः संकर्षणमुखोत्थितः सन् सर्वं जगत् दहति । उपरिष्टादधस्ताच्च सूर्यानलौ ब्रह्माण्डं दहतः । ताभ्यां दहद्ब्रह्माण्डं दग्धगोमयपिण्डवत् दृश्यते । ततश्च प्रलयवातः शताधिकवर्षाणि वाति । तेन च स्वं रजसावृतं सद् धूम्रं भवति । तदनु चित्रवर्णानि मेघकुलानि शतवर्षाणि वर्षन्ति। तेन च समग्रं विश्वं एकोदकं भवति । तदाऽपो भूमेर्गन्धगुणं हरन्ति । ग्रस्तगन्धा पृथिवी ततः प्रलयाय कल्पते । अथ जलानां रसं तेजो गृह्णाति । नीरसानि जलानि च तेजसि लीयन्ते । वायुश्च तेजसो रूपं ग्रसते । अतो वायुराकाशे प्रविशति । तत आकाशस्य गुणं शब्दं भूतादिस्तामसोऽहंकारो ग्रसति । अत एव नभस्तमनु लीयते । तथा च तैजसाहंकारे सर्वाणीन्द्रियाणि वैकारिकाहंकारे देवाश्च लीयन्ते। अहंकारं महान् समाकर्षति । महान्तं च त्रयो गुणाः समाकर्षन्ति । त्रयो गुणाश्च स्वाव्यक्तरूपे तिष्ठन्ति । तदा पुरुषाव्यक्तयोः शक्तयः प्रलीयन्ते। अतस्तौ प्रधानपुरुषौ परमात्मनि सम्मिलितौ भवतः । अतः सर्वस्य ब्रह्माण्डस्य मुख्यतया प्रलये लय एव प्राकृतिकलयः[४४] कथ्यते ।

आत्यन्तिकः -

अयमेव जीवस्य जीत्वविनाशको मोक्षरूपः । अतो भिन्नभिन्नजीवानां कृते भिन्नभिन्नकालो संभवेत् । यस्य जीवस्य स्वसाधनबलेन भगवत्कृपया च ज्ञानं जायते तदाऽज्ञाननाशपूर्वकं संसारो नश्यति । संसारनाशात् च ब्रह्मानुभवो जायते । अयमेवात्यन्तिकप्रलय इति कथ्यते[४५] । भगवत्स्वरूपज्ञानार्थं

भ्रमरूपस्याज्ञानस्य विनाशः प्रथमतया करणीयः । यथा रज्जौ सर्पस्य भ्रमः भयस्य कारणं भवति तथा ब्रह्मणि जगत् भ्रमः संसारभयस्य कारणमस्ति । भ्रमरूपस्याज्ञानस्य नाशो वैराग्यखड्गेन कर्तुं शक्यते । संसारवैराग्यमिदं सांसारिकवस्तुनां पारमार्थिकसत्ताराहित्यविवेकेन भवितुं शक्यते । यद्यत् सांसारिकं वस्तु दृश्यते तत्सर्वमनित्यमिति बोधो भवति । नित्यं च वस्तु भवति केवलं ब्रह्मैव । एकमेव ब्रह्म जीवस्य भ्रमवशात् स्वरूपेण नाम्ना च प्रकाश्यते । यथा कटककुण्डलादयो-ऽलंकाराः आकारेण अभिधानेन च भिन्ना अपि स्वरूपतः सुवर्णादभिन्नास्तथा सांसारिकपदार्थाः आकारेण नाम्ना च भिन्ना अपि ब्रह्मणोऽभिन्नाः सन्ति । अतो ब्रह्म सत्यं जगन्मिथ्येति विवेकेन वैराग्यमागच्छति । अनेन क्रमेण ज्ञानोदयेनैव मोक्षः प्राप्तुं शक्यते । अतः संसारबन्धविमुक्तिरेव आत्यन्तिकलय इति सर्वशास्त्रसिद्धान्तः ।

नित्यः -

नित्यं जगत्यस्मिन् प्राणिनां यः क्षयो भवति स एव मुनिभिर्नित्य प्रलय इति कथ्यते[४६] । कालस्रोतसा ब्रह्मादीनां सर्वेषां प्राणिनाम् अवस्थासु परिवर्तनं भवति । तदपि नित्यलयान्तर्गतमस्ति । सूक्ष्मत्वेन परिवर्तनं परिणामो वा भवतीति हेतोः तस्य संदर्शनं सूक्ष्मज्ञाः कर्तुं शक्नुवन्ति ।

अनेन प्रकारेण चतुर्विधोऽयं प्रतिसर्गः पुराणानां वर्ण्यविषयत्वेन पुराणलक्षणकोटौ प्रविष्टः । बृहद्धर्मपुराणमिदं यद्यपि स्पष्टतया प्रतिसर्गं न वर्णयति, तथापि सूक्ष्मरूपेण तन्मूलं सूचयति । अतः कथंचित् प्रतिसर्गमपि वर्णयत्स्वपुराणत्वं प्रमाणयति ।

पादटिप्पणी

१. ग्रहगणिते कालामानाध्याये, श्लो. ६- भास्करः ।

२. तत्रैव, श्लो. ९- भास्करः ।

३. तत्रैव, श्लो. १५ भास्करः ।

४. तत्रैव, श्लो. १५- वासनाभाष्यम् ।

५. सि.शि.गणिते मध्यमाधिकारे कालामानाध्याये श्लो. २४-२५-२६ ।

६. सि. शि. ग्र. गणिते मध्यमाधिकारे कालमानाध्याये श्लो. ३२ भास्करः ।

७. तत्रैव, श्लो. १ भास्करः ।

८. यस्मात् क्षुब्दप्रवृत्तिपुरुषाणां महानस्य गर्भे, सि. शि. गोलाध्यायः ।

९. सि. शि. गो. कोशः ४ भास्करः ।

१०. सि. शि. गो. श्लो. ६२ तः ६५ भास्करः ।

११. सि. शि. श्लो. १५ भास्करः ।

१२. सि. शि. यन्त्राध्यायः, श्लो. १-२ भास्करः ।

१३. सूर्यसिद्धान्तः मध्यमाधिकारः, श्लो. १० भास्करः ।

१४. सि. तत्वविवेकः, म-अ- कालमानाध्यायः, श्लो. १४ तः २६ ।

१५. सि. शि. भास्करः ।

१६. सि. शि. भास्करः कालमानाध्यायः, १०-२८-२९ ।

१७. सि. शि. भास्करः ।

१८. सि. त. म. कालमानाध्यायः ३०तः ३४ कमलकाः ।

१९. यस्मात् क्षुब्धप्रवृत्तिपुरुषाणां महानस्य गर्भेऽहंकारोऽभूत् - - -
ततः संहतेश्च ब्रह्माण्डं यत्- - - - - - -महीपृष्ठनिष्ठ- - -
विश्वं शाश्वज्जयति परमं ब्रह्म तत् तत्वमाद्यम् ।

२०. सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चैव पुराणं पंच लक्षणम् ।।

२१. बृ. ध. पु.- १-२५-२०-२१ १।२ ।

२२. बृ. ध. पु. २-३१-१४ ।

२३. चक्रे देहं पंचभूतैस्तन्मात्रैरिन्द्रयाण्यपि । अधिष्ठाता भवेत्तत्र विष्णुर्जीवः स्वयं पुमान् । बृ. ध. पु. २-३२-७ ।

२४. बृ. ध. पु. २-३२-२५ ।

२५. बृ. ध. पु. २-३२-२५ ।

२६. तत्रैव, ३२-४२ ।

२७. स एष प्रकृतिं सूक्ष्मां दैवीं गुणमयीं विभुः ।
यदृच्छ्यैवोपगतामभ्यपद्यत लीलया , श्री. भा. ३-२६-४ ।

२८. श्री. भ. ३-८-१५ ।

२९. ससर्जाग्रेऽन्धतामिश्रमयतामिस्त्रमादिकृता ।
महामोहें च तमश्चाज्ञानवृत्तयः ।। श्री. भा. ३-१२-२ ।

३०. श्री. भा. ३-१२-११-१३ ।

३१. तत्रैव, ३-१२-२२ ।

३२. श्री. भा. ३-१२-२५-२७ ।

३३. इतिहासपुराणानि पंचमं वेदमीश्वरः । सर्वेभ्य एव वक्त्रेभ्यः ससृजे समदर्शनः । तत्रैव ३-१२-३९ ।

३४. तत्रैव, ३-१२-५५ ।

३५. मा. पु. ४२-३३-३४ ।

३६. मा. पु. ४२-६४ ।

३७. तत्रैव ४४-७ ।

३८. भ. पु., अ. १-२ ।

३९. ब्र. पु., अ. १-२ ।

४०. ब्र. वै. पु., अ. ९ ।

४१. श्री. भा. १२-४-३८ ।

४२. सर्वेषामेव भूतानां त्रिविधः प्रतिसंचारः ब्र. पु.- २३१-१; वि. पु. ६०-३०१।

४३. श्री. भा. १२-४-३-४ ।

४४. तत्रैव १२-४-२२ ।

४५. तत्रैव- १२-४-२३-३४ ।

४६. योऽयं संदृश्यते नित्यं लोके भूतक्षयस्त्विह ।
नित्यं संकीर्त्यते नाम मुनिभिः प्रतिसंचरः ।। कू. पु. ३ ४३६ ।

सप्तमोऽध्यायः

आकाशादिसद्वस्तुविवेकः

सद्वस्तुनि परमात्मन्याकाशो न संभवति । परन्तु तत्र सत्स्वभावो दृश्यते। आकाशे परमात्मनः सत्स्वभावः आकाशस्वभावश्चेति द्वयं विद्यमानं भवति । व्योम्नः शब्दः गुणः । 'शब्दगुणकमाकाशमिति" । असौ प्रतिध्वनिः परमात्मनः सत्स्वभावः, आकाशस्य स्वकीयः गुणः उभावप्युपलभ्येते । अनेन ज्ञातुं शक्यते यत् सद्रूपस्य परमात्मनः एकस्वभावत्वम् । आकाशे गुणद्वयं वर्तते। सद्रूपपरमात्मनि माया स्वकीयविक्षेपशक्त्या आकाशं परिकल्पयति। आदावियं माया आकाशात्मनोरभेदं परिकल्प्य तदा तद्गतधर्मधर्मिभावं वैपरीत्येनार्थादाकाशस्य धर्मान् आत्मनि, आत्मनः धर्मान् आकाशे च कल्पयति। वस्तुतः परमात्मनः सत्त्वम् आकाशे वर्तत इव दृश्यते। यथार्थरूपेण पर्यालोच्यते चेत् कारणस्य मृदः कार्यघटरूपमिव सद्वस्तुनः परमात्मनः आकाशत्वम् । सद्वस्तुनः आकाशरूपत्वं प्राप्तम् । लौकिकाः शास्त्रकारेषु तार्किकाश्च तद् वैपरीत्येन व्योम्नः आकाशस्य धर्मिणः सत्तां सद्रूपं परमात्मस्वभावं च जानन्ति। अन्यस्य अन्यथा प्रतीतिः मायया भवति । यत् शुक्त्यादि येन शुक्त्यादिरूपेणाऽस्ति तस्य तथात्वं शुक्त्यादिरूपत्वं प्रमाणतः भाति । रजतादिरूपत्वं भ्रान्त्या स्फुरति । अयं न्यायः सर्वलोकप्रत्यक्षः। श्रुत्यर्थविचारात् पूर्वं यद्वस्तु यद् सद्रूपं भ्रमवशात् येन आकाशादिरूपेण वर्तते तत् श्रुत्यर्थपर्यालोचनया विपर्येति । अर्थात् गगनादिस्वभावं परित्यज्य सद्रूपं ब्रह्मैव भवतीति जानाति ।

अतः श्रुतिविचारेण वस्तुनः यथार्थत्वं ज्ञताव्यम् ।

वाय्वादिषु भूतेषु सन् वायुः सत्तेजः सत् जलं सती पृथिवी इत्येवं प्रकारेण सतोऽनुवृत्तिः दृश्यते । आकाशः अन्यत्र भूतेषु नैव भासत इति यत् ज्ञानं तत्तु भेदबुद्ध्या भवति ।

रूपरसादिष्वनुवृत्तस्य द्रव्यस्येव आकाशवाय्वादिष्वनुवृत्तस्य सतः धर्मित्वं रसादिभ्यः व्यावृत्तस्य रूपस्यैवानिलादिभ्यः व्यावृत्तस्याकाशस्य धर्मत्वमिति ज्ञायते। ननु तर्हि घटाद्भिन्नस्य यथा वास्तवत्वं तथा सतः भिन्नस्य नभसोऽपि वास्तवत्वं स्यादिति चेदुच्यते- नभसः दुर्निरूपत्वात् । आकाशात्मकं सतः विलक्षणत्वादसदेव स्यादिति चेन्न । सतः विलक्षणस्यासत्वं नास्तीति वदतः तव कथने व्याघातदोषो भवेत् । "पूर्वोत्तरविरोध्यसंभवार्थकं वाक्यं व्याघातशब्देनोच्यते" । यथा "यावज्जीवमहं मौनी आसम् । ब्रह्मचारी च मम पितृचरणः, मम माता तु वन्ध्याऽऽसीत्, अपुत्रश्च मम पितामह इति यदि कश्चिद्वदेत् तत् व्याघातः । तद्वत् सतो विलक्षणस्यासत्त्वं नास्तीति वदतः तवापि स्ववचनव्याहतिः ।

माया भासते चेत् तन्मायिकस्य भूषणं भवति । यद्वस्तु स्वरूपेणा-विद्यमानपि भासते तत् स्वप्नगजादिवत् मिथ्या भवेत् । यथा- नियमेन सहोपलभ्यमानयोः जातिव्यक्त्योः देह-देहिनोः गुणद्रव्ययोः यथा पार्थक्यं यथा न दृष्टिगोचरं तथैव वियत् सतोः सहोपलभ्यमानयोः पार्थक्यमस्तीति कथने कोऽत्र विस्मयः ।

आकाशसद्वस्तुनोर्मध्ये भेदः वर्तते । यतः द्वयोः नाम्नोः मध्ये भिन्नता दृश्यते । शब्दद्वयमपि "वियत् - सती" परस्परपर्यायस्वभावं नास्ति । अतः तयोः परस्परं ऐक्यं न संभवति । सदाकाशाभ्यां

जायमानबुद्ध्योर्मध्ये पृथक्त्वं दृश्यते । अतः अनयोः भेदः । वाय्वादिषु सतोऽनुवृत्तिः दृश्यते । किन्तु आकाशेन सह एतादृशोऽनुसृतव्यवहारो नास्ति ।

अस्यैव नाम भेदज्ञानमिति । यथा- रूपरसादिषु वर्तमानं द्रव्यं धर्मीत्युच्यते। अधिकवृत्तित्वात् धर्मित्वं सतः संगच्छते । यथा- रूपरसादिगुणाश्रितं द्रव्यं एकैकस्य गुणस्याधिक्यात् व्यापकत्वाच्च धर्मीति वक्तुं शक्यते ।

अल्पदेशवृत्तित्वं व्याप्यत्वमुच्यते । अयमाधेयरूपः धर्मः । यथा– रूप-रसादिकमल्पवृत्तित्वाद् व्याप्यमिति कथ्यते । तथैव वायुः आकाशापेक्षया अन्यः। तस्मादयं धर्म आधेय इत्युच्यते ।

यद्याकाशः[१] सत्स्वभावयुक्तः इत्यनुक्त्वा अवकाशस्वभावयुक्त इति कथने को दोषः । यद्यप्याकाशः सद्भिन्नः तथाप्यसत् स्वभावो न भवति । यद्यसत् रूपोऽप्याकाशः भासते चेत् भासतु नाम । मायायाः प्रभावादसद्वस्त्वपि भासत इति मायावादिनां कृते अलङ्कारः । यद् असद् तदेव माया । यथा- स्वप्ने भासमानस्य गजादेः स्वरूपेण न प्रकाशते किन्तु भ्रान्त्या । ध्यानप्रमाण-युक्त्यादिभिः वियत्सतोः भेदे चित्ते निरूपिते सति आकाश कदाचित् न सत्यम्। किन्तु सर्वदा मिथ्यैवावभासते। सद्वस्त्वपि च्छिद्रवत् अवकाशवच्च नैव भवति । यदा ज्ञानिनः आकाशस्य प्रतीतिः स्यात् तदा निस्तत्त्वोल्लेखपूर्वक-माकाशज्ञानं जायते । एवमेव सद्वस्तुनोऽपि प्रकाशो भवति । तदानीमाकाशरहितं सद्वस्तुनः ज्ञानमपि जायते ।

वासनायाः दृढस्थितौ वियत्सतोः ज्ञाने आकाशं सदिति, आकाशरहितं सत् असदिति दृष्टवतः पुरुषस्य प्रवृत्तिं दृष्ट्वा बुधः विस्मयं प्रकटयेत्[२] ।

वायुसद्वस्तुविषये विवेकः -

आकाशकार्यस्य वायोः सद्वस्तुनः तादात्म्यप्रतीत्ययोगात् सतः विवेचन-मप्रयोजकमिति स्थिते साक्षात् सम्बन्धाभावेऽपि परम्परया सम्बन्धोऽस्तीति सत्ता निरूप्यते । सद्वस्तुनः एकस्मिन् स्थाने माया स्थिता भवति । मायायाः कस्मिंचिदंशे आकाशस्य स्थितिः । तथैवाकाशे वायुः परिकल्पितः । मायोपहितचैतन्ये आकाशकल्पिताधिष्ठानं नैव संभवतीति आशयः । तस्माद् आकाशोपहितचैतन्ये वायुकल्पनमासीत् ।

शोषगतिवेगाः इमे चत्वारः धर्माः वायोः भवन्ति । एवं सत् पदार्थे मायायामाकाशे च क्रमशः सत्ता, मिथ्यात्वं, शब्दश्चेति त्रयः स्वभावाः वर्तन्ते। ते सर्वेऽपि वायौ सन्ति । अर्थादेते त्रयः शीलविशेषाः धर्माः वायौ विद्यन्ते । वायुरस्तीति व्यवहारहेतु सद्रूपत्वं सद्वस्तुनः धर्मः । वायुसद्वस्तु विवेचिते सति यत् निस्तत्त्वस्वरूपं सः मायायाः धर्मविशेषः ।

तृतीयधर्मस्तु व्योम्नः सकाशादागतश्शब्दः । ननु व्योमविवेचनप्रस्तावे वाय्वादिषु[२] अनुवृत्तं सत् न तु व्योमेति भेदभिः " इत्यत्र वाय्वादावाकाशानु-वृत्तिर्निवारिता इति चेदुच्यते । शब्दस्यानुवृत्तिबलान्नोक्तदोषः।

अपि च ब्रह्मणः वायोः[३] विलक्षणत्वात् असत्त्वमिति चेत् तदानीमव्यक्त-रूपोऽयं वायुः मायायाः विलक्षणः । अतः विलक्षणत्वं भवतु इति चेन्न । वायोः मायामयत्वं निस्तत्त्वरूपतो भवति । न तु अव्यक्तरूपतः। अतः वायुः असद्रूपः।

किं च निस्तत्त्वरूपत्वम् अव्यक्तमायायां वायौ व्यक्तकार्येषु च विद्यते। मायायाम् अव्यक्तत्वमस्ति । मायाकार्येषु वाय्वादिषु व्यक्तत्वमस्ति ।

निस्तत्त्वरूपत्वे समानेऽपि मायायां तत्कार्येषु च किमर्थं तत्र

व्यक्ता-व्यक्तरूपेण भेदः क्रियत इति चेदुच्यते , मायायाः कारणत्वादव्यक्तमित्युच्यते। मायाकार्येषु स्थूलेषु इन्द्रियगोचरेषु व्यक्ताशब्दः प्रयुज्यते । अथवा असतः माया तत्कार्यरूपस्यावान्तरभेदो व्यक्ताव्यक्तरूप इत्यर्थः । वायौ यः सदंशः तद् ब्रह्मणः रूपविशेषः । शेषांशः निस्तत्त्वादिः वायोः रूपम् । शब्दस्पर्शादि-युक्तं वायोः यत्स्वरूपं तदधिष्ठानभूतब्रह्मस्वरूपानन्यत्वान्मिथ्येति कथ्यते । अर्थात् स च वायुः निस्तत्त्वरूपत्वादेव आकाशवन्मिथ्या । वेदान्तिनां मते आरोपितस्य पदार्थस्य सत्त्वमधिष्ठानतोऽन्यदिति नाङ्गीक्रियते । अतो वायोः मिथ्यात्वं चिरं वासयित्वा तं वायुं परित्यजेत् । अर्थाद् वायोः सत्यत्वं परित्यजेदिति ।

अग्निसद्वस्तुविषये विवेकः -

भूतसामान्यत्वाद्वायौ यत्स्वरूपं तत् तेजस्यप्यस्ति । प्रश्नोपनिषदि मायाया अधिष्ठानं सद्वस्त्विति प्रतिपादितम् । "सद्वस्त्वन्येकदेशस्था माया तत्र" । अनेन आकाशादीनां न्यूनाधिकभावः ज्ञायते । स तु न्यूनाधिकभावः लोके कुत्रापि न दृश्यते[४] इति चेदुच्यते । ब्रह्माण्डावरणेष्वेषा न्यूनाधिकविचारणा न त्वन्यत्र संभवति। अग्निः दशांशकः न्यूनः । अर्थादग्निः वाय्वपेक्षया दशमांशोऽल्पः । अग्निः न कोऽपि वास्तविकं पदार्थः । किन्तु वायुप्रकल्पितोऽयमग्निः भूतपंचके दशांशः तारतम्यमस्तीति पुराणेषु वर्णितमस्ति[५] ।

अग्निरुष्णः, प्रकाशरूपश्च । वायौ वर्तमानाः सर्वेऽपि गुणाः (धर्माः) अग्नावनुगच्छन्ति । अत एवोच्यते अग्निरस्तीति । किन्तु अग्निः मिथ्यारूप-शब्दवान् स्पर्शवानिति । परमात्मनि सत्त्वमस्ति । मायायां मिथ्यात्वमस्ति । आकाशे शब्दः वर्तते । वायौ स्पर्शो विद्यते। अग्नौ रूपमस्ति। सद्व्यतिरिक्तं सर्वं मिथ्या।

एतदण्डं विशेषाख्यं क्रममृदैः दशोत्तरैः ।
त्वचादिभिः परिवृतं प्रधानेनावृतं बहिः ।।

जलसद्वस्तुविषये विवेकः -

सतोऽग्नेर्विवेचनानन्तरमधुना जलसद्वस्तुनो विषये विचारः क्रियते । अग्नेरपेक्षया जलं दशमांशको न्यूनमस्ति । जलमेतद् उपहितचैतन्ये कल्पितमस्ति। कारणगतधर्मानुसारेण आप इति वदन्ति। शब्दस्पर्शरूपयुक्तं जलं मिथ्या भवति। जलस्य मिथ्यात्व तद्गतधर्मा अपि मिथ्याभूताः । जलस्य स्वकीयगुणः रसः । यदा सतोऽन्यः आप इति विवेचितः तदानीं तासामपां मिथ्यात्वं निश्चितं भवति । सदेवाविनाशिकारणत्वात्[६] ।

पृथिवी सद्वस्तुनो विवेकः -

भूमिः दशमांशतः सद्वस्त्वपेक्षया न्यूना । तत्रोपहितचैतन्ये जलमपि कल्पितमस्ति । पृथिवी अस्तीति कथनं मिथ्या, कार्यस्य मिथ्यात्वाङ्गीकारात्। शब्द-स्पर्श-रूप-रसश्चेति चत्वारो गुणाः जले सन्ति । पृथिव्या उत्पत्तिः जलाद्भवति[७]। कारणं जलम् । कार्यं पृथिवी । कारणे वर्तमानाः गुणाः पृथिव्यां वर्तन्ते । पृथिव्याः स्वकीयः गुणः गन्धः । सत्त्वमेतेभ्यः सर्वेभ्यः गुणेभ्यः पृथक् भवति । यदि पृथक् सत्त्वं पृथिव्याः तर्हि मिथ्यात्वं स्वयमेव सिध्यति । सर्वेषां पदार्थानां कारणं सद् भवति । कारणस्य सत्तामेव प्रायः सर्वे स्वीकुर्वन्ति, न तु कार्यस्य । तस्मात् कार्यरूपस्य पृथिवीभूतस्य मिथ्यात्वं स्वतः सिद्धम् ।

पादटिप्पणी

१. वासनायां प्रवृद्धायां वियत् सत्यत्ववादिनाम् ।
सन्मात्रावबोधयुक्तस्य दृष्ट्वा विस्मयते बुधः ।। ७६ पं. द. ।

२. आद्यो विकारः आकाशः सोऽवकाशद्विस्वभावकः ।
नावकाश सति व्योम्नि सचैषोऽपि द्वयस्थिततम् ।। प.वि.प्र. ७० ।

३. प्र. उ. २-६७ ।

४. प्र. उ. २-७८ ।

५. श्री. भा. ३-२६ ।

६. सतो विवेचिते वह्नौ मिथ्यात्वे सति वासिते ।
आपो दशशतो न्यूनाः कल्पिता इति चिन्तयेत् ।।
सन्त्यापोऽमूः शून्यतत्त्वाः सशब्दस्पर्शसंयुताः ।
रूपवत्योऽन्यधर्मानुवृत्त्या स्वीयो रसो गुणः ।।
सतो विवेचितास्वप्सु तन्मिथ्यात्वे च वासिते ।
पं. वि. प्र. ९१ तः ९३ ।

७. भूमिर्दशांशतो न्यूना कल्पिताऽप्स्वति चिन्तयेत् । पं. वि. प्र. ९३ ।
अस्तिभूस्तत्त्वशून्यास्यां शब्दस्पर्शौ सरूपकौ ।
रसश्च परतो गन्धो नैजः सत्ता विविच्यताम् ।। पं. वि. प्र. ९४ ।
पृथक् कृतायां सत्तायां भूमिर्मिथ्यावशिष्यते । पं. वि. प्र. ९५ ।

अष्टमोऽध्याय:

भूतानां सृष्ट्युपयोगित्वम्

आवरणविक्षेपशक्तियुक्तं सत्त्व-रज-स्तमोगुणयुक्तं चाज्ञानं ब्रह्मविषयीकृत्य ब्रह्माश्रित्य च वर्तते । अज्ञानस्यावरणशक्त्यावच्छिन्ने ब्रह्मणि त्रयोऽपि गुणा: सर्वदा भवन्ति । यदा तमो गुणोऽन्यगुणापेक्षया सक्रियो भवेत्, तदा ब्रह्मरुपाधिष्ठाने अज्ञानादाकाशस्योत्पत्ति: दृश्यते। आकाशाद्वायु: वायोरग्निरग्नेराप: अद्भ्य: पृथिवी चोत्पद्यते । तत्र तमोगुणस्याधिक्यात् जडता परिदृश्यते । एतेभ्यो भूतेभ्य: सर्वाऽपि सृष्टिर्जायते । वेदान्तग्रन्थेषु एकरूपेण सृष्टिवाक्यानि नैव दृश्यन्ते । क्वचिदाकाशादिना सृष्टि:, क्वचिद् मनस आरभ्य, कुत्रचित् तेज आदिना सृष्टि:, क्वचित्सर्वमसृजदिति क्रमं सृष्टेरेकरूपतैवाव-गम्यते। तथा हि प्रकृते: महान्, महत: अहंकार:, अहंकारात् तन्मात्राणि, तस्मात् दशेन्द्रियाणि , मन:, व्यक्तानि पंचभूतानि जायन्त इति कश्चन क्रम: दृश्यते । अत: सृष्टिवाक्यान्येकरूपाणि न सन्ति ।

वयमक्रमां सृष्टिमनियतक्रमां सृष्टिं वा नाङ्गीकुर्महे । भूतभौतिकसृष्टि: आकाशाद्भवति । करणानामिन्द्रियाणामभौतिकत्वेन मन आदिना करणसृष्टि:। युगपत् सर्वेषामपि सृष्टि: न हि संभवति । "तत्तेज असृजत" इति छान्दोग्योपनिषद्वाक्ये क्रमो नाम्नात: । अत उपनिषत्सु सृष्टिक्रमो न संभवति, न आदौ परमेश्वर: आकाशं वायुं च सृष्ट्वा तत: तेजो वर्णान् अकरोदिति योजना कर्त्तव्या । अतो विरोधो नास्ति । तस्माद्भौतिकानामभौतिकानां च स्वतन्त्रं क्रमान्तरं च वर्तत इति मन्तव्यम्।

आकाशादीनि पंचभूतान्यपंचीकृतानि तन्मात्रपदवाच्यानि जायन्ते । या तु मन आदिनासृष्टिः "तन्मनोऽसृजत" इत्यादिना सेन्द्रियसृष्टिक्रमविषया न तु भौतिकसृष्टिक्रमस्य विरोधोऽनेनावगम्यते। यदुक्तमाकरे "अन्तराविज्ञाना-धिकरणे" अथवा भौतिकानि करणानि, तथा भूतोत्पत्तिक्रमो न विशेष्यते । प्रथमं कारणान्युत्पद्यन्ते, चरमं भूतानि, प्रथमं वा भूतान्युत्पद्यन्ते चरमं वा करणानानि इति । आथर्वणे तु समाम्नाय क्रममात्रं करणानां भूतानां च न तत्रोत्पत्तिक्रम उच्यते "तथान्यत्रापि पृथगेव भूतक्रमात् करणक्रम आम्नायते। "प्रजापतिर्वा[१] इदमग्र आसीत्" । स आत्मानमैक्षत स मनोऽसृजत, तन्मन एवासीत् तदात्मानमैक्षत तद्वाचमसृजतेति यदत्रेन्द्रियादीनां भौतिकत्वं निरूपितं तत्पक्षान्तरमनुसृत्य विहितम्। यदि तावत् करणानि यदि भौतिकानि ततो भूतोत्पत्ति प्रलयाभ्यामेवैषामुत्पत्ति-प्रलयौ भवतः इत्येतयोः न गक्रमान्तरमिति आकरग्रन्थे प्रतिपादितम् । करणानां भौतिकत्वे लिङ्गं दृश्यते। "अन्नमयं[२] हि सोम्य मन इत्यादिकम् इति । "तदभिधानादेव तु तल्लिङ्गात्"[३] इत्यत्र सूत्रभाष्ये वाय्वादीनामपि ब्रह्मकार्यत्वं श्रूयते ।

सांख्यमतमपि "करणानि अभौतिकानि" इति मतं समर्थयति। न तु भौतिकत्वपक्षम् । "अभिमानादहंकार[४] तस्माद्विविधः प्रवर्तते सर्गः । एकादशश्च गणकाः तन्मात्रपंचकः" इति । सांख्यकारिकाऽपि शङ्करभागवत्पादमतं समर्थयति। करणं भौतिकत्वमतं परिभाषाकारादिभिः समर्थ्यते । वेदान्तसारादि-ग्रन्थेष्वपि कारणभौतिकत्वपक्ष एव समर्थितः । अतः प्रकृते न दोषः ।

एवं च सांख्यानां पंचविंशतितत्त्वानि योगिनां षड्विंशतितत्त्वानि

इत्यादिसिद्धान्तः तैरङ्गीकृतः । सर्वेऽपि प्रकृत्यादिसत्त्वाभिप्रायेण विहिताः । अद्वैतिनां मते ब्रह्मैव सत्यमिति एकमेव पारमार्थिकं तत्त्वम् । योगिनामेव षड्विंशतितत्त्वानि । व्यावहारिकतत्त्वानि वेदान्तिनां मतेऽपि दृश्यन्ते । अयं तु सृष्टिक्रमः व्यावहारिकः । तस्मात्सृष्टिक्रमः योगमतानुसारेण भवतु वान्येन तत्र नास्त्यद्वैतिनां कापि क्षतिः । अद्वैतयोगमतयोरयं विशेषः यत् केवला प्रकृतिः परिणामि कारणम् , ईश्वरस्तु निमित्तकारणमिति योगिनां मतम् । अद्वैतमते तु ब्रह्मैव परिणामिकारणम् इति माया निमित्तकारणम् । यत्तु ब्रह्म अभिन्ननिमित्तविवर्तोपादानत्वं ब्रह्मेतरमिथ्यात्वादिकं जीवब्रह्माभेदादिकं च औपनिषदामद्वैतिनामभिमतम् । तत्पारमार्थिकमुख्यतत्त्व-व्यवस्थापनार्थम् । योगादिमतस्य व्यवहारतोऽप्यशुद्धत्वं निरूपयितुं न शक्यते ।

अपि चेयमद्वैतमतस्य महिमा यत् सर्वाणि मतान्युपस्थाप्यन्ते । स्वमतं परिपाल्यते च । श्रीमद्रामानुजाचार्यास्तु मतमद्वैतमसत्यमिति निरूपयतः स्वमतं स्थापयन्ति । अनेनाद्वैताचार्याणां समताबुद्धिः कीदृशीत्यवगम्यते । अन्येषामाचार्याणां विषमता सर्वैः ज्ञातुं शक्यते ।

शब्दतन्मात्रादाकाशः, शब्दतन्मात्रसहितात् स्पर्शतन्मात्राद्वायुः । शब्दः स्पर्शश्च गुणौ, शब्दस्पर्शतन्मात्रसहिताद्रूपतन्मात्रात् तेजः, शब्दस्पर्शरूपाणि गुणाः, शब्दस्पर्शरूपतन्मात्रसहितादापः, शब्दस्पर्शरूपरसाः गुणाः, शब्दस्पर्शरूपरस-तन्मात्रात् गन्धतन्मात्रात् पृथिवी, शब्दस्पर्शरूपरसगन्धा जायन्त इति सांख्यतत्त्व-कौमुद्यां वाचस्पतिमिश्राः वदन्ति ।

आकाशाद्युत्पत्त्येदमवगम्यते यत् आत्मचैतन्यं यथाकाशस्य कारणं तथा आकाशोऽपि वाय्वादीनां भूतानां कारणं भवति, परन्तु आत्मचैतन्या-काशयोर्मध्ये अयमस्ति भेद: यत् सर्वस्यापि जगतोऽभिन्ननिमित्तोपादानकारणं भवति आत्मचैतन्यम्। आकाशस्तु वाय्वादीनां निमित्तमेव कारणं नतूपादानम्। मूलकारणं तु अज्ञानोपहितं चैतन्यम् । आकाशादीनामुत्पत्तौ पूर्वपूर्वभूताना-मावश्यकत्वमस्ति उत्तरोत्तरोत्पत्त्यर्थं पूर्वपूर्वभूतानामावश्यकत्वमस्ति । यथाकाशे वायु: गतिमान् भवति । वायुना तैजस: प्रज्वलनगति: । औष्ण्याधिक्ये वृष्टिर्भवति । जलेन सूक्ष्मस्य विनाशे सति स्थूलस्य पार्थिवद्रव्यस्योत्पत्तिर्भवति। अत: आकाशादीनां भूतानामुत्तरोत्तरकारणत्वं पूर्वपूर्वपदार्थानां वर्तत इत्यस्वीकारे सर्वाण्यपि द्रव्याणि एकस्मिन्नेव दण्डे उत्पद्यन्त इति वक्तव्यम् । अत: आकाशादीनि भूतान्युत्तरोत्तर-भूतानां कारणानि सन्ति । अत एव प्रलयकाले उत्तरोत्तरभूतानां स्थिति: पूर्वपूर्व-भूतेष्वाश्रित इत्यवगम्यते। अन्ते अज्ञानोपहित-चैतन्ये सर्वोपादाने लय: श्रूयते । कार्यविनाश: कारणेषु भवतीति नास्ति नियम: । यथा पूर्वपूर्वभूतानाम् उत्तरोत्तर-भूतोपादानत्वे उत्तरोत्तरभूतेषु पूर्वपूर्व-भूतानां तद्गुणानां चान्वयाभावात् तेषां तन्मात्रत्वं सूक्ष्मत्वं च हीयेत ।

प्रथममुत्पन्नानामाकाशादीनां सूक्ष्मभूतानां सूक्ष्मत्वमादावुक्तम्। महाभूतोत्पत्तौ यद् असामर्थ्यं तदेवात्र सूक्ष्मतेति शब्देन निर्दिश्यते । यावत्पर्यन्त-माकाशादीनि भूतानि तन्मात्राणि स्यु:, यावत्पर्यन्तं भूतानां मिश्रणं परस्परं न स्यात्, तावत्पर्यन्तमाकाशादीनां महाभूतानामुत्पादने सामर्थ्यं न स्यात् । तन्मात्राणां महाभूतोत्पत्त्यसमर्थनद्योतनमेव

सूक्ष्मशब्देन सूच्यते । यावत्पर्यन्तं भूतानां पंचीकरणं न स्यात् तावत्पर्यन्तं भूतानि सूक्ष्माणि तन्मात्राणीति चोच्यन्ते । पंचीकृतेभ्यः भूतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि च जायन्ते। सूक्ष्मशरीरं नाम अत्यन्तसूक्ष्मं लघुशरीर-मित्यर्थः । इदं च सूक्ष्मशरीरं द्रष्टुं न शक्यते। स्पर्शनमपि कर्तुमयोग्यमिदं शरीरम्। अनेन शरीरेण सुखदुःखानुभवो न भवति । अस्यैव नामान्तरं लिङ्गशरीरमिति । लिङ्ग्यते ज्ञाप्यते प्रत्यगात्म-सद्भाव एभिरिति लिङ्गानि तानि शरीराणि । प्रतिष्ठत्वात् शरीरसाधनत्वाद्वा धर्मादिद्वारेण इति लिङ्गशरीराणि । तथा चायं प्रयोगः - विमतानि इन्द्रियाणि प्राणश्च स्वातिरिक्तस्वानुगतचैतन्याधिष्ठानपूर्वकप्रवृत्तयः, अचेतनत्वात् रथादिवत् इति "प्राणस्य प्राणभूतचक्षुषः चक्षुः, उत श्रोत्रस्य श्रोत्रं, मनसः ये मनो विदुः इति" यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणम्" इत्येवं जातीयकाश्च श्रुतयः प्रमाणानि ।

सूक्ष्मशरीराणि सप्तदशावयवानि लिङ्गशरीराणि कानि इति चेत् पंचीकरणवार्तिके सुरेश्वराचार्यः तेषां संख्याविषये इत्थम् आचचक्षे।

ज्ञानेन्द्रियाणि पंचेव पंच कर्मेन्द्रियाणि च ।
मनोबुद्धिरहंकारश्चित्तं चेति चतुष्टयम् ।।
प्राणोऽपानस्तथा व्यानोदानाख्यस्तथैव च ।
समानश्चेति पंचेताः कीर्तिताः प्राणवृत्तयः ।।
खंवाय्वग्न्यब्धरित्र्यश्च भूतसूक्ष्माणि पंच ।
अविद्याकामकर्माणि लिङ्गं पुर्यष्टकं विदुः ।

ज्ञानेन्द्रियपंचकं, कर्मेन्द्रियपंचकं, वृत्तिचतुष्टयोपेतमन्तःकरणम् , पंचवृत्तिकः प्राणः इति सप्तदशावयवा इति अत्रोक्तानां

सप्तदशावयवानां भूतसूक्ष्माण्युपादानानि। तदुपादानं चाविद्या । तस्मादुपादानोपादेययोरभेदात् भूतसूक्ष्मेभ्योऽविद्या न पृथगिवानुभूयते। लिङ्गशरीरेभ्योऽविद्या न पृथगिवानुभूयते।

लिङ्गशरीरेभ्यः भूतसूक्ष्माणि पृथक् नाभिप्रेयन्ते । कामकर्मणोरपि अन्तःकरणवृत्तित्वेन तदाश्रितत्वेन च तद्भेदात् न पृथक्त्वं स्वीक्रियते । तथा च "सप्तदशः प्रजापतिः" इति श्रुतेः प्रजापतेः हिरण्यगर्भस्य सप्तदशावयवत्वा-भ्युपगमात् सप्तदशावयवमेव लिङ्गशरीरमिति ज्ञातव्यम्। "मुख्यं तु सप्तदशकं प्रथितं हि लिङ्गम्" इत्यभियुक्तैरुक्तत्वात् ।

न्यायवैशेषिकदर्शने अवयवशब्दस्यार्थद्वयं प्रसिद्धमस्ति । समवायि-कारणकोर्थः एकः, तद्घटकश्च द्वितीयः । यथा घटपटादीनां कपालतन्त्वादीनां "अवयुवन्ति नवीनद्रव्यस्योत्पादनाय मिश्रीभवन्ति मिथः संयुज्यन्ते" अनया व्युत्पत्त्या घटपटादीनाम् आरम्भकस्य संयोगस्यारम्भकत्वात् आश्रयत्वाद्वा कपालादीनाम् अवयवाः उच्यन्ते। एवं परार्थानुमानभूतन्यायवाक्यस्यार्थावबोधार्थम् "अवयुवन्ति-घटन्ते परस्पराकांक्षालक्षणं मिश्रणं लभन्ते" । अनेन प्रकारेण प्रतिज्ञाहेतूदाहरणादीनां न्यायवाक्यस्यावयवा उच्यन्ते । येऽवयवाः सूक्ष्मशरीरस्येत्युक्ताः ते समवायि-कारणावयवेषु अथवोपादानकारणावयवेषु वा तद्घटकार्येषु । वेदान्तमतानुसारेण अवयवावयविभावो नाङ्गीक्रियते । किन्तु परिणामिपरिणामभावोऽङ्गीक्रियते । अतः नैयायिकोक्तः प्रथमार्थो न संभवति। अपि तु अवयुवन्ति घटन्ते ब्रह्मस्वरूपावरणाय मिथः सहयोगं लभन्ते" । अनया उत्पत्त्याऽऽवरणकारीकोशः इत्यस्मिन्नर्थे संभवति।

ज्ञानेन्द्रियाणि नाम ज्ञानस्य कारणभूतानीन्द्रियाणि ज्ञानेन्द्रियाणि। ज्ञानेन्द्रियाणि- श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि । श्रूयते अनेन इत्युत्त्यायेनेन्द्रिये-णाकाशस्य गुण: शब्द: श्रूयते तन्नाम श्रोत्रेन्द्रियम् । त्वच्यते संम्रियते देहोऽनया अनेन शरीराच्छादकं कर्म नामत्वगिन्द्रियमिति । स्पर्शस्तु त्वगिन्द्रिये वर्तते । अत: स्थानस्य वाचकत्वात् चर्मबोधक: त्वक्शब्द: स्पर्शग्राहकेन्द्रियस्य लाक्षणिकं नाम भवति । येनेन्द्रियेण स्पर्शनं भवति तद् स्पर्शग्राहकमिन्द्रियम्। चष्टेऽनेन नीलादिरूपाणीति व्युत्पत्त्या चक्षुण् शब्दस्य रूपदर्शीन्द्रियबोधकत्वं दृश्यते । "ह्वयते शब्दायते अनेन" अनया रीत्या शब्दोच्चारण साधनभूताया: जिह्वाया: बोधको भवति । अत्र रसग्राहकमिन्द्रियं स्थीयते । स्थानवाचकत्वा-द्रसनेति लाक्षणिकं नामेन्द्रियस्य भवति। रस्यते स्वाद्यते अनेन रसग्राहकस्ये-न्द्रियस्य बोधकं भवति। घ्राणशब्द: गन्धग्राहकेन्द्रियबोधक: । जिघ्रति गन्धं गृह्णातीति ।

इन्द्रियाणामुत्पत्तिप्रकारस्तु इत्थम् - आकाशादिगतसात्त्विकांशेभ्य: श्रोत्रस्य, वायुगतसात्त्विकांशेभ्य: त्वच:, तेजस: सात्त्विकांशेभ्य: चक्षुष:, जलगतसात्त्वि-कांशेभ्य: जिह्वाया:, पृथिव्या: सात्त्विकांशेभ्य: घ्रास्योत्पत्ति: दृश्यते । अनेन ज्ञानेन्द्रियाणां साख्यमताभिमताहंकारजन्यत्वं वेदान्तिभि: नाङ्गीक्रियते । त्रिगुणात्मकप्रकृते: महत्तत्वं, ततोऽहंकार:, पश्चात् पंच तन्मात्राणि, तत् इन्द्रियाणी-त्युत्पत्ति: दृश्यते । अयं तु उत्पत्तिक्रमो वेदान्तिनां विरुद्ध:। अतोऽऽकाश: नित्य: विभुश्च । कर्णशष्कुल्यवच्छिन्नं नभ: श्रोत्रम् । कर्णछिद्रमेव शब्दग्राहकं श्रोत्रेन्द्रियमिति यत् न्यायमतं

तद्वेदान्तिनः न सम्मतम् । बुद्धिमनसी लिङ्गशरीरस्यावयविनी स्तः। निश्चयात्मिकाऽन्तःकरणवृत्तिः बुद्धिः । संकल्पविकल्पात्मकान्तःकरणवृत्तिः मनः। अनयोरेव चित्ताहंकारयोः अन्तर्भावः। इदमित्थमित्यध्यवसायः निश्चयः । इदं नीलम् इदं पीतमिति विषयविश्लेषणं संकल्पः । तद्विपरीतस्तु विकल्पः । अनुसंधाना-त्मिकान्तःकरणवृत्तिः चित्तमित्युच्यते । अभिमानात्मिकान्तःकरणवृत्तिरहंकारः . विषयपरिच्छिन्नरूपत्वाविशेषात् बुद्धौ चित्तस्यान्तार्भावः, संकल्पात्मकाविशेषात् अहंकारस्य मनस्यन्तर्भावः । एवं स्वरूपाभेदेऽपि कुत्रचिद्विषयभेदात् चित्ताहंकारयोः बुद्धिमनोभ्यां पृथक्तया निर्देशः श्रूयते । धर्मराजध्वरीन्द्रोऽपि विभागममुं समर्थयति। परन्तु श्रीसदानन्दः चित्ताहंकारयोरन्तर्भावं बुद्धिमनसोः समर्थयति । निश्चयात्मिका-दनुभवात् स्मरणस्योत्पत्तेः स्मरणस्य निश्चयात्मिका बुद्धेरन्यत्वस्वीकारे किमप्यौचित्यं नास्ति । गर्वस्याप्युत्कर्षविषयत्वात् गर्वं मनस्यन्तर्भावयति ।

बुद्ध्यादिरूपान्तःकरणमपि ज्ञानेन्द्रियं भवति । तथापि तदुत्पत्तिः आकाशादिप्रत्येकैर्भूतैः सत्त्वगुणयुक्तैः न भवति । एते पुनराकाशादिगत-सात्त्विकांशैर्मिलितैः जायन्ते । बुद्ध्यादीनाप्राकाशात्मकत्वात् सात्त्विकांशकार्यत्व-मवगम्यते । सत्त्वरजस्तमो गुणेषु सत्त्वगुणस्य प्रकाश-जनकत्वं प्रकाशात्मकत्वं च सर्वैः दार्शनिकैरङ्गीक्रियते[1] । निश्चयात्मिका बुद्धिः पंचज्ञानेन्द्रियैः मिलित्वा विज्ञानमयकोशो भवति । अयं विज्ञानमयकोशा-वच्छिन्नः चिदात्मा जीव इत्युच्यते। अयं कर्तुत्वभोक्तृत्वादियुक्तः

इहलोकपरलोकगामी व्यावहारिको जीव[6] इत्युच्यते। कर्तुत्वमात्मनो न यथार्थं किन्तु अभिमानिजन्यमिति[7] ध्यानं करोतीव लेलायतीव इत्यादिरूपेण श्रुतौ जीवविषये उक्तत्वात् तद्गतेवशब्देन व्यवहारस्याभावरूपत्त्व-मवगम्यते । "कर्त्ता शास्त्रार्थवत्वात्" "यथा च तक्षोभयथा" इति कर्तुत्वाकर्तुत्वयोः व्यावहारिकत्व-पारमार्थिकत्वे व्यवस्थापयतः ।

कर्मसाधनानि कर्मेन्द्रियाणि भवन्ति । वाक्पाणिपादपायूपस्थानां वचन-आदान-गमन-निसर्ग-आनन्दसाधनेन्द्रियत्वं यथाक्रमं प्रत्येकं लक्षणमिति ज्ञातव्य.म्। शब्दोच्चारणस्य साधनं वागिन्द्रियम् । वक्ति जयान् इति व्युत्पत्या वागिन्द्रियस्यार्थः शब्दोच्चारणसाधनभूतमिन्द्रियमिति । पणते व्यवहरति किं वा पणायति स्तौति येन इन्द्रियेण अनया व्युत्पत्त्या पाणीन्द्रियस्यार्थो भवति। पद्यते गच्छति येनेन्द्रियेण तत् पादम् । मलत्यागं कृत्वा शरीरस्य रक्षां करोतीति पायुरित्युच्यते । पाति रक्षति येनेन्द्रियेण, अर्थात् मलत्यागसाधनरूपेन्द्रियेण। उपतिष्ठति पुरुषः स्त्रियं स्त्री वा पुरुषं येनेन्द्रियेण तद् उपस्थ । कर्मेन्द्रियाणामुत्पत्तिस्तु[8] आकाशादिरजोऽंशेभ्यः पृथक् भवति । एतानीन्द्रियाणि वाक्याणि पादपायूपस्थाख्यानि ।

प्राणापानव्यानोदानसमानाः पंच वायवः सन्ति । "प्रणिति" प्रकर्षेण अनिति यः स प्राणः । जीवो यदा शरीरं परित्यजति तदा प्राणोऽग्रेसरति । तस्य नासाग्रवर्तित्वं सर्वैरङ्गीक्रियते । तैत्तिरीयब्राह्मणे[9] प्राणस्य स्थानं हृदयमिति लिखितमस्ति । तथापि नासाग्रे

प्रत्यक्षमुपलभ्यमानत्वात् नासाग्रवर्ती प्राण इत्युच्यते[१०] । ब्राह्मणं वेदान्तान्तर्गतं भवति । तथापि वेदप्रामाण्यमविगणय्य कथं वेदान्तसारग्रन्थकर्त्ता प्राणस्य नासाग्रस्थानवर्त्तित्वं ब्रूते इति चेदुच्यते - प्राणक्रियायाः उपलब्धिस्थाननिरूपणमेव सदानन्दस्य यतः तात्पर्यम्। अतः विरुद्धं वेदस्य किमपि नोक्तम् ।

अपकर्षेण अनितीति अपानस्योत्पत्तिः । अधो नाभेरधस्तात् गमनवान् मलापनयनव्यापारेण वायुः तत्स्थानवर्ती[११] । अयं च अपानवायुः स्वस्थाने सक्रियो भवतीति कृत्वा अपश्वास इत्यपि कथ्यते। विष्वग् अनिति अर्थात् शरीरस्य परितः यो वायुरस्ति तन्नाम व्यान इति । मनुष्यः यदा बलसाध्यं विशेषं कर्म करोति तदा प्राणापाननियन्त्रणं कृत्वा बलेन कार्यं करोति । अत्र कार्ये सहायकस्य वायोर्नाम भवति व्यान[१२] इति । प्राणापानयोः सन्धिरूपो व्यानाख्यो वायुर्भवति। अत्र सन्धेरर्थो भवति निरोधकत्वम् । यो वायुः कमपि विशेषं कार्यं कर्त्तुं प्राणापानयोः वृत्तिमवरुणद्धि स एव व्यानः । यदा प्राणापानयोरभिभूय कश्चन विशेषो वायुः सम्पूर्णं शरीरमाप्नोति तदा शरीरे सामर्थ्यमागच्छति । तत्सामर्थ्यबलात् काठिन्यं कर्म सम्यक् सम्पादयति। आहवनीयवह्नेरुत्पादनार्थं बलमावश्यकम् । युद्धभूमौ जीवनेन युद्धात् पलायनं कर्त्तुं विशेषस्य बलस्याव-श्यकत्वमस्ति । धनुषः प्रयोगार्थं विशेषं बलमनिवार्यं भवति । उपयुक्तानां कर्मणां सुसम्पादनार्थं विशेषं बलमत्यावश्यकम्[१३] ।

उदु आ अनिति अर्थादूर्ध्वमाक्रम्य योऽनिति स उदानः । अस्यैवोत्कर्मण-वायुरिति नामान्तरम्[१४]। कण्ठे स्थित्वा बहिर्गमनं

करोतीति कृत्वा कण्ठ-स्थानमस्य। बृहदारण्यकोपनिषदि[१५] नेत्रादिस्थानादस्य वायोः बहिर्गमनमुल्लिखितं किन्तु कण्ठावरोधपूर्वकमस्य वायोः उत्क्रमणत्वात् कण्ठस्थानमिति कथनं युक्तियुक्तम्। यद्येवं नाङ्गीक्रियते तर्हि कण्ठावरोधपूर्वकमस्य वायोः उत्क्रमणं न स्यात् । अतः कण्ठस्थानमेवास्य वायोर्भवति ।

समीकरणाय अनिति यो वायुः सः समानः प्राणिना अद्यमानं पीयमानं वायं वायुः समीकरणं करोति । समीकरणं नाम परिपाकत्वम्[१६] । अयं वायुः जठराग्निं सम्यक् प्रज्वाल्य तेन स्वसाध्यं पचनक्रियां सम्पादयति । अनया प्रक्रियया भुक्तं पीतं च रसरक्तशुक्रादिरूपेण परिणम्य सर्वं शरीरं व्याप्नोति। प्रश्नोपनिषद्यपि समानवायोः विषये लिखितमस्ति । प्राणापानवायोः मध्यभागे अयं समानवायुः तिष्ठति । जाठराग्नौ प्रक्षिप्तमन्नं समानं करोति अर्थात्[१७] जीर्णं करोति । विचारोऽयं छान्दोग्योपनिषद्यपि दृश्यते । भुक्तमन्नं त्रिधा विभज्यते। यदा समानवायुनोदीप्तः जाठराग्निरन्नं जीर्णं करोति, तदा तस्य स्थूलभागः पुरीषो भवति । सूक्ष्मभागः रक्तादिरूपेण परिणमते । सूक्ष्मतमभागः तद् मनोरूपेण परिणमते[१८] ।

पीतस्य जलस्य त्रेधा विभागः क्रियते । स्थूलभागः जठराग्निं प्रविश्य जीर्णं भवति, तदा तस्य स्थूलभागः मूत्रं भवति । मध्यभागः रक्तरूपेण परिणमते। सूक्ष्मतमभागः प्राणरूपेण परिणमते[१९] ।

भुक्तं घृतादि त्रेधा विभज्यते । तस्य यः स्थवष्ठो भागोऽस्थिरूपेण परिणमते। सूक्ष्मभागः मज्जारूपेण परिणमते । येन द्वयोः अस्थिनोः मेलनं स्यात् तद्वतः यः सूक्ष्मतमो भागः स वाक् भवति[२०]।

दध्नः मन्थनात् सर्पिः उपर्यागच्छति । एवमेव भुक्तस्यान्नस्य सूक्ष्मतमभागः मनरूपेण परिणमते । पीयमानस्य जलस्य सूक्ष्मतमो भागः उपर्यागत्य प्राणो भवति। तेजसः वर्धकं घृतादीनां सूक्ष्मतमो भागः उपर्यागत्य वाक्[२१] भवति ।

समानवायोः सर्वाधिकं महत्वं बृहदारण्यकोपनिषदि षष्ठाध्याये दृश्यते। हे भागवः शरीरात्मानौ कुत्र प्रतिष्ठाविति प्रश्ने सति तत्रोत्तरं दीयते - प्राण इति। यावत्कालपर्यन्तं शरीरे प्राणाः स्युः तावत्कालपर्यन्तं शरीरेण साकं आत्मनो सम्बन्धो भवति[२२] ।

केचन नागकूर्मकृकलदेवदत्तधनंजयाख्याः पंचान्ये वायवः सन्तीति प्रतिपादयन्ति[२३]। उद्गिरणं नाम छर्दिः अर्थात् वमनम् । नागवायुप्रभावात् वमनादिकं[२४] जायते । चक्षुषः[२५] उन्मीलनं निमीलनं वायुना कूर्मनामकेन भवति । कुत्रचित् उन्मीलनशब्दः कर्म इति दृश्यते । तत्रापि उन्मीलनशब्दः निमीलनस्याप्यपलक्षणपरः। कृकलवायुना बुभुक्षा जायते[२६] । देवदत्ताख्यः वायुः जृम्भणकरो[२७] भवति । धनंजयवायुना[२८] शरीरस्य पोषणं भवति ।

एतेषां वागादीनामन्तर्भावं प्राणादिषु केचनाभ्युपगच्छन्ति । ऊर्ध्वमुखस्य वायोः उदानमिति संज्ञा । तथा चोदानेनैवोद्गिरणवायोरपि सिद्धौ नागस्य वायोः तत् कर्त्तुः उदानवायावन्तर्भावः । तस्मात् पृथक्त्वं न स्यात् । उन्मीलनस्य शरीरावयवचेष्टान्तर्गतत्वात् तस्य व्याननिमित्तकत्वात् उन्मीलनकर्त्तुः कूर्मस्य वायोः व्यानाख्ये वायावन्तर्भावः । समानेन भुक्तपीतानां पाकेन रसादिरूपं प्राप्य सर्वत्र शरीरप्रदेशेषु तत् प्रवेशने कृते सत्येव बुभुक्षायाः जायमानत्वात् तत् कर्त्तुः कृकलवायोः समाननामकवायौ भवत्यन्तर्भावः । जृम्भणस्य

निद्रालस्यादिहेतुकत्वात् अन्नस्वीकारस्य चापानकर्मत्वादपान एव परम्परया जृम्भणस्य हेतोः देवदत्तवायावन्तर्भावो दृश्यते । अपानाख्यस्य वायोः अन्तर्मुखत्वात् शरीरान्तः प्रविशतः वायोः अन्नस्वीकरणं हेतुत्वं ऐतरेयके ब्राह्मणे उच्यते- "तदापानेनाजिघृक्षत् तदावयत्" इति रसलोहितमांसादिरूपेण शरीरान्नस्य परिणामे सत्येव पोषणस्यापरपर्यायः पृष्टेः सम्भवात् रसादिप्रापण-कर्त्तरि समाने धनंजयस्य वायोरन्तर्भावः इति स्वीकर्त्तव्यः । तथा च प्राणादीनामेव यथायथम् उद्गारादिक्रियानिमित्ततया अवस्थान्तरमापद्यमानानाम् उपपत्तौ तत्र तत्त्वान्तरस्य कल्पनं तेषां गौरवमप्रामाणिकमिति सिद्ध्येत् ।

श्रुतौ तु पंचानामेव प्राणादीनां सृष्टिः श्रूयते । पंचान्येऽपि वायवः सन्तीति स्वीकारे श्रुतिविरोधः स्यात् । प्राणादयोऽपि मुख्यस्यैव प्राणस्य वृत्तिविशेषाः। एते प्राणापेक्षया पृथक्भूताः न सन्ति । बृहदारण्यके वृत्तिमतः प्राणस्यैते विशेषा इति प्रतिपाद्यन्ते[२९] । अत्र विषये कश्चन न्यायोऽपि दृश्यते । तत्रापि प्राणस्य पंचवृत्तित्वं साधितम्[३०] । मुख्यप्राणोऽपि सूत्रात्मरूपस्य बाह्यस्य वायोः विकारः। अयं च वायुः शरीरमध्ये नभोवृत्तिलाभमात्रेणावस्थितः बाह्यवायुरेवेति वक्तुं न शक्यते। वागादीनां सामान्यवृत्तिरूपाक्रिया वा न हि भवितुमर्हति । श्रुतौ वायोः इन्द्रियाणां च प्राणात् पृथक्त्वं श्रूयते[३१] । "न वायु क्रिये पृथगुपदेशात्" इति न्यायादपि वायोः पृथक्त्वमवगम्यते । "अणुश्च" इत्यादिन्यायवशात् इन्द्रियवत् सूक्ष्मत्वादिकमपि प्राणस्यानुसन्धेः इत्यवगन्तव्यम् ।

उपर्युक्तानां कर्मेन्द्रियाणां प्राणादिभिः मिलितानां विशेषमित्थं आह- कर्मेन्द्रियैः सहितं प्राणमयकोशः इत्युच्यते । कोशस्यास्य

कार्यरूपत्वेन रजोऽंशकार्यत्वमवगम्यते[32]।

निश्चयात्मिकान्तःकरणवृत्तिरूपा बुद्धिः पंचज्ञानेन्द्रियैः मिलित्वा ज्ञानमयकोशो[33] भवति । संशयात्मिकान्तःकरणवृत्तिरूपं मनः पंचभिः ज्ञानेन्द्रियैः सहितं सत् मनोमयः कोशः इत्युच्यते[34] ।

वाक्पाणिपादपायूपस्थाभिः कर्मेन्द्रियैः सहितं सत् वायुपंचकं प्राणमयकोशं इत्यभिधीयते । उपर्युक्तेषु कोशेषु ज्ञानशक्तिमान् कर्त्तुरूपः विज्ञानमयकोशः। कार्यरूपः इच्छाशक्तियुक्तः मनोमयकोशः । प्राणमयकोशे क्रियाया आधिक्येन दृश्यमानत्वादस्य रजोऽंशकार्यत्वमिति ज्ञायते । एतेषां कोशानां योग्यतां दृष्ट्वाऽयं विभागो विहितः । कुत्रचित् पंचकोशाः वर्तन्त इति वर्णितमस्ति । अवशिष्टस्य कोशद्वयस्यात्रैव त्रिषु कोशेष्वन्तर्भावः । विज्ञानमयकोशः, मनोमयकोशः, प्राणमयकोशः चेति , एतत् कोशत्रयं मिलित्वा सूक्ष्मशरीरमिति नाम संजायते । अर्थात् कोशत्रयात् सूक्ष्मशरीरस्योत्पत्तिः । प्राणमयकोशस्य क्रियाशक्तिमत्वं, विज्ञानमयकोशस्य कर्त्तुत्वं, मनोमयकोशस्य करणत्वं योग्यत्वात् साधितमिति पूर्वं भणितम् । आत्मेन्द्रियविषयाणां सन्निकर्षे विद्यमानेऽपि यदन्वयव्यतिरेकाभ्यां ज्ञानभावाभावौ तन्मनो विवेकसाधनत्वात् करणपक्षपातीति युक्तं मनोमयस्य करणरूपत्वम्। तथा चात्र श्रुतिः "अन्यत्र मनः अभूवं नादर्शमन्यत्र मन अभूवं नाश्रौषम"[35] इति अस्मादवगम्यते। मनोऽन्यत्र श्रोतुं द्रष्टुं मन्तु च न शक्यते । तथा च "तौ मिथुनं समयितां ततः प्राणोऽजायत"[36] इति श्रुतेः प्राणस्य वाङ्मनसोः मिथुनी-भूतयोरुत्पत्तिश्रवणात् प्राणमयस्योक्तं कार्यरूपत्वम्। "अनन्तं वै मनोऽनन्ता विश्वेदेवा"[37] इत्यादिश्रुतिस्तु

लिङ्गशरीरस्यापि बहुत्वमेकत्वं च श्रावयति। तदेकत्वानेकत्वयोरपि अज्ञानवदेव संभवति । अनयोः समष्टिव्यष्ट्योः एकत्वं स्पष्टमेव पठ्यते बृहदारण्यकोपनिषदि। "वायुरेव व्यष्टिः वायुरेव समष्टिरिति। सूक्ष्मशरीरस्य समष्ट्युपहितं चैतन्यं सूत्रात्मेत्युच्यते । सर्वत्र पुष्पेषु यथा सूत्रमनुस्यूतं भवति तथैव सर्वत्र सूक्ष्मशरीरेषु आत्मचैतन्यमनुस्यूतं भवति । तस्मादनुस्यूतत्वात् सूत्रात्मेति व्यवह्रियते । अस्यैव हिरण्यगर्भ इति नामान्तरम्।

समष्टिसूक्ष्मशरीरोपहितं चैतन्यं प्राण इत्युच्यते । शरीरे प्राणस्य प्राधान्यात् शरीरोपाधिकः प्राणोपाधिको वा इत्यभिधीयते । प्राणोपाधिकत्वात् प्राण इत्यप्युच्यते। यावत्कालपर्यन्तं शरीरे प्राणः सक्रियः तावत्पर्यन्तमात्मनः शरीरसम्बन्धः स्यात्। सूत्रात्मा बृहदारण्यकोपनिषदि सूत्रशब्देनोच्यते। अत्र याज्ञवल्क्यः गौतमम् उपदिशति स्म । हे गौतम अयं वायुः सूत्रम् । इदं च सूत्रं वायुवत् अदृश्यम् । तेन वायुसूत्रेणायं लोकः, परलोकः, सर्वाण्यपि भूतानि ग्रथितानि ।

हिरण्यगर्भस्योत्पत्तिविषये ऋक्संहितायामपि[३८] दृश्यते । श्वेताश्वतरोप-निषद्यपि हिरण्यगर्भस्योत्पत्तिविषये श्रूयते[३९] । सेयं देवता का इति शाकल्यस्य प्रश्ने सति याज्ञवल्क्यः प्राणस्तु सा देवतेत्युत्तरं ददाति स्म ।

सूक्ष्मशरीरस्य समष्टेः नाम सूक्ष्मशरीरमिति कथनमसंगतं भवति यतः व्यष्टिभूतसूक्ष्मशरीरापेक्षया समष्टिभूतसूक्ष्मशरीरस्य स्थौल्यात्तत्र स्थूलत्व-व्यवहारः युक्तिसंगतः ।

कुत्रचित् सूत्रात्मैव स्वप्न इति व्यपदिश्यते । सूत्रात्मनः

उपाधिरूप समष्टिसूक्ष्मशरीरस्य या बुद्धिः सा जाग्रदवस्थायामनन्तवासनानामायतनं भवति। अतः तद्घटितसूक्ष्मतमशरीरसमष्टेरपि वासनामयत्वं दृश्यते । स्वप्नोऽपि वासना जन्यत्वात् वासनामयः । वासनामयत्वसाम्यात् समष्टिभूतसूक्ष्मशरीरं स्वप्नशब्देन व्यपदिश्यते[४०] ।

सूक्ष्मशरीरस्य भेदद्वयं वर्तते। व्यष्टिसूक्ष्मशरीरं, समष्टिसूक्ष्मशरीरमिति। समष्टिसूक्ष्मशरीरं सूत्रात्मन उपाधिः । व्यष्टिसूक्ष्मशरीरं तैजस उपाधिः । व्यष्टिसूक्ष्मशरीरोपहितचैतन्यस्य तैजस इति नाम । इयं व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्मत्वात् सूक्ष्मशरीरमित्युच्यते । विज्ञानमयमनोमयप्राणमययुक्तं कोशत्रयमिदं सूक्ष्मशरीरमिति वदन्ति । जाग्रद्वासनामयत्वात् स्वप्न इत्युच्यते । स्वप्नावस्थायां स्थूलशरीरं सूक्ष्मशरीरे विलीयते । अतः सूक्ष्मशरीरमिदं स्थूलशरीरस्य प्रविलयस्थानमिति ज्ञायते। "तेजोमयत्वं वासनामयत्वं स्वयं निर्माय स्वेन भासा" इति श्रुतौ भा शब्देन वासनात्मकोऽन्तःकरणस्य व्यपदेशो भवति । "लिङ्गशरीरस्याप्येकत्वबहुत्वश्रवणात् तदेकत्वानेकत्वयोरपि अज्ञानवदेव विभागो दृश्यते । "लिङ्गं मनो यत्र निषिक्तमस्य" "अनन्तं वै मनोऽनन्ताः विश्वे देवाः" इत्यादिश्रुतेः । व्यष्टिसमष्ट्योरेकत्वं श्रुतौ प्रतिपादितमस्ति । "वायुरेव व्यष्टिः वायुरेव समष्टिरिति बृहदारण्यकोपनिषदि श्रूयते । समष्टिसूक्ष्म-शरीरोपहितं चैतन्यं सूत्रात्मा हिरण्यगर्भः, प्राणश्च कथ्यते । सर्वत्र जगति अनुसृतत्वात् सूत्रात्मा ज्ञानशक्तिमदन्तःकरणोपहितत्वात् हिरण्यगर्भः क्रियाशक्तिमत् अधिदैवतप्राण-रूपत्वात् प्राणः, अथवातादृक् अध्यात्मरूपत्वात्

प्राणः। अथवा ज्ञानक्रियाशक्तिमत् समष्टिप्राणेन्द्रियसमुदायात्मकं समष्टिलिङ्गशरीरं, तदुपहितत्वात् ज्ञानशक्तिप्राधान्येन हिरण्यगर्भः क्रियाशक्ति-प्राधान्येन प्राण इति च प्रतिपाद्यते[४१] । एतौ सूत्रात्मतैजसौ स्वप्नावस्थायां निद्रादिदोषदूषितस्यादृष्टादिसमुद्बोधितसंस्कारविशेष-सचिवस्यान्तः-करणस्य संस्कारानुरूपाः याः वृत्तयः सन्ति, तादृगन्तःकरणसमष्टिचैतन्यस्याविद्या-शक्तिविजृम्भितविशेषाकाराः, ताभिः सूक्ष्मविषयान् जाग्रद्वासनामयान् अनुभवतः। "प्रविविक्तभुक् तैजस" इत्यादिश्रुतेः ।

अपरोक्षावभासित्वात् स्वप्नस्य स्मृतित्वमवगन्तुं न शक्यते। संप्रयोगाद्य-भावात् स्वप्नस्य प्रत्यक्षप्रमात्वमपि अङ्गीकर्तुं न शक्यते। स्वप्नावस्थायां विषयानुभवत्वात् स्वप्नः सुषुप्तिः नैव भवेदिति स्पष्टम्। जाग्रत्कालोचितदेश-कालनिमित्तानां स्वप्ने असंभवात् स्मृतेः प्रत्यक्षमिति वक्तुं न शक्यते । यथा हि- "केशः सहस्रधा भिन्नः" इत्यादिना केशसहस्रांशे इति नाडीरूपम् । "एताभिर्वा एतदाश्रवति" इति स्वप्नाय तादृशनाडीप्रवेशं श्रुतिः उपपादयति । तथा चातिसूक्ष्मासु नाडीषु स्वप्नं पश्यते नदीसमुद्रवनगिरि-नगरीनिवेशोचितः देशः नास्ति, येन तत्र वर्तमानान् नद्यादीनवलोक्येत ।

ननु बहिः कुलायाद् मृतश्चरित्वात् इति श्रुतेः बहिरेव देहात् स्वप्नान् पश्यतीति चेन्न । तत्र श्रुतौ बहिः शब्देन स्थूलदेहोपरागाभावमात्रस्य विवक्षितत्वात्। यद्येवं न स्यात् तस्मिन्नेव देहे पुनः नियमेन जागरणं न स्यात्। अन्यत्र श्रुतावपि "कुरुष्वः मध्ये शयाननिद्राभिप्लुतः स्वप्ने पांचालानधिगतः च अस्मिन् प्रतिबुद्धश्च" इति स्वप्नप्राप्तदेशान्तरात् पुनः आगमनरहितस्यापि स्वप्नदेशस्थशरीरे

जागरणं प्रदर्शयति। तस्मान्नास्ति जाग्रदुचितः स्थलविशेषः तत्र । नापि जाग्रदुचितः कालोऽपि संभवति । तक्षदारुमृदाद्यभावेऽपि अकस्मादेव स्वप्ने प्रासादादेः निर्माणं दृश्यते । जाग्रदवस्थायां स्थितानां पदार्थानां स्वप्ने अभावं प्रदर्श्य नवीनानां वासनात्मकानां निर्माणं दर्शयति श्रुतिः[४२] । तस्मात् मायामय एव स्वप्नः । स्वप्नस्य मायामयत्वं भगवता बादरायणेनापि सूच्यते। इत्थं सूक्ष्मशरीरस्योत्पत्तिर्जातेति ।

एतेभ्यः पंचीकृतपंचभूतेभ्यः भूः, भुवः, स्वः, महः, जनः, तपः, सत्यमिति लोकाः प्राणिनां कर्मज्ञानफलभोगस्थानविशेषाः, उपर्युपरिवर्तमानाः सप्त, ततः भूमेः अधोऽधः च विद्यमानानाम् अतलवितलसुतलरसातलतलातल-महातलपाताल-नामकाः सप्त, आहत्य चतुर्दशलोकाः सन्ति । एते एव स्वावरणभूतलोकाः, पर्वतः, तद्बाह्यपृथिवी, तद्बाह्यसमुद्रैः सहिताः ब्रह्माण्ड इत्युच्यते । अस्मिन् विषये श्रुत्यादिष्वपि लिखितमस्ति । तत्र ब्रह्माण्डे शरीराणां चातुर्विध्यं दृश्यते । तत्तत् शरीरोचितान्नपानादीनां चोत्पत्तिः भवति । जरायुजानि, अण्डजानि, उद्भिज्जानि, स्वेदजानीति चतुर्विधस्थूलशरीराणि भवन्ति। जरायुभ्यः जातानि जरायुजानि मनुष्यपश्वादीनि। भूमिमुद्भिद्य जातानि उद्भिज्जानि लतावृक्षादीनि । स्वेदेभ्यः जातानि स्वेदजानि यूकमशकादीनि ।

किं च वैशेषिकाः प्रत्यक्षाप्रत्यक्षवृत्तेः परोक्षत्वात् पंचात्मकत्वं न संभवतीति कथयन्तः अप्रत्यक्षाभ्यां वाय्वाकाशाभ्यां सह पृथिव्यादिभिः आरभ्यमाणानां देहानामपि परोक्षत्वप्रसंगात् पंचभौतिकं शरीरमिति यद् वदन्ति तत् कथं पंचेभ्यः चतुर्विधभूतग्रामस्य चोत्पत्तिः

संभवेदिति वदन्ति । अवकाश-व्यूहन-पचन-क्लेदन-काठिन्यानां सर्वजनानुभवसिद्धत्वात् शरीरे सर्वेषामपि भूतानां कार्यें संप्रतिपत्तिरस्ति। तस्मात् पंचभूतान्येकस्मिन् शरीरे सन्ति इति स्थिते यदि तेषां भूतानां देहावय-वत्वाभावः वृत्तिलाभमात्रता एव स्यात् । तदा तदपगमनपगमाभ्यां देहस्योपचयापचयौ न भवेताम् । तन्तुपटयोरिवावयवा-वयवित्वमेव पंचभूतशरीरयोः युक्तियुक्तम्। अतः तयोः सतोः उपचयापचयौ दृश्येते । पार्थिवे कार्ये अपार्थिवानां भूतानां वृत्तिलाभमात्रत्वे तु तदुपगमापगमाभ्यां तस्योपचयापचयायोगात्। वस्त्रस्थानारम्भक-सलिलद्रव्याद्रीकृतस्य तदवस्थायान् उपचयः तदपगमे वा अपचयः न हि भवति । तदानीम् आयामविस्तारयोः तदवस्थासु अदर्शनात्। तथा च पावकपवनोपगमा-पगमाभ्यां परिमाणानां यथार्थं न दृश्यते । तथा च यदि वस्त्रादाविव पार्थिवे शरीरे भूतान्तरस्य मूर्त्तमात्रता यदि भवेत् तर्हि वस्त्रादिदेहयोः अविशेषेन व्यूहादीनां सत्त्वमसत्त्वं वा तुल्यवत् प्रसज्येत। अदृष्टवदात्मनः संयोगतज्जन्यप्रयत्नादिकारणा-न्तरस्यापि उभयस्य समानस्यारोपयितुं सम्भवादत्र प्रत्यक्षाप्रत्यक्षवृत्तेः देहस्य परोक्षत्वं भवेदिति नाशंकनीयम्। प्रत्यक्षाप्रत्यक्षावयववृत्तीनाम् अवयवानां परोक्षत्वप्रसंगात्। स्पर्शशून्यत्वात् एकद्रव्यत्वाच्चाकाशस्यारम्भकत्वानुपपत्तिरिति न वक्यव्यम्। आरम्भवादस्यानंगीकारात् । दुग्धावयविनां दध्यारम्भकत्वदर्शनात् । दुग्धावय-विनामपि दध्न आरम्भः भवतीति न च वाच्यम् । यद्येवं स्यात् दधिदुग्धयोः गन्धरसादिवैशम्यं न भवेत्। सतः दुग्धस्यैव परिणामो दधीति स्वीकारे गन्धादिवैशम्यं स्यात् । स्पर्शशून्यं द्रव्यं यथा गुणारम्भकं दृष्टं तथा द्रव्यारम्भकमपि भवतः

अतः श्रुतिरपि देहस्य संकीर्णद्रव्यारब्धतां श्राचयति ।

भुक्तमन्नं त्रिधा विभज्यते । याज्ञवल्क्योऽपि उपरि प्रतिपादितं समर्थयति। वस्तुतस्तु पंचानां भूतानां पंचात्मकस्य प्रदर्शितत्वात् आरम्भवादस्य निराकृतत्वात् चोदयनादिप्रदर्शितदोषशंकाकलंकोऽप्यत्र नास्तीति ज्ञातव्यम्। अतः पांचभौतिकत्वं सिद्धम् ।

अत्रापि चतुर्विधसमष्टिः व्यष्टिरपि भवति । यथैकस्य वनस्य सामूहिकाभि-प्रायेण वनमिति तस्यैव व्यष्टिदृष्ट्या वृक्ष इति व्यवहारः। स्थूलावस्थायां समष्ट्युपहितं चैतन्यं वैश्वानरः[४३] विराडित्युच्यते[४४]। विश्वराभि-मानित्वात् वैश्वानरः। विविधं राजमानत्वात् विराट् । अन्नविकारत्वं देहस्य[४५] "अन्नं वै विराट्" इति श्रुत्या ज्ञायते । जीवस्य त्रय उपाधयः सन्ति । सुषुप्त्यादौ बुद्ध्यादि-संस्कारोपरंजितम् अज्ञानमात्रमुपाधिः । स्वप्नावस्थायां लिङ्गशरीरं जाग्रद्वासना-मयमुपाधिः । जाग्रदवस्थायां सूक्ष्मशरीरसंसृष्टं स्थूलशरीरम् उपाधिः। तथा च पूर्वपूर्वोपाधि-विशिष्टस्यैवोत्तरोत्तरपाधिप्रवेशात् सर्वशरीर-प्रवेष्टुत्वेन स्थूलभोगायतनाभिमानिनः विश्व इति नाम भवति । अथवा सूक्ष्मशरीरं लिङ्गशरीरं तदपरित्यज्य स्थूलशरीरं विराट् व्यष्टिः जीवः इति । सर्वथा विश्वशरीरवर्त्तित्वात् विश्वः इति । जाग्रदव-स्थायामेतौ विश्ववैश्वानरौ दिगादिभिः सम्मील्य सर्वान् एतान् स्थूलविषयान् अनुभवतः। "जागरित स्थानः बहिः प्रज्ञः" स्थूलभुक् वैश्वानरः इत्यादिश्रुतेश्च ।

जाग्रदवस्थायां प्रमातृप्रमेयप्रमाणव्यवहाराः संभवन्ति । तत्र योऽर्थं प्रमाणैः प्रमिणोति प्रमाता । येन प्रमिणोति तत् प्रमाणम् । यत् प्रमीयते तत्प्रमेयम्। अत्र चेतनः जीवः प्रमाता । जीवः कथं विषयं

प्रमिण्वन् तथा प्रत्यासत्या प्रमिणोतीति विचारणीयम् । अत्रात्ममनेन्द्रियविषयाणां क्रम संयोगपरम्परया इति चेन्न युक्तम्। विषयसंयुक्तं तत् संयुक्तेष्वपि संयोगपरम्परया युगपत् सर्वावभासप्रसंगो भवेत्। यावदिन्द्रियसम्बन्धः तावदेव हि भासते अथवा प्रकाशते इति न वक्तव्यम् । इन्द्रियसन्निकर्षानन्तरं योऽर्थः प्रकाश्यते तावन्मात्रं सन्निकृष्यते इति चेत् तदपि न। इन्द्रियसन्निकर्षस्य इयत्तावधारणास्फुरणस्य विषयनियमः । तस्मिन् सतीन्द्रिय-सन्निकर्षेयत्तावधारणमिति परस्पराश्रयात् ।

अपि चोपर्युक्तस्य सन्निकर्षस्य ज्ञानोत्पत्तिमात्रे क्लृप्तत्वात् तदनन्तरं तस्यावस्थाने कल्पनाभावात् विषयेन सह ज्ञानस्य सम्बन्धो भवेत् । तथा च मयेदं ज्ञातम् इति स्वात्मनि सम्बन्धः इत्यपि वक्तुं न शक्यते । ज्ञानस्य सर्वगतात्माश्रयत्वे एकस्मिन्नेव समये सर्वेषामपि विषयाणां सम्बन्धात् सर्वावभासप्रसंगः स्यात् । देहावच्छिन्नात्मप्रदेशाश्रितत्वे देहस्य बाह्यविषय-सम्बन्धाभावात् बाह्यं किमपि न प्रतीयेत ।

ननु सम्बन्धाभावेऽपि ज्ञानज्ञेययोः उद्दिष्टविषये ज्ञानं किमप्यतिशयं जनयति। अतः अव्यवस्था नास्तीति चेन्न । उद्दिष्टेष्वपि दुर्गन्धादिषु ज्ञानकृता-तिशयदर्शनात्। अदृष्टबलादल्पमेव भासते इति चेन्न तस्य दुष्टसामग्रीसम्पादक-त्वेनान्यथासिद्धत्वात् अगतिकत्वाच्च। अतः उपयुक्तः दोषः न स्यात् । जीवस्य विषयग्रहणव्यवहारे अस्मन्मते न कापि अनुपपत्तिरस्ति। अतः जीवस्य सर्वगतत्वपक्षयोरपि अन्तःकरणकृता व्यवस्था संभवति । तथा हि अपरिच्छिन्नपक्षे तावदन्तःकरणमेव मनोबुद्ध्यादिशब्दवाच्यं प्रमात्त्वादिव्यवहार-

सम्पादकं च । यतः अविद्या आहततया सर्वत्राप्रकाशयमानमपि आत्मचैतन्यान्तःकरणसंसृष्टं सत् प्रकाशते, दर्पणद्रव्य-संसृष्टसूर्यकिरणवत् । तच्चान्तःकरणमदृष्टादिसहायं विषयसंवेदनवेलायां यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं प्राप्नोति । एवमेव तैजसमन्तःकरणं नेत्रादिद्वारा बहिर्निर्गत्य घटपटादिविषयदेशं प्रविश्य घटाद्याकारं भवति। तदानीं प्रमाणचैतन्यं विषयावच्छिन्नचैतन्येन सह ऐक्यं भवति । तदानीं घटादिज्ञानं जायते । तत्र चावस्था त्रयेष्वपि आत्मचैतन्यम् आत्मनैवाभिव्यज्यते । तत्र देहमध्यान्तःकरणभागावच्छिन्नं चैतन्यं प्रमातृसंज्ञां लभते। देहविषयोर्मध्ये दीर्घप्रभाकारेणेन्द्रिय-द्वारानिर्गतान्तःकरणचैतन्यं प्रमाणसंज्ञां प्राप्नोति। विषयमभिव्याप्य विषयाकारतयाऽवस्थितान्तःकरणावच्छिन्नं चैतन्यं प्रमेयसंज्ञां लभते। अतः प्रमातृप्रमाणप्रमेयव्यवस्था वेदान्तिनां मतेऽपि सिद्ध्यति । एवमङ्गीकारे येन विषयेन सहेन्द्रियस्य सन्निकर्षः दूरे वा समीपे वाऽवतिष्टमानेन तत्रैव तदाकारमेवान्तःकरणं परिणमते । नान्यत्रान्याकारमिति च सिद्ध्यति । तदनुरक्त-चैतन्यात्मन एकत्वान्मयेदं विदितमिति सम्बन्धावभासश्चोपपद्यते नान्यथा।

परिच्छिन्नात्मपक्षे तु जीवत्वोपाध्यन्तःकरणस्य पूर्वोक्तप्रकारेणावस्था-भेदसम्भवे उपाध्युपगामित्वात् उपहितस्य सोपाध्यन्तःकरणं यद्यदात्मनावतिष्ठते तदात्मना प्रत्यगात्मचैतन्यमपि अवभासमानं ग्राह्यग्रहणग्राहकभेदव्यवस्था-मनुभवति। यथा- अयः पिण्डो दहति । अर्थादयःपिम्डादिसमारुढाग्निरिवेत्याद्यनवद्यम् । तार्किककल्पनावत् पुरुषबुद्ध्युत्प्रेक्षामूलेयं कल्पनेति चेन्न। इयं तु कल्पनाश्रुतिमूला। अयमेकरूपस्सन् लोकद्वयेऽपि अटति[४६] । नवद्वारयुक्ते पुरे संसारीबहिः लेलायते इव दृश्यते[४७]। आशीनोऽपि

बहुदूरं गच्छति[४८]। अयं तु जीवः मनोयुक्तत्वान्मनोमयः, ज्ञानसंपृक्तत्वात् विज्ञानमय इति चोच्यते।

(भगवत्पादशंकराचार्यैः श्रुत्यर्थसंग्रहे दक्षिणामूर्त्तिस्तोत्रे उपर्युक्ता कल्पना तार्किककल्पनावत् पुरुषबुद्ध्युत्प्रेक्षामूला न भवति, किन्तु अस्याः कल्पनायाः मूलं श्रुतिरिति प्रतिपादयन्ति[४९] ।)

भगवत्पादशंकराचार्यैः श्रुत्यर्थसंग्रहे दक्षिणामूर्त्तिस्तोत्रे उपर्युक्ता कल्पना तार्किककल्पनावत् पुरुषवुद्ध्युत्प्रेक्षामूला न भवति, किन्तु अस्याः कल्पनायाः मूलं श्रुतिरिति प्रतिपादयन्ति[५०] ।

युक्तिरपि मनसः बाह्यविषयदेशगमनाभावे इन्द्रियसन्निकर्षपरम्परया देहान्तरे च विषयाकारता स्वीकारे बहिः एतावति दूरे विषयोऽयं मायोपलब्धेति प्रतिसन्धानं न स्यात् । अनेकविस्तीर्णदेशतन्निष्टरथगजाद्याकार भावस्यान्तःहृदये अनुपपत्तये स्वप्नवदत्रोपचर्यते इति न वक्तव्यम् । इतःपूर्वमस्माभिः स्वप्नस्य मायामयत्वं प्रतिपादितम् । यद्यपि जाग्रदवस्थापि मायामयी । तथापि स्वप्नाद्व्य-वहारसिद्ध्यर्थं तयोः वैशम्यमस्तीति । तत्र प्रमातरिबाध्यमानत्वाबाध्यमानत्वा-भिमानादिलक्षणे तारतम्यमस्त्येव।

नन्वखण्डाकाराब्रह्मवृत्तिः वा चित्तवृत्तिः अन्तरेव जायते इति चेत् सत्यम्। सा च वृत्तिः देहाद्यावरणमपर्दयन्ती जायते । किन्तु बाह्यवस्तु-विषयवृत्तिस्तु नैवमस्तीति वैशम्यं भवति । किं च यदि विषयेन्द्रियसन्निकर्ष-मात्रान्तःकरणस्य विषयाकारता हेतुः तदानीं दूरे स्थितविषयगत परिणामरूप-सांख्यादीनामपि तदाकाराकारिते अन्तःकरणे यथावद् अवभासप्रसंगः । दूरलक्षणाद्दोषात् तथा नावभासत इति न च वाच्यम्। तस्येन्द्रियसम्बन्ध-मात्रप्रतिबन्धकं न स्यात् ।

ननु तवापीन्द्रियसंसृष्टाकारतः मनसः इति स्थिते कथं

दूरस्थविषये तत्तदाकारता मनसः न भवेदिति चेन्न । मम तु मनसः बहिः अस्वातन्त्र्यात् यावद्भिः अवयवैः अवयवीभिर्वा चक्षुस्सन्निकर्षः तावन्मात्राकारमेव मनः परिणमत इति । तव मते तु पदार्थसन्निकृष्टेन्द्रिये सति तद्गतभूयस्त्वाल्पत्वदृढत्व-विशेषानादरेऽपि शरीरस्थान्तः तदाकारवृत्त्युदयोपपत्तेः विषयेयत्तादेरपि स्फुरणं स्यात्, वैशम्यात् इति । अतः प्रत्यक्षव्यवहारे बाह्यमनोवृत्तिः विषयाकारेति स्थितमस्ति। परोक्षव्यवहारे तु विशिष्टशब्दलिङ्गादिबलनिबन्धनात् तत्तत् अर्थाकाराबुद्धिः अन्तरेव समुन्मुषति, विषयसत्तामात्रस्यैव तद्गतविशेषादेर-स्फुरणाच्चेति । तथा च स्वप्ने आत्मबुद्ध्यु-पाधिस्वप्नदर्शनस्य यो हेतुः तस्य कर्मविनाशे जाग्रदवस्थायाम् आगच्छन् पूर्वगृहीतेषु करणेषु भूयः निजनिजगोलकस्थानेषु तया एव धिया प्रसारितेषु सत्सु स्वयं तद्बुद्ध्यनुगतः तत्तद् गोलकादिदेशं गच्छन् स्वोपाध्यन्तःकरणएन्द्रियसमूहः पदार्थान् अनुभवति। इदमेवास्य जीवस्य जागरितमर्थात् जाग्रदवस्था । तदुक्तम् - "इन्द्रियैरर्थोप-लब्धिर्जागरितमस्ति[५१]"।

पादटिप्पणी

१. बृ. उ. ।

२. छा. उ. ।

३. ब्र. सू. २-३-१३ ।

४. सां. का. ।

५. सत्त्वं लघुप्रकाशकम्- - - - - । सांख्य. श्लो. १३ ।
तत्र सत्त्वं निर्मलत्वात् प्रकाशक- - - - - । श्री. भ. ६-१४ ।

६. कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यभिमानित्वेन इहलोकपरलोकगामी व्यावहारिको जीव इत्युच्यते । वे. सा. पृ. ३० ।
विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च ।

७. स समानः सनुभौ लोकावनुसंचरति । ध्यायतीव लेलायतीव- - - । छा. उ. ।

८. एतानि पुनराकाशादीनां रजोंशेभ्यः व्यस्तेभ्यः पृथक् पृथक् क्रमेणोत्पद्यन्ते । वे. सा. ३१ ।
वाक् च वक्तव्यं च, हस्तौ च दातव्यं च । उपस्था चानन्दयितव्य पायुश्च विसर्जयितव्यं च । पादौ च गन्तव्यं च ।

९. प्राणो नाम प्राग्गमनवान्- नासाग्रस्थानवर्ती । वे. सा. ३३ ।

१०. प्राणो हृदये । तैत्तिरीय. ब्रा. ३-१०-८-५ । हृदि प्राणः ।

११. अपानो नाम अर्वाग्गमनवान् पायुरादिस्थानवर्ती । वे. सा. ३१ ।

१२. अथ प्राणापानयोः यः सन्धिः स व्यानः । छा. उ. १-३-३ ।
व्यानो नाम विश्वग्गमनवान् अखिलशरीरवर्ति । वेदा. सा. ३१ ।

१३. अतो यानि अन्यानि वीर्यवन्ति कर्माणि यथा अग्नेः मन्थनमाणेः शरणं द्वन्दस्य धनुषः आयमनमप्राग्गमन्नपानं तानि करोति । छा.उ. १-३-५ ।

१४. उदानो नाम कण्ठस्थानीय: ऊर्ध्वगमनवान् वायु: उत्क्रमणवायु:। वेदा. सार ३१ ।

१५. बृह. आ. उ. ३-४-४-२ ।

१६. समानो नाम शरीरमध्यगताशितपीतान्नादिसमीकरणकर:। वे. सार.३१।

१७. मध्ये तु समान: एष हैतद्धुतमन्नं समं नयति । प्र. उ. ३-५ ।

१८. अन्नमशितं त्रेधा विधीयते, तस्य य: स्थविष्ठो धातु: तत्पुरीषं भवति ।
यो मध्यम: तन्मासं, योऽणिष्ट: तन्मन: । छा. उ. ६-५-१ ।

१९. आप: पीता त्रेधा विधीयन्ते, तासां य: स्थविष्ठो धातु: तन्मूत्रं भवति ।
यो मध्यम: तल्लोहितं, योऽणिष्ट: स प्राण: । छा. उ. ६-५-२ ।

२०. तेजोऽशितं त्रेधा विधीयते, तस्य स: स्थविष्ठो भाग: तदस्थि भवति यो मध्यम: स मज्जा, योऽणिष्ट: स वाक्- छा. उ. ६-५-३ ।

२१. एवमेव खलु सोम्य अन्नस्यास्यमानस्य योऽणिमा स ऊर्ध्व: समुदीर्षति। तत् मनो भवति - छा. उ. ६-६-२ ।
दुग्ध: सोम्य मध्यमाणस्य योऽणिमा स ऊर्ध्वं समुदिशति तत् शक्तिर्भवति।
छा. उ. ६-६-१ ।
अपां सोम्य पीयमानानां योऽणिमा- - - प्राणो भवति । छा. उ. ६-६-३।
तेजस: सोम्य अश्यमानस्य योऽणिमा स ऊर्ध्व: समुदीर्षति स वाक् भवति।
छा. उ. ६-६-४ ।

२२. कस्मिन्नु त्वं चात्मा च प्रतिष्ठितौ स्थ । इति प्राण इति कस्मिन्नु

प्राणं प्रतिष्ठितः । इति अपान इति । कस्मिन्नु अपान प्रतिष्ठित इति व्यान इति। कस्मिन्नु व्यान प्रतिष्ठित्त इति उदानेति । कस्मिन्नु उदानः प्रतिष्ठितः इति।
बृ. आ. उ. ६-२-२६ ।

२३. उद्गारे नागाख्यात कूर्म उन्मीलने स्मृतः ।
कृकलस्तु क्षुतिर्ज्ञेयो देवदत्तविम्भणे ।।
न जहाति मृतं चापि सर्वव्यापी धनंजयः । गोरक्षसंहिता ।
केचित्तु नागकूर्म कृकलदेवदत्त धनंजयाख्याः पंचान्ये वायवः सन्तीति बदन्ति । वे. सार. ३२ ।

२४. तत्र नागः उद्गिरणकरः । वे. सारः ३२ ।

२५. कूर्म उन्मीलनकरः । वे. सारः ३२ ।

२६. देवदत्तो जृम्भणकरः । वे. सारः ३२ ।

२७. कृकलः क्षुत्करः । वे. सारः ३२ ।

२८. धनंजयः पोषणकरः । वे. सारः ३२ ।

२९. प्राणापानव्यानोदानसमानानेन- - - - - । बृ. आ. उ. ।

३०. पंचवृत्तिर्तनवत् व्यपदेशात् ।

३१. एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च खं वायुः । मु. उ. २-३।

३२. इयं बुद्धिः ज्ञानेन्द्रिय सहिता मनोमयकोशो भवति ।
योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषं- - - । बृ. आ. उ. ।

३३. मनस्तु ज्ञानेन्द्रियसहितं सत् मनोमयकोशो भवति ।
कातः संकल्पः- - - - - मन एव । बृ. आ. उ. १-५-३ ।

३४. इयं बुद्धिः- - - - - -विज्ञानमयकोशो भवति । वे. सा. ३१ ।

३५. एतत्प्राणादिपंचकं कर्मेन्द्रियैः सहितं सत् प्राणमयकोशो भवति। वे. सारः ३१।

स यथा प्रयोग्याचरणे युक्तः एवमेवायमस्मिन् शरीरे प्राणयुक्तः।
कस्मिन् उत्क्रान्ते उत्क्रान्तो भविष्यामि । तत्रैव ।
स प्राणमसृजत् । तत्रैव ।

३६. एतेषु कोशेषु मध्ये विज्ञानमयकोशः ज्ञानशक्तिमान् कर्त्तुरूपः। तत्रैव।

३७. मनोमयः इच्छाशक्तिमान् कार्यरूपः । तत्रैव ।

३८. अस्य क्रियात्मत्वेन रजोंशकार्यत्वम् । तत्रैव ।

३९. बृ. आ. उ. । १-५-३ ।

४०. तत्रैव, १-५-१२ ।

४१. वायुर्वै गौतम तत् सूत्रं वायुना वै सूत्रेणायं च लोकः परश्च लोकः ।
सर्वाणि च भूतानि सन्धृग्धानि भवन्ति । बृ. आ. उ. ३-७-२

४२. हिरण्यगर्भ समवर्तताग्रे । ऋ. सं. १०-१२१-१ ।

४३. हिरण्यगर्भं जनयामास पूर्वं । श्वे. उ. ३-३-४ ।

४४. कथम् एको देव- - - - - - - प्राणम् इति ब्रह्म इति त्यद् इति। बृ. आ. उ. ३-९-९ ।

४५. अस्यापीयं समष्टिः स्थूलशरीरापेक्षया सूक्ष्मत्वादिति हेतोः सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासनामयत्वात् स्वप्नः । वे. सार ३५ ।

४६. आयुर्वै गौतम तत्सूत्रं वायुना वै गौतमसूत्रेण । बृ. आ. उ. २-३-४ ।
हिरण्यगर्भः समवर्तताग्रे । ऋक्संहिता ।
हिरण्यगर्भं जनयामास पूर्वम् ।
कथमः एको देव इति प्राण इति । तत्रैव ।

४७. न तत्र रथाः, न रथयोगाः, न पन्थानो भवन्त्यथ रथान् रथयोगान् पथाः सृजते । क. उ. १-३-५ ।

४८. मायामात्रं तु कार्त्स्न्येन अनभिव्यक्तस्वरूपत्वात् । ब्र. शं. भा. ३-२-३।

४९. द्वात्रिंशतं वै देवरथाह्न्यान्ययं लोकस्तं समन्तं पृथिवी द्विस्तावत् पर्येति,
तां समन्तं पृथिवीं द्विस्तावत् समुद्रः पर्येति- । बृ. आ. उ. ३-२-२ ।
यथैकस्यामलावुलतायां विततानि बहूनि फलानि तथैकस्यां परमात्मशक्तावस्यूतानि सहस्रशोऽण्डानीति श्रूयते । न्या. कु. २ स्त. ।
(श्रीमद्भागवतं ब्रह्माण्डविषये ५-२१-१२)

५०. यस्त्वेकमेव प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते । छा. उ. ५-१८-२ ।

५१. सैषा विराड् अन्नादि । छा. उ. ।
पुरुष एवेदम् । मु. उ. २-१-१० ।
अन्नमहम् । तै. उ. ३-१०-६ ।

●●●

नवमोऽध्याय:

पंचीकरणस्यारम्भवाद:

तम: [1]प्रधानविक्षेपशक्तियुक्ताज्ञानोपहितचैतन्याद् आकाश:, आकाशाद्वायु: वायोरग्निरग्नेर्जलं, जलात् पृथिवी च जन्यन्ते । तेषु पंचमहाभूतेषु जाड्यस्याधिक्य-दर्शनात् तत्र तमस: प्राधान्यम् । अनेन तत्कारणेऽपि तमस: प्राधान्यमासीदित्य-वगम्यते। तमस: प्राधान्यनिर्देशात् सत्त्वरजो: गुणयो: स्थिति: तत्र नास्तीति वक्तुं न शक्यते । तेषु रजस्सत्त्वयोरपि मात्रतया वृत्तिर्द्रष्टव्या । तदानीं सत्त्वरजस्तमो गुणा: कारणगुणानुसारेण आकाशादिषु जायन्ते । एतेषां स्वरूपमतिसूक्ष्मत्वात् कारणावस्थायामेतान्येव सूक्ष्मभूतानि तन्मात्र-शब्देनोच्यन्ते। एतेभ्य: पंचमहाभूतेभ्य: स्थूलभूतानामुत्पत्ति: सूक्ष्मशरीराणां चोत्पत्ति: जायते ।

ननु आकाशो न जायते, निरवयवद्रव्यत्वात्, आत्मवदिति चेदुच्यते। उदाहृतसर्गश्रुति: "नेह नानास्ति किंचन" इत्यादिप्रबलश्रुतिभि: बाधितत्वेन तत्रानुमानस्य प्रसक्तिर्नास्ति । "आकाशमुत्पद्यते, महत्वे सति भूतत्वात्, महापृथिव्यादिवत्" इत्यादिप्रत्यनुमानविरोधात् अनुमानं नैव प्रवर्तते । आश्रयस्या-काशस्योभयवादिसिद्धत्वाद् आश्रयासिद्धिर्नामको हेत्वाभास: प्रकृते न संभवति । धर्मिग्राहकप्रमाणेन शब्दाश्रयत्वेना-काशाख्यधर्मिमात्रसिद्धावपि तद्गतनित्यत्वादे-रसिद्धत्वात् । भूतत्वमहत्वयो: स्वरूपासिद्धिदोषोऽपि न संभवति। साध्यव्यापकत्वे सति साधनाव्यापक: धर्म उपाधि: । मूर्त्तत्वसावयवत्वरूपत्वादे:

उपाधित्वं न च शक्यम् । गुणकर्मणोः साध्याव्याप्तेः। भूतत्वद्रव्यत्वसामान्यत्वादेश्च साधन-व्यापकत्वादत्र द्रव्यत्वव्यतिरिक्ताऽवान्तरजातिमत्वम् उपाधिरस्तीति चेन्न । विनाशेन साध्याव्याप्तेः । तस्योत्पत्तिमत्वेऽपि जात्याश्रयत्वं नास्ति । उत्पत्तिमत्वस्य साध्यस्य भावधर्मिकत्वात् प्रध्वंसेऽस्य प्रसक्तिर्नास्तीति न वक्तव्यम् । उत्पत्तिमात्रैवाकाशे साध्यस्योपलभ्यमानत्वात् । अन्यथा विप्रतिपत्त्यविषयाणां द्रव्यादीनां धर्मिगतानां साध्यताप्रसंगः इति दोषः आपद्येत। न कोऽप्यन्य उपाधि उत्पेक्ष्यते । वेदान्तिनामते आत्मन आकाशाज्जयायस्त्व-मङ्गीकृतम् । "ज्यायानन्तरिक्षात्"[२], "येनावृतं खं च दिवं च" इत्यादि श्रुतिषु आत्मापेक्षयाऽऽकाशस्य न्यूनपरिमाणत्वं न सम्भवति। नापि विरुद्धहेत्वाभासः साध्यविपर्ययस्याऽव्याप्तेः । विपक्षाप्रवेशात् साधारणा-नैकान्तिकदोषोऽपि न संभवति । सपक्षगामित्वाद् असाधारणोऽपि नास्ति । बाधकप्रमाणं निरूपयितुं न शक्यत इति कृत्वा कालातीतोऽपि नास्ति । यदुक्तमनुमानं तद्बाधकमिति न। तस्यानुमानस्य नरशिरःकपालशुद्धताऽनुमानवत् श्रुतिबाधित-विषयत्वस्य प्रतिपादितत्वात् । श्रुतेः व्योमाभिव्यक्तिमात्रार्थत्वादुत्पत्त्यर्थत्वं न संभवतीति न च वाच्यम् । सिद्धे चानुमानस्याबाधितविषयत्वेन प्रामाण्यश्रुतेरन्यार्थत्व-सिद्धिः। तत्सिद्धावितरसिद्धिरिति इतरेतराश्रयत्वं स्यात् ।

अपि च "तस्माद्वा एतस्मादात्मन आकाशः संभूतः" इति सकृत् श्रुतः संभूतः आकाशे साक्षात्सम्बध्यमाणो गौणः , सैव वाय्वादावनुषज्यमाणो मुख्य इति तार्किकाणां महदिदं व्याख्यानकौशलं दरीदृश्यते । विपक्षव्यावृत्तेः स्पटत्वात् सन्दिग्धानैकान्तिकता न स्यात्।

नापि प्रकरणसमतात्ववदनुमानस्य दुर्बलत्वे-नोभयोः समानबलत्वं नास्ति । निरवयवद्रव्यस्य विनश्यद् अवस्थापन्ने पटे व्यभिचारः। अवयवत्वात्यन्ताभावाधिकरणत्वं निरवयवशब्देन विवक्षितमिति चेन्न। अत्रावयवशब्देन विवक्षितमिति चेन्न । अत्रावयवशब्देन प्रदेशविवक्षायां सावयवस्याप्यवयवी प्रदेशस्यावयवत्वेनोपेक्षणीयत्वात् अवयव्यभावप्रसंगात् आश्रयविवक्षायाम् अन्यतरासिद्धो हेतुः स्यात्। आकाशाश्रयत्वं ब्रह्मणः अस्तीति ममाभीष्टं भवति । अतः तवानुमानं न प्रतिपक्षः। न वा प्रतिपक्षान्तरमुत्प्रेक्षयितुं शक्यते । तस्मादनुमानेनाप्याकाशादेरुत्पत्तेः संभावितत्वात् निरर्थकं तर्कं परित्यज्य श्रुत्युक्तमेवाकाशजन्म इतरजन्मवदित्यङ्गीकृतम् । इदमभ्युपगम्य परमाणूना-मनुत्पत्तिमत्वं महत्वे सति इति हेतुर्विशेषितः। तस्यानङ्गीकारे भूतत्वादित्येव हेतुः स्यात् । तथा च चतुर्विधः परमाणवः जायन्ते । मूर्त्तत्वाद् भूतादिवत् घटादिवद्वा। न च मनसि मूर्त्तत्वादितिहेतोः अनैकान्तिकता, तस्यापि पक्षसमानत्वात् । धर्मिग्राहकप्रमाणबाधो न भवति । तेन सिद्धेऽपि धर्मिस्वरूपे तद्गतनित्यत्वादे-रसिद्धत्वात्। परमाणूनामिव कार्यत्वे कारणानवस्थानात् न किमपि मूलकारणं जगतो भवेदिति न च वक्तव्यम् । ब्रह्मण एव जगन्मूलकारणत्वं श्रुतिस्मृतिपुराणेतिहास-प्रसिद्धम् । तथा दिक्कालावुत्पत्तिमन्तौ अचेतनभावत्वात् पटवत् । नचास्माक-मविद्यायां व्यभिचारः । तस्याः भावाभावविलक्षणत्वाङ्गीकारात् । अन्येऽपि हेत्वाभासाः पूर्वनरसमीयाः भवन्ति। सामान्यविशेषसमवायेषु व्यभिचारो नास्ति । तस्य सामान्यस्य विचार्यमाणे ब्रह्मस्वरूपानतिरेकात् अचेतनत्वहेतोः तत्राप्रवृत्तेः। तथा

हि सामान्यं विशेषास्तावत् कल्पिताः इति उपपादितमविद्यावादे । तथा च द्रव्यत्वादीनां सामान्यविशेषाणां सामान्यमात्ररूपतायां सत्तायामन्तर्भावः । स्फुरणविरहितायाः सत्ताया अपि कुत्राप्यप्राप्यत्वात् स्फुरणमात्रत्वं संगतम् । अत्र स्फुरणशब्देन ब्रह्म उच्यते[३] । "सदेव सौम्येदमग्र आसीत्" "सत्यं ज्ञानमनन्तं ब्रह्म"[४] । "आत्मैवेदमग्र आसीत्"[५] इत्यादिश्रुतयोऽत्र प्रमाणानि सन्ति । "ब्रह्म तं पराद्योऽन्यत्रात्मनो ब्रह्मवेदः"[६] इत्यादिश्रुतौ परंब्रह्मातिरिक्तेन ब्राह्मणत्वादिजातिं विजानतः पुरुषस्य निन्दाश्रवणात् । अतः सामान्यं व्यभिचारो नास्ति । विशेषसमवायौ खपुष्पसदृशौ । अनयोः विशेषसमवाययोः आकाशसदृशत्वं यथा भवति तथा चिदानन्दलहरीटीकायां सम्यग्विशदीकृतम्। अनेकाः श्रुतयः प्रत्यनुमानबाधिकाः वर्तन्ते । "अणोरणीयान् महतो महीयान्[७]" इति हि परमाणोः अणीयः परमकारणं ब्रह्म प्रदर्शयित्वा "यस्मात् परं नापरमस्ति किंचित्, "न ज्यायोऽस्ति कश्चित्"[८] इति तैत्तिरीयश्रुतिः अणुमहत् विशेषेण निषेधति । "असतोद्धि मनोऽसृजत"[९] "एतस्माज्जायते प्राणः मनः सर्वेन्द्रियाणि च"[१०] इति च तैत्तिरीयाथर्वण श्रुति मनस उत्पत्तिं स्पष्टरूपेण निराकुरुतः । एवं ज्ञः कालकालो गुणी सर्वविधः[११] "सर्वे निमेषा जज्ञिरे"[१२] इति च श्वेताश्वेतर-तैत्तिरीयश्रुतिवाक्ये कालस्यापि कार्यतां निरूपयतः। "पुरुष एवेदं सर्वम्"[१३] इत्युपक्रम्य "दिशः श्रोत्रम्"[१४] इति श्रुतिः दिशा पुरुषविकारत्वं सूचयति । वस्तुतः प्राच्यादिव्यपदेशस्य सूर्यगणोपाधिना आकाशस्येव कल्पितत्वाद् आकाशातिरिक्ता दिक् नास्तीति

ज्ञातव्यम्। आकाशवत् ब्रह्मणोऽपि कारणत्वात् यथाऽऽकाशो जायते तद्वत् ब्रह्मणोऽपि उत्पत्तिरस्त्विति चेन्न । "अजो नित्य: शाश्वतोऽयं पुराणो न हन्यमाने शरीरे"[१५] इत्यादिश्रुतिविरोधात् ब्रह्म नोत्पद्यते। "असम्भवस्तु सतो नोपपत्ते:[१६]" इति न्यायविरोधात् च ब्रह्मण उत्पत्ति: न संगच्छते। अनेन सृष्ट्युत्पत्ते: पूर्वं ब्रह्मातिरिक्तं वस्तु किमपि नासीत्[१७]।

अविद्याऽऽत्मन: शक्तिविशेष: अत: आत्माऽपेक्षयाऽऽविद्याया: पृथक् अस्तित्वं नास्ति । तस्यां प्रागवस्थायां जीवानां परमात्मनि संपन्नत्वात् अदृष्टानां च तदुपाध्यन्त:करणनिष्ठानां तत्संस्काराविशेषाविद्यामात्रत्वेन पृथक् सत्त्वाभावात्। वियदधिकरणे आचार्यै: विस्तृतरूपेण पर्यालोचनं कृतम्[१८] । आकाशवद्वायु: वायोरग्नि: इत्यादौ आकाशादिभावमापन्नाद् अविद्यासहायाद् ब्रह्मण: एवाकाशादीनामुत्पत्ति:[१९] इति "तत्तेजोऽसृजत" "तत्तेज ऐक्षत"[२०] इत्यादिश्रुतौ तेज: प्रभृते: अपीक्षणपूर्वकमबादि स्रष्टृत्वं श्रूयते । अचेतनस्य पदार्थस्य द्रष्टृत्वानुपपत्ते: । "तदभिध्यानादेव तु तल्लिङ्गात् स:"[२१] इति न्यायोऽपि अमुमेवार्थं प्रकाशयति । प्रधानाण्वादिवादानां श्रुतिविरुद्धत्वात् न्यायविरुद्धत्वाच्च निराकृता: द्रष्टव्या: । चेतनानधिष्ठितमचेतनं न किंचित् कुर्वत् उपलभ्यते। अचेतनरथशकटादावपि चेतनाधिष्ठितत्वं दरीदृश्यते । अत: प्रधानवाद: असमीचीन: । तस्मान्नाश्रयणीय: । एवं परमाणुवादेऽपि दोषा: वर्तन्ते। द्वयोरण्वो: संयोगस्याव्याप्यवृत्तित्वे तयो: सावयवतापत्ते: । अतोऽनित्यत्वप्रसंग: । अणुसंयोगस्य व्याप्यवृत्तित्वे

निरवयवयोरण्वोरेकस्मिन् इतरस्य संयोगानुपपत्तिः। तदानीं तत्कार्यस्य द्व्यणुकस्यापि परिमण्डलत्वप्रसंगः स्यात्। किं च द्व्यणुकारम्भसमये परमाणू कथंचित् विक्रियेते अथवा न, मृत्पिण्डादिवत् अनित्यत्वादिदोषापत्तिः प्रथमविकल्पस्याङ्गीकारे स्यात्। द्वितीये तृणमूलवत् परमाणु समूह एव द्व्यणुकादिकार्यं स्यात्। अतः परमाणुवादोऽपि नाश्रयणीयः। तमः प्रधानविक्षेपशक्तिमद् अज्ञानोपहितं चैतन्यमाकाशादीनां कारणमिति तत्र भूतकारणाज्ञानेन सह चैतन्यस्यापीषदनुवृत्तिः दृश्यते। प्रपंचे अंशपंचकं दृश्यते। सत्त्वं प्रकाशत्वं प्रियत्वं चेति त्रीणि ब्रह्मणः रूपाणि सन्ति। नाम रूपं च जगतः स्वरूपम्। अतः जगत्यंशपंचकं वर्तत तत्त्वदर्शिनो वदन्ति[२२]।

पंचीकरणम् -

पूर्वोक्तानामेव भूतानां परस्परं व्यवहर्तुप्राणिसमूहव्यवहारनिर्वाहक-तदीयधर्माधर्मापेक्ष्य परमेश्वरसान्निध्यादिनिमित्तापेक्षया विभागेन मिलितानां स्थूलापत्तिरेव पंचीकरणम्।

पंचीकरणप्रकारश्चेत्थम् - आकाशमादौ[२३] द्विधा विभज्य तेषां चतुर्णा-मंशानां वाय्वादिषु चतुर्षु भूतेषु संयोजनम्। एवं वायुं द्विधा विभज्य तयोरेकं भागं पुनः चतुर्धा विभज्य तेषां चतुर्णामंशानामाकाशादिषु संयोजनम्। एवं तेजः द्विधा विभज्य तयोरेकं भागं पुनः चतुर्धा विभज्य तेषां चतुर्णामंशाना-मकाशादिषु संयोजनम्। एवं जलादीनामपि। तद्यथा-

आकाशः	वायुः	तेजः	जलम्	पृथिवी
वायुः	आकाशः	आकाशः	आकाशः	आकाशः
तेजः	तेजः	वायुः	वायुः	वायुः
जलम्	जलम्	जलम्	तेजः	तेजः
पृथिवी	पृथिवी	पृथिवी	पृथिवी	जलम्

ननु कथं पंचीकरणं निरूप्यते, तत्र किमपि प्रमाणं नास्तीति चेदुच्यते- "सेयं देवतैक्षत हन्त अहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति तासां त्रिवृतं त्रिवृतमेकैकां करवाणि"[२४] इति ईक्षितृत्वात् स सदाख्या परमात्मा देवता सृष्टानां त्रिसृणां देवतानां तेजो वन्नात्मिकानां मध्ये एकैकां देवतां त्रिवृतं त्रिवृतं त्रिरूपां त्रिरूपां चकारेति त्रिवृत्करणश्रुतेरभिप्रायः। सा च त्रिवृत्करणश्रुतिः पंचीकरणमप्युपलक्षयति । त्रिवृत्करणं नाम तेजोवन्नानां त्रयाणां भूतानां मध्ये एकैकं भूतं द्विधा समं विभज्य पुनः प्रत्येकस्य द्विधा विभागं कृत्वा स्वस्वद्वितीयांशं परित्यज्य भागान्तरेषु संयोजनम् त्रिवृत्करणम्।

तेजः	जलं	पृथिवी
जलं	तेजः	जलं
पृथिवी	पृथिवी	तेजः

आकाशवाय्वोः पृथिव्याद्यात्मत्वे रूपवत्त्वमहत्वाभ्यां तयोः गगनपवनयोः चाक्षुषत्वं स्यात् । तत्र त्रिवृत्करणपक्षेऽपि तैजसः पृथिव्यात्मत्वे काठिन्यद्रवत्वाभ्यां विशिष्टतयोपलम्भप्रसङ्गः इति दोषसत्त्वेऽपि अर्धभूयस्त्वाद् दोषो नास्तीति निराकृत्य पंचीकरणेऽप्ययं दोषः समान इति चेत्तत्रेदं वक्तव्यं किं पंचीकरणस्य व्यवहार-

मार्गसिद्धत्वात् अप्रमाणम् अथवा आश्रितत्वाद् उत त्रिवृत्करणश्रुतिविरोधात् ।

विशिष्टव्यवहाराणाम् अप्रामाणिकत्वं स्यात् । द्वितीयेऽपि किं साक्षात् श्रवणाभावो हेतुः अथवा श्रुतार्थापत्तेरभावः, न प्रथमः, साक्षादश्रुतस्य निराकरणे परमापूर्वाणामपि निराकरणं कर्त्तव्यं भवेत्। श्रुतार्थापत्तेः वर्तमानत्वात् द्वितीयो विकल्पो न संभवति । छान्दोग्योपनिषदि त्रयाणां तेजः प्रभृतीनां सृष्टिश्रुतौ तावत् श्रुत्यन्तरप्रसिद्धाकाशवायुसृष्ट्येरप्युपसंहरणीयत्वं भवेत् । वियदधिकरणे[२५], तेजोऽधिकरणे[२६] च निर्धारितैकविज्ञानेन सर्वविज्ञानप्रतिज्ञाहान्यादिभिः हेतुभिः तथा च श्रुत्यन्तरैकवाक्यतया पंचभूतानां सृष्टिमुक्त्वा तेषामतिसूक्ष्मतयाऽव्यवहार्याणां व्यवहारसिद्धये त्रिवृत्करणं ब्रुवन्ती श्रुतिः पंचीकरणाभिप्रायेति चेन्न स्यात् । तदा वाय्वाकाशयोः सूक्ष्मत्वानिवृत्तेः। अव्यवहार्यतापत्तौ सृष्टानां भूतानां व्यवहाराय त्रिवृत्करणोपदेशस्यानुपपत्तिः केन निवारयितुं शक्यते । अतः आकाशवाय्वोः व्यवहार एव न संभवतीति न वक्तव्यम् । "महान् वायुः" "महत् नभः" इति व्यवहारः लोकप्रसिद्धः । श्रुतिप्रतिपादितमेव त्रिवृत्करणमङ्गीक्रियते न व्यवहाराय इति चेन्न । त्रिवृत्करणवाक्ये स्वसम्बन्धिनः फलस्याभावात् फलवत् आत्मैकज्ञानार्थ-वादत्वे सृष्टिन्यायानुसारेण त्रिवृत्करणं समीचीनं न्याययुक्तं च ।

ननु शाखान्तरे भूतद्वयस्य सृष्टेः श्रुतत्वात् तत्परित्यक्तुमशक्यत्वाच्च। छान्दोग्य-तैत्तिरीययोः विरोधपरिहारार्थम् उपसंहारो विधीयते । न चैवं पंचीकरणं क्वचित् श्रुतमस्ति येन

तन्न्यायोऽनुसर्तव्यः भवेदिति चेत् युक्तमुक्तम् । तथापि न्यायस्यानुसरणं क्रियते । यथा त्रिसर्गसृष्टौ सृष्टानां भूतानां स्पष्टतरव्यवहाररूप-नामरूप-व्याकरणायोपायरूपेण त्रिवृत्करणं श्रूयते । एवमेव पंचीभूतसृष्ट्वापि। तथा नामरूपव्याकरणोपायः कश्चिदीक्षितुः ईश्वरस्य युक्तः । स चोपायविशेषस्य तस्यैवेश्वरस्य भूतयोनेः शाखान्तरे त्रिवृत्करणरूपः श्रुतः । तत्परित्यज्यापरस्य कल्पनायां प्रमाणं नास्ति । तस्यैव पंचसर्गश्रुतावपि उपसंहारे प्राप्ते तस्य पंचीकरणार्थत्वं पंचानाम् अन्तरेण स्पटतरव्यवहारोपायताऽनुपपत्तेः । अतः त्रिवृत्करणवाक्यस्य पंचीकरणोपलक्षणत्वयुक्तम् । अनेनान्तिमः पक्षः निराकृतः। त्रिवृत्करणश्रुतेः पंचीकरणार्थत्वनिरूपणे कृते तेन पंचीकरणस्य विरोधोऽसंभवः । अस्मिन् विषये "विद्वन्मनोरंजनी" टीकाकारः एवमवोचत् यत् आकाशः सर्वेभ्योऽवकाशं ददाति । अत आकाशः सर्वत्र द्रव्येषु सन्निहितः। कुत्रापि तस्य व्यतिरेकाभावो नास्ति। एवं वायोरपि सर्वचेष्टाहेतुत्वेन तस्याप्यस्तित्वं सर्वत्रोप-लभ्यते। तयोः भूतयोः तेजः प्रभृतिष्वन्तर्भावं सिद्धवत् कृत्वा श्रुतिः प्रयोगसौलभ्यर्थं त्रिवृत्करणं प्रतिपादयति[२७] । अतः पंचीकरणस्य प्रामाण्यमस्ति।

उत्पद्यमानेष्वाकाशादिषु कार्यानुरूपं गुणत्रयमुत्पद्यते । अव्याकृतस्य ये सत्त्वरजस्तमोगुणाः तेषां प्रक्रमेण तान् गुणानारभ्य यथाकार्यं सत्त्वादिगुणाः सहैव कार्यैः तेषु जायन्ते । अव्याकृतात्पंचतन्मात्राणि जायन्त इति स्मृति-इतिहास-पुराणेषु दृश्यते । अतः कथमाकाशादेरुत्पत्तिः अत्रोच्यते । एतान्येवाकाशादीनि पंचसूक्ष्मभूतानि व्यवहाराक्षमाणि तन्मात्राणि शब्दादितावन्मात्रैकस्वभावान्यपंचीकृतानि भूतानि परस्परमसंसृष्टानि

चेति स्मृत्यादिषूपलभ्यते । अतो नोक्तदोषः ।

ज्ञानेन्द्रियविचारः -

श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि पंचज्ञानेन्द्रियाणि सन्ति । एतानि आकाशादीनां सात्विकाऽंशेभ्यः पृथक् पृथक् क्रमेण जायन्ते[२८] । आकाशादि-गतसात्त्विकांशात् श्रोत्रं, वायुगतसात्त्विकांशात् त्वक्, तेजोगतसात्त्विकांशात् चक्षुः, जलसात्त्विकांशात् जिह्वा, पृथिव्यन्तर्गतसात्त्विकांशात् घ्राणं चेति पृथक् पृथक् क्रमेणेतानीन्द्रियाणि समुत्पन्नानि । कर्णाग्रवर्तिशब्दग्राहकमिन्द्रियं भवति। त्वचग्रवर्तिस्पर्शग्राहकमिन्द्रियं, कृष्णताराग्रवर्ति रूपग्राहकमिन्द्रियं, जिह्वाग्रवर्ति रसग्राहकमिन्द्रियं, नासाग्रवर्ति गन्धं ग्राहकमिन्द्रियं च भवति । अत्यन्तसूक्ष्म-त्वादिन्द्रियसद्भावे अनुमानं प्रमाणम् । "रूपोपलब्धिः करणजन्या, क्रियात्वात् छिदिक्रियावत् ।

एतानीन्द्रियाण्यपंचीकृत पंचभूतकार्यत्वेन इन्द्रियाग्राह्याणि भवन्ति । एतानीन्द्रियाणि बहिर्मुखानि सन्ति । अर्थात् घटपटादिबाह्यविषये सर्वदा व्यापृतानि भवन्ति । "परांचिखानि व्यतृणत् स्वयंभूः" इत्यादिश्रुत्या परमेश्वरः इन्द्रियाणि बहिर्मुखानि सृष्ट्वा हिंसितवानिति ज्ञायते । अतो जीवः आध्यात्मिकमात्मा-नमदृष्ट्वा बाह्यसंसारं सर्वदाऽनुभवति[२९] ।

कदाचित् कर्णस्य पिधाने कृते सति प्राणवायुजाठराग्नौ च वर्तमानः आन्तरः शब्दः श्रूयते । अन्नभक्षणे जलपाने चान्नतः वर्तमानः स्पर्शः ज्ञायते। अर्थात् अभिव्यक्तो भवति । नयनयोः निमीलने आन्तरं तम उपलभ्यते । तदेव तमः आलोक अभावः तम इति तार्किकाः

वदन्ति" । रूपदर्शनाभावः तम इति प्राभाकरा अर्थाद् अख्यातिवादिनः प्राभाकरमीमांसकाः वदन्ति"। "अभिघात एवान्धकारोऽपि भावरूप एवावरणात्मकं चाक्षुषज्ञानं विरोधि आलोकनाश्यश्च" इति सिद्धान्त-बिन्दुकारः। उद्गारे जाते रसगन्धौ[३०] द्वौ ज्ञायेते।

कर्मेन्द्रियाणां विचारः -

वाक्पाणिपादपायुपस्थाख्यानि पंचकर्मेन्द्रियाणि सन्ति । एतानि कर्मेन्द्रियाणि आकाशादीनां रजोऽंशेभ्यः व्यस्तेभ्यः यथाक्रमं जायन्ते। तद्यथाऽऽकाशगत-रजोऽंशेभ्यः वाण्याः उत्पत्तिर्भवति । वायुगतरजोऽंशेभ्यः व्यस्तेभ्यः हस्तयोरुत्पत्तिः जायते। तेजसः रजोऽंशेभ्यः पायुर्जन्यते । पृथिवीगतेभ्यः रजोऽंशेभ्यः उपस्थोत्पद्यते। मुखादिगोलके एतानीन्द्रियाणि समुपस्थितानि[३१] ।

कर्मेन्द्रियासत्त्ववादिनां प्रति तत् सद्भावसमर्थनाय तल्लिङ्गभूताः व्यापाराः निरूप्यन्ते । उक्तिः, आदानं, गमनं, निसर्गः, आनन्दः इति पंच क्रिया प्रसिद्धाः सन्ति । "उक्तिः करणपूर्विका, क्रियात्वात्"[३२] इत्यादिकार्यलिङ्गकमनुमानं कर्मेन्द्रियाणि क्रियाजनकानीत्यत्र प्रमाणम् । न च क्रियान्तराणां कृष्यादीनामपि सत्त्वात् कथं पंचक्रिया इति चेदुच्यते- कृषि-वाणिज्य-सेवादिक्रिया अत्रैव पंचसु क्रियासु अन्तर्भवन्ति । अतः न ताः पृथक्तया निर्दिश्यन्ते।

अन्तःकरणस्य वर्णनम् -

अन्तःकरणं चतुर्धा विभज्यते । मनः, बुद्धिः, अहंकारः, चित्तं चेति। संशयात्मकमन्तःकरणं मन इत्युच्यते । निश्चयात्मिकान्तःकरणवृत्तिः बुद्धिरिति कथ्यते । गर्वाकारान्तःकरणवृत्तिः अहंकार इत्युच्यते । निर्विकारान्तःकरणवृत्तिः

चित्तमिति निगद्यते । केषांचनमते बुद्धिमनसोः चित्तांकरयोरन्तर्भावः। एते चत्वारः विकाराः आकाशादिगतसात्त्विकांशेभ्यः मिलितेभ्य उत्पद्यन्ते[३३] ।

इदानीमुक्तदशेन्द्रियप्रेरकत्वेन प्रस्तुतस्य मनसः स्थानं हृत्पद्मगोलकम्। दशेन्द्रियाणां प्रेरकत्वान्मनः तेषामिन्द्रियाणां स्वामीत्युच्यते । इन्द्रियसाहायं विना शब्दादिबाह्यविषयस्य स्वातन्त्र्यं नास्ति । अतोऽन्तरिन्द्रियमित्यस्य नाम।

इन्द्रियेषु विषयेषु स्थापितेषु सत्सु एतद् मनः "इदं समीचीनम्", इदमसमीचीनमित्यादिरूपेण गुणदोषविचारकारीत्यर्थः । आत्मनः प्रमातृत्वेन सर्वविज्ञानसाधारण्यात् चक्षुरादीनां रूपादिज्ञानजननमात्रत्वेन सार्थकत्वात् , चरितार्थत्वाच्च । तद्गुणदोषविचारस्योपलभ्यमाणस्यान्यथानुपपत्त्या तत्कारणत्वेन मनः अभ्युपगन्तव्यम् । सत्त्वरजस्तमोभिः गुणैरिदं मनः विकारं प्राप्नोति। अनेन मनसः वैराग्यकामाद्यनेकविधवृत्तिमत्त्वमवगम्यते[३४] । केषांचन मते मनः इन्द्रियं भवति । तस्मात् मनसा सहैकादशेन्द्रियाणीति तेषां मतम् । अन्तरिन्द्रियनिग्रहः शमः इति तन्मते संगच्छते । अपरे धर्मराजध्वरीन्द्रप्रभृतयः मनसः इन्द्रियत्वं नाभ्युपगच्छन्ति । "मनः षष्ठानीन्द्रियाणि" इति भगवद्गीतावचनं तन्मते संख्यापूरणार्थं भवति। मनः[३५] इन्द्रियं न भवतीत्यत्र श्रुति प्रमाणमपि ते प्रदर्शयन्ति । "वेदानध्यापयामास महाभारतपंचमान्" इत्यत्रावेदेनापि महाभारतेन वेदगत-पंचत्वसंख्यापूरणार्थमिति तेषामाशयः ।

पादटिप्पणी

१. तमःप्रधानविक्षेपशक्तिमद् अज्ञानोपहितचैतन्यादाकाशः आकाशाद्वायुः- - - - - - - - - चोत्पद्यते । वे. सार. पृ. सं. ३५ ।
तस्माद्वा एतस्मादात्मनः आकाशः संभूतः । तै. उ. २-१-१
२. छा. उ. ३-१४-३ ।
३. तत्रैव, ६-१-२ ।
४. तै. उ. २-१ ।
५. ऐ. आ. १-१-१ ।
६. तत्रैव ।
७. तै. उ., क. उ. २-२० ।
८. तत्रैव ।
९. तत्रैव ।
१०. मुण्ड. उ. २-३ ।
११. श्वे. ।
१२. तै. आ. ।
१३. तत्रैव ।
१४. तत्रैव ।
१५. क. उ. १-२-१८ ।
१६. ब्र. सू. २-३-९ ।
१७. बृ. आ. उ. १-२ ।
१८. ब्र. सू. २-३-१ ।
१९. तै. उ. २-१-१ ।
२०. छा. उ. ६-२-३ ।
२१. ब्र. सू. २-३-१३ ।
२२. अस्तिभाति प्रियं रूपं नाम चेत्यंशपंचकम् ।
आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ।। दृ. ह. वि. २० ।

यदस्ति यद्भाति तदात्मरूपम् ।
नान्यतो भाति न चान्यदस्ति ।।
स्वभावं संवित् प्रतिभाति केवला ।
ग्राह्यं गृहीतेऽपि मृषा विकल्पः ।।

२३. द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः ।
स्वस्वेतरद्वितीयांशैर्योजनात् पंच पंच ते ।। पं. द. १-२७ ।

२४. छा. उ. ६-३-२ ।

२५. ब्र. सू. २-३-१ ।

२६. तत्रैव, २-३-४ ।

२७. आकाशस्य सर्वावकाशतया सर्वाव्यतिरेकाद् वायोश्च सर्वचेष्टाहेतुत्वेन सर्वाविवनाभूतत्वात्तयोस्तेजःप्रभृतिष्वन्तर्भावं सिद्धवत् कृत्य त्रिवृत्करणं प्रयोगसौकर्यार्थं श्रुतिः वर्णयाम्बभूव । "विद्वन्मनोरंजनी" कश्चन प्राचीनः आचार्यः ।

२८. ज्ञानेन्द्रियाणि पंचैव । पंचीकरणवार्तिकम् ।
श्रोत्रं त्वक्चक्षुषी जिह्वाघ्राणं चेन्द्रियपंचकम् । पं. वि. प्र. ६ ।

२९. कर्णादिगोलकस्थ तच्छब्दादिग्राहकं क्रमात् ।
सूक्ष्मात्मककार्यानुमेयं तत्प्रायो धावेद्बहिर्मुखम् ।। पं. वि. प्र. ७ ।

३०. कदाचित्पिहिते कर्णे श्रूयते शब्दान्तरः ।
प्राणवायौजाठराग्नौ जलपानेऽन्नभक्षणे ।।
व्यज्यन्ते ह्यान्तराः स्पर्शाः मीलने चान्तरं तमः ।
उद्गारे रसगन्धौ चेत्यक्षाणामान्तरग्रहः ।।
पंचभूतविवेकप्रकरणम् । श्लो. ८-९ ।

३१. वाक्पाणिपादपायूपस्थैरक्षैस्तत्तत्क्रियाजनिः ।
मुखादिगोलकेष्वास्ते तत्कर्मेन्द्रियपंचकम् ।।
ज्ञानेन्द्रियाणि पंचैव पंच कर्मेन्द्रियाणि च ।

मनोबुद्धिरहंकारश्चित्तं चेति चतुष्टयम् ।।
पंचीकरणप्रकरणं, सुरेश्वराचार्यविलिखितम् ।

३२. पंचोक्त्यादानगमनविसर्गानन्दाः क्रियाः ।
कृषिवजिज्यसेवाद्या, पंचस्वन्तर्भवन्ति हि ।।
चाक्च वक्तव्यं च हस्तौ च दातव्यं च उपस्थश्चानन्दचितव्यं च पायुश्च विसर्जयितव्य च पादौ च गन्तव्यं च ।।प्र. उप. ४।८।

३३. बुद्धिर्नाम निश्चयात्मिकान्तःकरणवृत्तिः । मनो नाम संकल्पविकल्पात्मिकान्तःकरणवृत्तिः । अनयारेव चित्ताहंकारयोरन्तर्भावः।
वे. सार: १३० पृष्ठसंख्या ।
"मनोबुद्धिरहंकारश्चित्तं चेति चतुष्टयम्" । प्र. वा. ।
"मनोबुद्धिरहंकारश्चित्तं कारणमान्तरम् ।
संशयो निश्चयो गर्वः स्मरणं विषया इमे ।। वे. प. ५ पृष्ठसंख्या।

३४. मनो दशेन्द्रियाध्यक्ष हृत्पद्मगोलके स्थितम् ।
तच्चान्तःकरणं बाह्येष्वास्वातन्त्र्येण विनेन्द्रियैः ।।
पं. वि. प्र. श्लो. सं. १२।
अक्षेष्वर्थार्पितेषष्वेतद्गुणदोषविचारकम् ।
सत्त्वंरजस्तमश्चास्य गुणा विक्रियते हि तैः ।। प.वि.प्र.श्लो. सं. १३।

३५. इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । क. उ. १-३-१० ।

●●●

दशमोऽध्यायः

पाश्चात्त्यदर्शनानुसारेण भूतविचारः

यूरोपीयदार्शनिकानां मते विचिकित्सेयमासीत् यत् कस्मात् द्रव्यात् संसारोऽयमुत्पन्न इति । अन्नात् मनुष्यादीनामुत्पत्तिरिति केचन। मृदोऽन्नमभूदित्यपरे। जलात्पृथिव्युत्पन्नेतीतरे । इत्थं प्राचीनपाश्चात्यदार्शनिकाः विभिन्नानि मतानि प्रतिपादितवन्तः । कश्चित् दार्शनिकः अव्यक्तं द्रव्यं किंचित् संसारस्योत्पादनकारण-मित्यवोचत्। जलाग्निभ्यां संसारोऽभूत् यतः तत्र जीवशक्तिः मिश्रिताऽऽसीत् । अतः तदानीम् आत्मेश्वरादीनां प्रश्नानां सम्भावना नासीत् । केचन दार्शनिकाः संसारममुं भावरूपमङ्गीकुर्वन्ति स्म । अन्ये संसारोऽयं प्रतिक्षणं परिवर्तनस्वभाव-मङ्गीचक्रुः । अन्ततः केचनदार्शनिकाः एतेषु विषयेषु संतोषमननुभूय चत्वारि भूतान्यङ्गीचक्रुः। एतानि सन्ति भूतानि पृथिव्यप्तेजोवायुरूपाणि । एतेभ्यः भूतेभ्यः संसारस्योत्पत्तिरिति तेषामभिप्रायः। केचन परमाणुतः सृष्टिमङ्गीचक्रुः । यदा मृद्वस्तूत्पत्तौ विचारः प्रवर्तते स्म तदा केचन दार्शनिकाः आत्मानं नित्यं शरीरान्तरप्रवेशिनं चेति स्वीकृतवन्तः। अनेन शरीरात्मनोः भेदः सम्यक् स्फुटत्वं गतः । पश्चात् भूतेभ्यः सृष्टिमनङ्गीकृत्य पदार्थेषु संयोगनियोगादिशाक्तिं दृष्ट्वा आत्मैव सर्वेषामपि नियामकमित्यवोचन्।

थेलिज् मतानुसारेण जलात् संसारः उत्पन्नः । आइनेक्स् मेनिज् मतेन वायुरेव जगतः कारणम् । थेलिज् महोदयः सर्वप्रथमः दार्शनिकः । अयं ज्योतिषशास्त्रं सम्यक् जानाति स्म । जलात्

सर्वेषामुत्पत्तिं प्रदर्शयति, कथं ते पदार्थाः उत्पन्ना इत्यत्र न किमपि प्रमाणं प्रदर्शयति । आइनेक्सि माइडर दार्शनिकः ज्योतिषविद्यां, भूगोलविद्यां च सम्यक् जानाति स्म । एतेषां मते आदौ शीतोष्णयोर्मध्ये भेद आसीत् । पश्चात् क्रमशः पृथिव्यादीनां भूतानामुत्पत्तिः जातेति। आदौ गोलाकारा (वर्तुलाकारा) पृथिवी आसीत् । पश्चात् तत्र परिवर्तनं जातम् । पृथिव्यां यदा जलं घनीभूतं तदा जीवानामुत्पत्तिरभूदिति । आइनेक्सिमाइडरमहोदयस्य शिष्यः आइनेक्सिमेनिज् आसीत् । अस्य मते वायुः प्रथमं द्रव्यम् । शैथिल्यं घनीभावश्चेति गुणद्वयं वायोरासीत् इति तेषामाशयः। शैत्यात् घनीभावः, औष्णात् शैथिल्यं च जायत इति । वायोः शैत्यात् पृथिवी उत्पन्ना । वायोः उष्णत्वबलादग्निर्जाता। ततः नक्षत्राणि । इत्थं सर्वापि सृष्टिः समुत्पन्नेति ।

हिपो नामको दार्शनिकः थेलिज्महोदयस्य शिष्यः। जलं मूलतत्त्वमङ्गी-चकार। अग्निजलाभ्यां संसारश्चोत्पन्न इत्येतेषामभिप्रायः।

इडीयस्महोदयः आइनेक्सिमेनिज्महोदयस्यानुगामी आसीत्। अस्य मते मूलतत्त्वं वायुः । डीओजेनिज् नाकदार्शनिकोऽपि वायुमेव मूलतत्त्वमिति स्वीकरोतिस्म । जीवेषु वर्तमाना प्राणशक्तिर्वायुरूपैव।

पीथावोरस् संख्याभ्यः सर्वे पदार्थाः उत्पन्नाः, अतः संख्यैव संसारस्य मूलतत्त्वमिति गदति स्म । काश्चन संख्याः समाः भवन्ति । अन्ये विषमाः भवन्ति समसंख्यायाः विभागो भवितुमर्हति । विषमसंख्यायाः विभागः नैव भवति । अतः समसंख्यायाः रूपमनित्यम्। विषमसंख्यायाः रूपं नियतमस्ति।

आभ्यां समविषमाभ्यां नियतानियताभ्यां वा

प्रकाशान्धकाराभ्यां वा समीचीनासमीचीनाभ्यां वा संपूर्णः संसार जायत इति प्रतिपाद्यते । शरीरमेकं परित्यात्मा शरीरान्तरं प्रविशतीत्येते वदन्ति । जीवः अस्मिन् लोके यद् करोति तत्फलं भविष्यत्काले लप्स्यते ।

जेनोफेनिज् यस्य शिष्यः फरमेनिडीज् तन्मते ईश्वरव्यतिरिक्तमन्यदपि वस्तु वर्तते । सर्वेऽपि संसारः सद्रूपः । असतः स्थित्याभावाद् अभावपदार्थं नायमङ्गीकरोति । ज्ञानं सत् स्वरूपम् । इन्द्रियजन्यं ज्ञानं यथार्थं न भवति । सद् व्यतिरिक्तं किमपि नास्ति । तथापि मनुष्यो असदस्तीति चिन्तयति । सदसद्भ्यां जगतः उत्पत्तिरभूत् । प्रकाशस्याधिक्यान्मनुष्यः ज्ञानवान् भवति। तमसः प्राबल्यादज्ञानी भवति ।

फरमेनिडीज्महोदयस्य काले हेरैक्लीटस् , एम्पेडिक्लिज् , डिमोक्राटिस्, एनैक्सागोरस, प्रोटोगोरसनामकाः विख्याताः पंचदार्शनिकाः आसन् । तेषु हेरैक्लीटस् नामकाचार्याः उत्तमवंशे जन्म अलभत । तन्मते प्रकृत्येकैव भवति । सा तु सर्वदा परिणामिनी। परिवर्तनशीलानि द्रव्याणि दृष्ट्वाऽस्य कारणं किमपि परिवर्तनशीलं स्यात् तत् द्रव्यमग्निः स्यादित्यस्य मतम् । अयमग्निः जीवेषु प्राणरूपः। दैववशात् परस्परं विरुद्धानि वस्तूनि संसारेऽस्मिन् प्रादुर्भूतानि । जैनमत इव अयमपि प्रतिदिनं नवीनस्य सूर्यस्योत्पत्ति-मङ्गीकरोत् । सूर्यनौकायां वर्तमानोऽग्निः सन्ध्यासमये समुद्रजले विनाशं गच्छति। पुनः रात्रौ जलवाष्पेभ्य जन्म लब्ध्वा प्रातःकाले उदेति। तथैव संसारोऽपि अग्नेः जातः । पुनः कल्पान्ते संसारोऽयमाग्निं प्रविश्य विनश्यति।

ऐम्पडोक्लीज् नामकदार्शनिकः सुप्रसिद्धः आसीत् । एतन्मते

संसारस्यादि वा विनाशो वा नास्ति । सर्वमपि जगत् वाय्वादिभ्य: जायते । गुणापेक्षया एतानि तत्त्वानि पृथिव्यादीनि विलक्षणानि । एकस्मात्तत्वादन्यत् तत्त्वं न कदापि जायते । एतेषां तत्त्वानामंश: पृथग् रूपेण भवन्ति । तत्त्वानां सूक्ष्मांशेभ्य: विलक्षणमेकं द्रव्यमभूदिति ज्ञायते । तत्त्वानां संयोग-वियोगयो: कृते संसारे द्वे शक्ती स्त: । एका शक्तिरनुराग:, द्वितीया शक्तिस्तु द्वेष: । अनुरागात् तत्त्वेषु जायते आकर्षणम्। द्वेषात् तत्त्वेषु विघटनं भवति । अनुरागवशात् शनै: शनै: तत्त्वेभ्य: नवीनानि रूपाणि प्रादुर्भवन्ति । आदौ पृथिव्यां कुरपा: उन्नतदेहा: प्राणिनश्चासन् । क्रमश: अनुरागवशात् तेषु नूतनत्वं समागतम् । अस्यैव नाम "उत्क्रान्तिवाद:" इति डारउइन्महोदय: अमुमेवो-त्क्रान्तिवादं वैज्ञानिकनियमै: सम्यक् प्रतिपादितवान्।

बाइबल- अनुसारेण भूतविचार: -

पंचमहाभूतानि स्वीकुर्वन्ति इहापि । आकाश:, वायु:, तेज:, जलं, पृथिवी चेति पंचमहाभूतानि । परमात्मन: सकाशादाकाश:, आकाशाद्वायु:, वायो: तेज:, तेजस: जलं, जलात्पृथिवी चोत्पद्यन्ते। सृष्ट्यारम्भकाले परमेश्वर: आकाशादारभ्य पृथिवीपर्यन्तानि पंचमहाभूतानि ससर्ज[१] । आदौ परमात्मा-ऽऽकाशमसृजत्[२] । सर्वं जलं व्याप्य प्राणरूप आत्माऽऽसीत्[३] । प्राणा: वायुरूपा: आसन् । जलं सर्वं व्याप्य प्राण: आसन् इत्युक्ते तदानीं वायुरासीदित्यवगम्यते। जलस्य शुष्कता सम्पादनार्थं वायो: आवश्यकत्वमस्ति। अनेनापि ज्ञातुं शक्यते यत् उदकस्योत्पत्ते: पूर्वं वायुरासीत्। आकाशस्याधस्थं तोयमेकत्रतिष्ठतु । पश्चाद्भूमिरार्द्ररहिता भवतु। अनेनार्द्रराहित्यं वायुनैव सम्पादितमित्यवगम्यते। तस्माज्जलोत्पत्ते: पूर्वम् आकाशोत्पत्तेरनन्तरं

वायुरासीदिति । ततः परमात्मनः सकाशात् तैजस[४] उत्पत्तिरवलोक्यते अस्माभिः। तैजसः प्रभावादेव तमः प्रकाशयोः स्वरूपं विविच्य ज्ञातुं शक्यते। ज्योतिषः सकाशात् सूर्यस्य चन्द्रमसः नक्षत्राणां च सृष्टिरभूत्। तस्मात् तेजोऽप्यासीत् । पश्चादस्माभिः दृश्यते यद् गभीरं [५]जलमन्धकारेणावृतमिति। अतः सृष्ट्यारम्भकाले जलमप्यासीत् । परमात्मा गभीरं जलं द्विधा व्यभजत्। तदानीं द्वयोः जलयोर्मध्ये कश्चनावकाशो जातः । अनेनापि वक्तुं शक्यते यदारम्भसमये जलमासीदिति । जलराशेः परमात्मा "समुद्रः" इति नाम प्रायच्छत्। इदमप्यन्यत्कारणं भवत्यादौ नीरमासीदिति[६] । जलानि तद्गतमत्स्यादीन् जनयन्तु। अर्थात् जलानि[७] समुद्रस्थान् जीवान् प्रादुर्भावयन्त्विति। एतदप्यपरं कारणमस्ति यदादौ समृद्धं जलमासीदित्यत्र ।

आकाशादीनि[८] पंचमहाभूतानि परमात्मा सृष्टाणि । पृथिव्याः[९] न किमपि रूपमासीत् । सा च पृथिवी कारणरूपाऽऽसीत् । अर्थात् सद्रूपाऽऽसीत् । जलादेव पृथिव्या उत्पत्तिं बाइबल् अपि समर्थयति । जलस्य घनीभूतांश एव पृथिवी[१०] । इयं च पृथिवी तमसाऽऽवृताऽऽसीत्। पृथिव्यामालोकप्रदर्शनार्थं ज्योतिस्समूहमाकाशे परमात्मा संस्थापितवान्[११] । तदानीं वृक्षादिरुर्वरहीना[१२] चासीत् । पृथिवीकर्षणार्थं न कोऽपि[१३] कर्षक आसीत् । भूमौ वृष्टिरपि[१४] नासीत्। सिंचनं कर्तुं न कोऽपि आसीत्। पृथिवीगतं वाष्पं[१५] भूमिमसिंचयत् । ततः कर्षणं वृक्षलतादीनामुत्पत्ति-श्चाभूत्। इत्थं बाइबल् अनुसारेण पंचभूताना-मुत्पत्तिरस्ति। यथोक्तप्रकारेण तेषामुत्पत्तिक्रमोऽपि प्रदर्शितः ।

बाइबल् अनुसारेण सृष्टिक्रमः -

आदौ परमात्माऽऽकाशं पृथिवीं च ससर्ज । पृथिवी निराकारा सद्रूपा चासीत् । अगाधजलं तमसाऽवृतमासीत् । सर्वं जलं व्याप्य परमात्माऽवर्तत। परमात्मनः मुखादियं वाणी निसृता - "जन्यतां तेजः इति" । ततः समीचीनं तेजः इत्यचिन्तयत् । आलोकात्तमसं पृथक्कृत्य तमसो नाम नक्तामिति आलोकस्य नाम दिनमित्युच्चारयामास। संध्याकालोऽवसितः । प्रातःकालश्च समायातः। अनेनेकदिवसात्मकः कालोऽवसितः । अर्थात् प्रथमे दिने परमात्मनैतावत्सृष्ट-मित्यवगम्यते ।

परमात्मा गभीरं जलं द्विधा व्यभयत्ततः । तदानीं द्वयोर्जलयोर्मध्ये कश्चनावकाशो जातः । अवकाशम् आकाशमिति कथयामास । संध्याकालो-ऽवसतिः । प्रातःकालश्च समायातः । अनेन द्वितीयं दिनं परिसमाप्तम्।

आकाशस्याधस्थमुदकमेकत्रसंभूय भूमिरार्द्ररहिता भवत्वित्याज्ञापया-मासेश्वररूपः परमात्मा । घनीभूतां पृथिवीं भूमिरिति स प्रोक्तवान्। जलराशिं समुद्रनाम्नोच्चारितवान् । सृष्टं सर्वं विलोक्य सम्यगेतदित्यभिप्रायं प्राकटयत् सः परमेश्वरः स्वस्वजात्यनुसारं तरुलताः फलवृक्षाश्चोत्पद्यन्तामित्युवाच । तथैव सृष्टिरभूत् । सर्वं शोभनमिति ददर्श। संध्याकालोऽवसितः प्रातःकालश्च समायातः। अनेन तृतीयः दिवसोऽवसितः।

रात्रिदिवसौ पृथक्कर्तुं विशाले आकाशे ज्योतिः समूहः सूचनाः, कालान्, दिवसान्, संवत्सरान् च निर्देष्टुमैच्छत् स भगवान्। पृथिवीमालोकयितुं तच्च ज्योतिःसमूहः आकाशं विशालं भवत्विति

कांक्षितवान् । सर्वं तथैवाभूत् । दिवसार्थमेकं बृहज्जोतिः (सूर्यः), रात्र्यै एकं लघुज्योतिः (चन्द्रः) नक्षत्राणि च परमात्मना कृतानि । पृथिव्याः कृते आलोकं प्रदाय रात्रिं च शासयित्वा तमःप्रकाशौ पृथक्कर्तुम् ईश्वरः ज्योतिःपुंजं विशाले आकाशे संस्थापितवान्। स्रष्टा सृष्टं अवलोक्य सर्वं हृद्यमित्यचिन्तयत् । संध्याकालोऽवसितः । प्रातःकालश्च समायातः। एतेन चतुर्थदिनं परिसमाप्तम् ।

जलचराणि संवृद्धानि प्रादुर्भावयन्तु । जलानि, पक्षिणः भूमौ विशाले आकाशे च विहरन्त्विति कथयित्वा जलचराणि पक्षिणः सर्वे प्राणिनः स्वस्वजात्यनुसारेण परमेश्वरेण सृष्ठाः । सर्वमुत्पन्नमवलोक्य समीचीनमित्य-चिन्तयत् । जलचराणि संवृद्धानि भवन्तु, विहङ्गमाः आकाशे विहरन्तु, प्राणिनः सर्वे वृद्धिं प्राप्नुवन्त्विति स्वकीयाशीर्वादवचोभिः तान् आशीर्वादयामास स भगवान् परमकारुणिकः जगत्स्रष्टा। संध्याकालोऽवसितः प्रातःकालश्च समायातः । अनेन पंचमदिनस्य सृष्टिः परिसमाप्ता । अर्थात् पंचमदिवसः परिसमाप्तः ।

स्वस्वजात्यनुसारं सर्वे प्राणिनः जीवन्तः पशवः, पृथिव्यां वर्तमानाः क्षुद्राः प्राणिनः, कृमयः, ग्राम्यपशवः, आरण्यपशवः, पृथिवीतः उत्पद्यन्ता-मित्युक्त्वा तान् सर्वान् उत्पादयामास परमेश्वरः। उत्पन्नं सर्वं शोभनमित्य-चिन्तयत् । ततः परमात्माऽवोचत्- निजस्वरूपेण बलेन च मनुष्यान् सृजामः। ते समुद्रस्थान् जीवान्, भूमौ स्थितान् जीवान्, आकाशे उड्डीयमानपक्ष्यादीन् पृथिव्यां वर्तमानान् क्षुद्रान् जीवान् सर्वान् पालयेयुरिति। ततः परमात्मा स्वस्वरूपेण पुरुषं स्त्रियं चोत्पादयामास। तयोः कृते स्वाशीर्वचनं प्रादात् । ततश्चावदत्-

फलत ! वृद्धिं गच्छत ! स्वसन्तत्या भूमिं विस्तरयत। पृथिवीगतान् सर्वान् स्वाधीने कुरुत !, शासयत ! संसारगतान् सर्वान् स्थावरजंगमान् इति। भूमौ वर्तमानाः सर्वेऽपि वृक्षाः फलदायिनः वृक्षाः युष्माकं कृते मया प्रदत्ताः । ते युष्माकमाहाराय भोजनाय चोपयुक्ताः भवन्ति। भूमौ वर्तमानाः पशवः, जलगतमत्स्यादयः, आकाशस्य विहङ्गमाः, कृमयः, हरितवर्णाः वृक्षाः लताश्च युष्माकमाहारः । ईश्वरमुखनिसृतवागनुसारेण सर्वं तथैव सम्पन्नम् । आत्मना सृष्टं सर्वं विलोक्य सम्यगित्यवोचत् । संध्याकालोऽवसितः प्रातःकालः समागतः। इत्थं षष्ठं दिनं परिसमाप्तम् । आकाशगतं भूगतं च सर्वं जीवसमूहम् अर्थात् प्राणिसमूहं संसृष्ट्वा स्वसृष्टिं परिसमापितवान् । षड्दिवसेषु सृष्ट्वा सर्वं जगत् स परमात्मा सप्तमदिने विश्रान्तः । अतः सप्तमं दिनं स्वाशिषा शुद्धिं चकार यतः सः तद्दिने सृष्टिरूपकार्यात् विरराम ।

यदा परमात्मा आकाशादारभ्य पृथिवीपर्यन्तां सृष्टिमकरोत्तदा तेषां क्रमस्तु इत्थमासीत् । आदौ पृथिवी निराकारा वृक्षादिविहीना उर्वररहिता चासीत् । न कस्यापि तृणस्योत्पत्तिरासीत् । एतावत्पर्यन्तं भूमौ वृष्टिः नासीत्। किन्तु बाष्पं पृथिवीतः समागत्य भूमिमसिंचयत्। ईश्वरः मनुष्यं मृदः निर्माय तस्य नासिकाछिद्राभ्यां प्राणवायुं प्रेषयामास। ततः जीवात्माऽभूत् । स्वस्मादुत्पन्नाय जीवात्मने "एदेन्" देशे स्वनिर्मितवाटिकायां स्थानं परिकल्पितवान् । नरेणैकेन नैव भवितव्यमिति बुद्ध्या स भगवान् तं नरं गाढनिद्रां प्रापितवान् । ततः तस्माच्छरीरात् पार्श्वस्थमस्थिं निष्काश्य तत्स्थानं मांसखण्डेन पूरयामास। पश्चात् तस्मादस्थिखण्डात् स्त्रियं चकार । नरस्य

“आदमः” इति नाम दत्तवान् । नरास्थिनिर्मितां स्त्रियम् आदम समीपम् आनीतवान् । तदा सः नरः प्रोवाच तां स्त्रियं विलोक्य नारीयमिति यतः नराज्जातेति । नरोत्पन्नत्वादिमां स्त्रियं नारीति प्रोक्तवान् । नरः स्वपित्रादीन् परित्यज्यालिङ्गनं करोति । पुनश्चावदत् सः समास्थि समूहेषु इयमेकास्थिर्भवति। मम मांसखण्डेषु कश्चनभागविशेषः । तद्दिनादारभ्य “हव्वेति” नाम्ना तां व्याजहर। इत्थमाभ्यां नरनारीभ्यां सर्वापि सृष्टिः वृद्धिं गता ।

अपि च संसारे नराः वृद्धिं गताः । स्ववाचा मनसा कर्मणा च ते ईश्वराज्ञामुल्लङ्घ्य व्यवहरन्ति स्म । स्वेच्छानुसारं जीवनं यापयन्ति स्म । नरहृदयस्थ भावनाः सर्वदा दोषदुष्टा आसन् । भयङ्करमासीद् मनुष्यस्य दुष्कर्म जगत्यस्मिन् । मनुष्यस्यालोचनापद्धतिः दोषपूर्णा निकृष्टा चेति मत्वा किमर्थमिमान् नरान् असृजमिति परिवेदनामकरोत्। ततः जलप्रलयेन प्रथमां सृष्टिं नाशयति स्म । पश्चात्पुनः नवीनां सृष्टिं “नावह” नामकभक्तपरिवारेण सह विस्तारयामास इति ।

कुर्आन् शरीफ अनुसारेण भूतविचारः -

आकाशः वायुः तेजः जलं पृथिवी चेति पंचमहाभूतानि सन्तीति एतेऽप्यङ्गीकुर्वन्ति । सर्वप्रथमं परवरदिगारः[१६] व्योम्न आरभ्य पृथिवीपर्यन्तानि भूतानि जनयामास । आदौ “अल्लाह” परमात्माऽऽकाशं ससर्ज । जीवस्य प्राणाः वायुरूपाः भवन्ति । तस्मात् जीवोत्पत्तेः पूर्वम् आकाशोत्पत्तेः परं प्राणवायुरासीदिति ज्ञायते। भूमेरार्द्रराहित्यं वायुना सम्पाद्यते । सूर्यचन्द्रतारकाः[१७] तेजसः स्वरूपाः भवन्ति । अतः सूर्यादीनामुत्पत्तेः पूर्वं परमात्मनः सकाशात्

तैजस उत्पत्तिरभूदिति। वायोः प्रभावात् जलस्य कश्चनांशाः घनीभूतः। घनीभूतमंशं भूमिरित्युवाच[१८]। एकरूपं जलं सर्वेषां[१९] कृते सृष्टवान्। जलं द्विधा विभज्य समुद्रं[२०] पृथिवीं चोत्पादयामास।

व्योम्नः आरभ्य पृथिवीपर्यन्तासृष्टिः परमात्मना अल्लाहेन कृता। सृष्ट्यारम्भकाले मेदिन्याः[२१] न किमपि रूपम्। सा च कारणरूपेण आसीत्। महम्मदीया अपि जलात्पृथिव्या उत्पत्तिमङ्गीकुर्वन्ति। जलस्य घनीभूतांश एव पृथिवी। आदौ वृष्टिर्नासीत्। भूमेः कर्षणार्थं न कोऽपि नर आसीत्। भूमौ वृक्षादयः नासन्। [२२]"आदम"स्योत्पत्तेः परं भूमेः कर्षणमभूत्। ततः सस्यश्यामला पृथिवी अभूत्। ससर्ज। परमेश्वरस्य दिवसः मनुष्यदिवसवत् न भवति। ६० सहस्रवर्षाणि परवरदिगारस्य दिनमेकं भवति। कुत्रचित् ५० सहस्रवर्षाणि दिनमित्यपि लिखितं वर्तते। १२ मासाः तेनैव विहिताः। ६ युगपरिसमाप्त्यनन्तरं प्रपंचस्य विकास इति परवरदिगारस्याभिप्रायः।

अहं पृथिव्यां मम प्रतिनिधिं सृजामीति ऐच्छत्। ततः [२३]"आदम" नामकनरं "अव्वा"[२४] नाम्नीं स्त्रियं चोत्पादयामास। पृथिव्याः कर्षणार्थं परवरदिगारस्य प्रशंसार्थं च पत्न्या सह आदमनामकं प्रथमं जीवं जनयामास। तं नरम् अव्वया साकं "बिहिरत"[२५] नामकोद्याने अल्लाहः परमात्मा संस्थापयामास। ततः परमात्मा खादत। वृद्धिं गच्छत। पृथिवीं स्वसंतत्या पूरयत। इति तत्रत्य प्राणिसमूहं स्ववचोभिः आशीर्वादं प्रायच्छत्।

[२६]हे मानवः ! शुद्धं भुंक्ष्व। अभक्ष्यं मा खादय। येषां

सदसद् ज्ञानं नास्ति ते अभक्ष्यमपि[२७] खादन्ति । आकाशादारभ्य पृथिवीपर्यन्तं यद्यत् वर्तते तत्सर्वं मैयैव सृष्टम् । [२८]सर्वद्रष्टाऽहं मनुष्यस्य पुण्यपापानुसारेण फलं प्रयच्छामि। दिनं रात्रीं च विलोक्य ज्ञानिन: मम प्रशंसां कुर्वन्ति । हे इमानुवाला: । संसारोऽयमनित्य: मोहरूपश्च[२९] । अत: त्वं संसारं मानुगच्छ । परवरदिगारस्य प्रशंसां कर्तुमनेके संकेता: तेन जगति संस्थापिता: । [३०]आकाशादारभ्य पृथिवी पर्यन्तं तस्यैव स्वामित्वं नान्यस्य। अल्लाह: मृदा [३१]मनुष्यं निर्माय तन्मुखे वाचं निक्षिप्तवान् । सर्वज्ञं सर्वव्यापिनं परवरदिगारं सर्वापि सृष्टि: प्रशंसति।

कुर्रान् शरीफ अनुसारेण सृष्टि: -

सर्वप्रथमं परवरदिगार: आकाशादारभ्य[३२] पृथिवीपर्यन्तानि भूतानि सृष्टवान्। आकाशं मनुष्यस्य कृते छत्रमिव[३३] ससर्ज । अल्लाह: मनुष्यार्थं पृथिवीं तद्गतं सर्वं सृजतिस्म । सप्ताकाश:[३४] मया सृष्टा: त्वत्कृते इति परवरदिगार: मनुष्यं संबोधयति स्म। न कस्यापि सहाय्यं विना परमेश्वर: आकाशमुपरि संस्थापयामास[३५]। आकाशे सूर्यचन्द्रतारका: अल्लाहेन सृष्टा:। सूर्यचन्द्रादिभिराकाशोऽलंकृत: इत्यवगम्यते । सूर्यचन्द्रनक्षत्राणां[३६] यानि कर्माणि मयैव विहितानीति परवरदि-गारेणोच्यते। आदौ पृथिव्यां न कोऽपि जीव आसीत्। आलोकात्तम: पृथक्कृत्य तमसो नाम रात्रिरिति आलोकस्य नाम दिनमिति च प्रोक्तवान् । सर्वेषां प्राणिनां कृते[३७] एकरूपं जलमसृजत्। तत: तस्माज्जलात् पृथिवीं सृष्टवान् । वायुना घनीभूतां पृथिवीं

भूमिरित्यवोचत् । जलसमूहः समुद्रः[३८] । पृथिव्यां स्वस्वजात्यानुसारेण वनस्पतयः सृष्टाः । जलचराणि पक्षिणः सर्वे प्राणिनः परवरदिगारेण सृष्टाः । स्वस्वजात्यानुसारं स्त्रीपुरुषरूपेण सर्वान् जीवान् जनयामास । स्वसामर्थ्यनिर्मितां विशालां पृथिवीं तत्सुन्दरतां चावलोक्य संतोषमनुभूतवान् । जलचराणि, विहङ्गमाः, सर्वे च प्राणिनः स्वस्वजातिं वर्धयन्त्विति उवाच ।

द्वादशमासाः[३९] तेन परमात्मना सृष्टाः । षट्सु दिवसेषु सर्वं जगत् भो! इमानुवालाः ! आकाशादीनां भूतानां निर्माणे ममैव सामर्थ्यमस्ति[४०] । समुद्रो विशालो मयैवाकारि । दिनरात्र्योः सृष्टिरपि मयैव विहिता । पश्य सुविशालां पृथिवीम् । मम आशीर्वादबलेन सर्वे प्राणिनः पृथिव्यां व्याप्ताः । आदम अव्वा नामकाभ्यां मनुष्याभ्यां पापं विहितम् । यस्य वृक्षस्य फलानि न खादयितव्यानि इति मयाऽऽदिष्टं, तस्यैव वृक्षस्य फलानि भक्षयित्वा ममाज्ञाम् अतिक्रान्तवन्तौ । ततः क्रुद्धोऽल्लाहः[४१] तस्माद्धनात् तौ निष्कासयामास । पश्चात्ते वृद्धिं गताः । सर्वापि सृष्टिः ताभ्यामुत्पन्ना।

●●●

पादटिप्पणी

१. आदौ परमात्मा आकाशं पृथिवीं च ससर्ज । आ. १, अ. १, व.१

२. अवकाश एवाकाश इति कथयामास । आ. १, अ. १, व. ८।

३. सर्वं जलं व्याप्य प्राणा आवर्तन्त । आ. १, अ. १, व.२ । आकाशस्याधस्थमुदकमेकत्रसंभूय भूमिरार्द्ररहिता- - - - – शुष्कां पृथिवीं भूमिरिति । अ. १, अ. १, व. ९ ।

४. परमात्मनः मुखादियं वाणी निसृता जन्यतां तेज इति १० ३९।

रात्रिदिवसौ पृथक्कर्त्तुं आकाशे ज्योतिस्समूहमसृजत १० १६ व.।

५. अगाधं जलं तमसावृतमासीत् आदिपुस्तकम् । अ.१, व. ३

६. जलराशिं समुद्रनाम्नोच्चारितवान् । आदिपुस्तकम् । अ.१, व.१०।

७. जलचराणि संवृद्धानि प्रादुर्भावयन्तु । आदिपुस्तकम् । अ.१, व. १

८. आदौ परमात्मा- - - पृथिवीं च ससर्ज। आदिपुस्तकम्। अ.१, व.१

९. पृथिवी निराकाराऽऽसीत् । आदिपुस्तकम् । अ.१, व. २ ।

१०. घनीभूतां पृथिवीं भूमिरिति प्रोक्तवान्। आदिपुस्तकम्। अ.१, व. ९

११. रात्रिदिवसौ पृथक्कर्तुं विशाले आकाशे ज्योतिसमूहः सूचनाः, कालान्, दिवसान्, संवत्सरान् च निर्देष्टुमैच्छत्। आदिपुस्तकम्। अ.१,व.१६

१२. पृथिवी निराकारा वृक्षादिविहीना चासीत् । आदिपुस्तकम् । अ.१, व. १ ।

१३. कृषिकर्म कर्तुं नरः न कोऽपि भूमावासीत् । आदिपुस्तकम् । अ.२, व. ५ ।

१४. वृष्टिः भूमौ नासीत् । आदिपुस्तकम् । अ. २, व. ५ ।

१५. वाष्पं भूमिमसिंचयत् । आदिपुस्तकम् । अ. २, व. ६ ।

१६. परवरदिगारेण आकाशादीनि भूतान्युत्पादितानि । सु. ब. २, पृष्ठ ५९ ।

१७. सूर्यचन्द्रनक्षत्रादीनां........भवन्ति । सु. हि. २, पृष्ठ ४३९ ।

१८. पृथिवीं तद्गतं सर्वं चाहमसृजम्...... । सृ. ब. २, पृष्ठ ३३ ।

१९. समानमेव जलं सर्वेभ्यो विहितम् । सु. ब. ३, पृष्ठ ४२७ ।

२०. विशालं समुद्रमहमकरवम् । सु. ब. २ , पृष्ठ ५९ ।

२१. मेधिन्याम्........... । सु. ब. २, पृष्ठ ३३ ।

२२. विशालां पृथिवीं पश्य...... सौन्दर्यम् । सू. ४५, पृष्ठ ८६३ ।

२३. मेधिन्यामहं प्रतिनिधिं जनयामास । सु. ब. २, व. ३३ ।

२४. तत्रैव ।

२५. बिहिश्त नामके उद्याने...... । सु. ब. २, व. ३३ ।

२६. शुद्धभक्षणं कुरु...... । सु. ब. २, व. १६८ ।

२७. सर्वमहं पश्यामि यतोऽहं सर्वद्रष्टा । सू. ३, व. २५४ ।

२८. संसारोऽयं मायामयः .... । सू. ३, व. १५४ ।
२९. चन्द्रतारकाः ज्ञानिनां सूचकाः । सू. ४५, व. १९२ ।
३०. मनुष्यं मृदा........... । सू. ४५, पृष्ठ ८७७ ।
३१. परवरदिगारेण आकाशादिभूतान्युत्पादितानि । सु. ब. २, पृष्ठ ५९ ।
३२. अहमाकाशं छत्रमिव सृष्टवान्.......... । सु. ब. २, पृष्ठ ३३ ।
३३. सप्ताकाशाः मया सृष्टाः........ । सु. ब. २, पृष्ठ ३३ ।
३४. अहमाकाशमुपरिसमुपस्थापितवान्....... । सु. ब. ३, पृष्ठ ४२७ ।
३५. सूर्यचन्द्रनक्षत्रादीनां कर्माणि मयैव विहितानि । सु. हि. २, पृष्ठ ४३९ ।
३६. समानमेव जलं सर्वेभ्यो विहितम्......... । सु. ब. ३, पृष्ठ ४२७ ।
३७. विशालं समुद्रमहमकरवम्........ । सु. ब. २, पृष्ठ ५९ ।
३८. द्वादशमासाः मया प्रकल्पिताः...... । सु. ब. २, पृ. ५९ ।
३९. स्वसामर्थ्येनाकाशदिकमृत्पादितवान् । सू. पृष्ठ ८६३ ।
४०. शैतानेन प्रेरितौ तौ.... पापमकुरुताम् । सू. ब. २, पृष्ठ ३३ ।
४१. तस्माद् वृक्षात् ताववतीर्य.... जग्मतुः । सु. ब. २, ३३ ।

उपसंहारः

"नैवेह किंचन अग्र आसीत्" इत्यादिश्रुत्या मनसः उत्पत्तेः पूर्वं नामरूपक्रियात्मकं किंचिदपि नासीदित्यवगम्यते । "मृत्युनैवेदमावृत"-मित्यादिश्रुत्या प्रागुत्पत्तेः कार्यकारणयोरस्तित्वमवगम्यते।

सृष्ट्यारम्भकाले परमात्मा प्रपंचमिदं बुद्धावाकलय्येदं करिष्यामि, इदमेवं करिष्यामि इति संकल्पमकरोत् । "तदैक्षत बहुस्यां प्रजायेय" इत्यादिश्रुतेरिरिति वेदान्तिनः । परमात्मनः सकाशाद् भूतोत्पत्तिरित्येषां मतम् ।

ब्रह्मणः समग्रस्यास्य सृष्टिरिति धर्मशास्त्रकाराः ।

सर्वोऽपि प्रपंचः प्रकृतितः जायत इति सांख्याः । ईश्वरः जगतः निमित्तकारणं, परमाणवः उपादानकारणमिति च न्यायवैशेषिकाः ।

चार्वाकमते पृथिव्यप्तेजोवायूनां मूलभूतानां सृष्टिः न केनापि विहिता । एतानि स्वतः सिद्धानि । ततः दृश्यमानमिदं जगज्जातं स्थितिं लभते नश्यति च ।

बौद्धमते केचन जगतः सत्यत्वमङ्गीकुर्वन्ति । अन्ये क्षणिकत्वम् ।

सर्वं द्रव्यं पांचभौतिकम् । पृथिव्यादिभिः पंचभूतैः मिलितैः सृष्टिर्जातेति आयुर्वेदमतावलंबिनः ।

सांख्यमतसृष्टिक्रमं ज्योतिषमतानुयायिनः स्वीकुर्वन्ति । सर्वे पदार्थाः पंचभूतात्मकाः । सर्वेषां संहत्या ब्रह्माण्डम् । विश्वं पांचभौतिकमेवेति ज्योतिर्विदः।

पुरा प्रजापतिः सर्वं सृष्टवान् । सृष्टिकाले गुणानां वैषम्यात् प्रथमतः प्रधानं जातम् । ततः महदादीनां सृष्टिः । सृष्ट्युत्पत्तिविषये पुराणानि भिद्यन्ते।

भूतोत्पत्तिविषये पाश्चात्यदार्शनिकाः विभिन्नानि मतानि प्रतिपादितवन्तः। किंचिदव्यक्तं द्रव्यं जगतः कारणमिति केचन वदन्ति। संसारोऽयं प्रतिक्षणं परिवर्तत इत्यन्येषां मतम् । "थेलिज" गदति स्म संसारः जलान्निष्पन्न इति । वायुरेव जगतः कारणमिति "आइनेक्स मेनिज्" अकथयत् ।

परमात्मनः सकाशात् सर्वाणि भूतानि जातानि । आदौ परमात्मा आकाशं पृथिवीं च ससर्ज । पृथिवी निराकारा आसीत् । अगाधं जलम् अन्धकारेणावृतमासीत्। जलं सर्वं व्याप्य परमात्मा आसीत् । परमात्मनः मुखनिःसृतवाण्या संसारोऽयं जातः । "आदम"तः सृष्टिः "बाइबेल्" धर्मपुस्तके श्रूयते । पुनः जलप्रलयादनन्तरं "नोवह"नामकभक्तजनेन सह संसारोऽयं वर्धितः।

महम्मदीया अपि पंचभूतान्यङ्गीकुर्वन्ति । परवरदिगारेण आकाशादारभ्य पृथिवीपर्यन्तानि भूतानि सृष्टानि । पृथिव्यां न कोऽपि जीवः आसीत् । सर्वेषां कृते समानं जलं सृष्टम् । सप्ताकाशाः परवरदिगारेण सृष्टाः । "आदम" "अव्वा"नामकाभ्यां मनुष्यसृष्टिर्जाता। ताभ्यां पापं कृतम् । अभक्ष्याणि फलानि खादित्वा ताभ्यां पापमार्जितम् । ततः कृद्धः परवरदिगारः तौ निष्कासयामास। ततः तेषां परिवारः एधिताः ।

प्रायः सर्वेऽपि शास्त्रकाराः भूतान्यङ्गीकुर्वन्ति । भूतसंख्याविषये वैमनस्यमस्ति । कस्मात् भूतात् किं जातमित्यत्रापि शास्त्रकाराः परस्परं विवदमानाः दृश्यन्ते । ईश्वरः, यीशुः, अल्लाहः, बुद्धो वा परमात्मा भवतु । सर्वे तस्मात् परमात्मनः सकाशात् सृष्टिं वर्णयन्ति एवञ्च दृश्यं निखिलमपि सृष्टजातं तस्य एव सर्वज्ञात् सर्वशक्तिमतः परमेश्वरात् अभवत् इति परोक्षेण अपरोक्षेण वा सर्वेऽपि ऐक्यमतेन स्वीकुर्वन्ति इति शम् ।।

अनुशीलितग्रन्थसूची

ग्रन्थः	ग्रन्थकर्त्ता	
अथर्ववेदः	रामकुमारराय	
अद्वैताक्षरमालिका	श्रीशंकरभक्तजनसभा	
अद्वैतवेदान्त में तत्त्व और विज्ञान	ऊर्मिला देवी	वि
इष्टसिद्धिः	विमुक्तात्मा	सीरी
ईशावास्योपनिषद्		गोरख
ऋग्वेदसंहिता	उमाशंकरः	
ऋग्वेदभाष्यभूमिका	जगन्नाथपाठक	
ऋग्वेददिग्दर्शनम् (तेलुगु)	वीरराघवाचार्युलु	
ऐतरेय आरम्यकम्		
कल्पतरुः	पाण्डुरंगजावेजी	स
कठोपनिषद्		
कुर्आन् शरीफ		लक्षन
कूर्मपुराणम्	रामशंकरभट्टाचार्यः	इण
केनोपनिषद्		
छान्दोग्योपनिषद्		
तर्कसंग्रहः	चौखम्बा	
तर्कभाषा	चौखम्बा	
तैत्तिरीय आरमअयकम्	गीताप्रेस्	
द्रव्यगुणविज्ञानम्	प्रियव्रतशर्मा	
द्रव्यगुणकल्पद्रुमः	देवीप्रसादत्रिपाठी	नयाग